N. A.
Shiva rahasya - Pt 11
श्रीशिवरहस्य - एकादशांश
Sanskrit
Paper Handwritten
Sambat 1979
133 folios
14.2"×8.5"
Complete

॥अथश्रीवरहस्यैकादशांशप्रारंभः पत्राणि

श्रीगणेशायनमः ॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥ ॥विघ्नाद्रिभंगकुलिशाकृतिचारुशुंडादंडाग्र
धारितरदं द्विरदं द्रवक्रं॥ कर्णांतरालुसितराजितचामरौघसंवीजनप्रसृतदानफटंनमामि॥१॥ ॥
सूतउवाच॥ शृणुशौनकभूयोपिसंवादंपरमंशुभं॥जैगीषव्यस्यचमुनेःतारकारेःशुभास्पदं॥सहैभिर्मुनिभिः
विप्रशांभवैःशंभुसत्कथां॥२॥ त्वमतीवशिवेभक्तःशिवलिंगार्चनप्रियः॥शौनकउवाच॥ जैगीषव्यस्तारका
रिमपृच्छत्किंकथानकं॥त्वन्नोवदमहाभागसूतपौराणिकोत्तम॥ ३॥ भवभक्तोसिनितरांभस्मरुद्राक्ष
भूषण॥ त्वद्वाक्पंकजनिर्यद्दिमकरंदोपमाःकथाः॥४॥सहैभिर्मुनिभिःसूतमद्यित्वभ्रमरोधुना॥पातुमि
च्छतिनिःशंकंकृतांतहरसत्कथाः॥५॥ ॥सूतउवाच॥ ॥धन्यायूयंसदामान्याःमुनयःशांभवोत्तमाः
॥वदामिभवतांभूयोरहस्यंशैवमुत्तमं॥६॥दशाधर्मोर्थकथनंश्रुत्वापृच्छतिषण्मुखं॥जैगीषव्यःपुरायो
गीशिवभक्तोजितेंद्रियः॥प्रणम्याह्नतदास्कंदंप्रांजलिर्विनयान्वितः॥ जैगीषव्यउवाच॥ ॥नमोब्रह्म
ण्यपतयेसुब्रह्मण्यायतेनमः॥पंचास्यामलपाथोजमित्ररूपायतेनमः॥ ८॥अपर्णाहृदयानंदसंदो
हायामलात्मने॥शूरतारकसंहारशक्तिहस्तायतेनमः॥९॥प्रणवार्थमहासारप्रवणायाखिलात्मने॥
द्विजराजकलामौलिपादपंकजचेतसे॥१०॥देवसेनापतेतुभ्यंवल्लीपतयेनमः॥ केलीकुक्कुटबाहा
यकुमारायनमोनमः॥११॥गजाननानुजायायसर्वमंत्रात्मनेनमः॥शैवानंदरहस्याब्धिसोमधाम्नेनमो
नमः॥ १२॥ त्वत्तोवेदांतसारार्थोदशमांशःश्रुतोमया॥भस्मरुद्राक्षमाहिमातथापंचाक्षरस्यच॥१३॥रुद्र
स्यमहिमाचैवशिवलिंगार्चनेविधिः॥शिवधर्मस्यमाहिमाशिवनाम्नःफलंस्मृतं॥ १४॥ शिवभक्तस्यमहि

मामकं लक्षणमेव च॥ शिवद्रोहवतां पुंसां दुःखानि विविधानि च॥ १५॥ श्रुतो हि विस्तरेणैव गणैः सुरग
णैर्मया॥ पुनश्च श्रोतुमिच्छामि शांभोश्चान्यत्कथानकं॥ १६॥ यद्यप्यन्यत्सुगोप्यं स्याद्देवमम शंकरे॥ ॥
स चेत्थं मुनिनापृष्टः तुष्टः सेनापतिस्तदा॥ जैगीषव्यमुखांभोजं वीक्ष्य तं नाणयान्सुरान्॥ १७॥ षड्वक्त्रने
त्रभ्रमरैः पीपं बन्निव संभ्रमात्॥ तत्कानुत्वा चैव संतुष्टः चंद्रादय इवांबुधिः॥ १८॥ प्रावर्धत महासेनः पा
त्रं वीक्ष्यातुलप्रभं॥ जैगीषव्यं मुनिं शांतं जितषड्वैरिविक्रमं॥ १९॥ संस्मार देव्यै यत्प्रोक्तं महेशेन द
यालुना॥ कैलासे लास्यसदने मदनांतकरेण हि॥ २०॥ तदा शिवरहस्ये स्मिन् पूजाविधिविनिर्णयं॥
उवाच वीक्ष्य प्रसभं त्र्यक्षपादांबुजाश्रयः॥ २१॥ तद्वो वदामि सरसं संवादं श्रवणाद्भुतं॥ कुमारस्य मुनेस्तस्य
भवद्भ्यो ब्राह्मणोत्तमाः॥ २२॥ ॥ सुब्रह्मण्य उवाच॥ ॥ शृणुध्वं तां भवश्रेष्ठ रहस्यं श्रुतिसंमितं॥ पु
रा कैलासशिखरे सुखासीनं महेश्वरं॥ २३॥ रत्नसिंहासने दिव्ये वै द्रुमे मंडपोत्तमे॥ सायंतनाभ्रपटली
प्रभाधिकविराजिते॥ २४॥ शोभ्युभ्यस्तंभकुंभाग्रवषभ्याराजिते मुने॥ धूपदीपादिवितते गणवंदवि रा
जिते॥ २५॥ रम्यपुष्पवनापारगंधमेदुरदिङ्मुखे॥ वितानमच्छदपटपाटितांतरसुंदरे॥ २६॥ चंपका
शोकपुंनागसौगंधिकसुमारुते॥ प्रोत्फुल्लकेतकोद्दाममल्लीपंकजगंधिले॥ २७॥ नंदिभृंगिमहाका
लचंडभैरवसेविते॥ मयाद्विरदवक्त्रेण पार्श्वतः परिसेविते॥ २८॥ पप्रच्छ पार्वती कांतं नितांतं शांतवि
ग्रहं॥ कृतांजलिहरमाशास्यं वेदांतार्थैकगोचरं॥ २९॥ प्रणम्य प्रांजलिर्देवी भर्तुर्वक्त्रमुदैक्षत॥ उत्पला
भकटाक्षेण सरसाननपंकजा॥ ३०॥ सर्वेभ्यः प्रणवोदारजगच्चक्रप्रवर्तकः॥ इंगितज्ञस्तदा प्राह देवी

मानंदनिर्भरा॥३१॥ सरसेनकटाक्षेण कृपामूर्तिर्महेश्वर॥ ॥ ईश्वरउवाच॥ काचिवक्षास्तितेसुभ्रुः
निःशंकंमेवदाग्रनः॥३२॥ त्वंमेशक्तिःपरादेवित्वयाहंशक्तिमान्शिवे॥ त्वत्तेजसाजगद्भातिसदेवा
सुरमानुषं॥३३॥ रहस्यंवाप्रकाशंवायदामिममुदेत्वयि॥ त्वंमेशरीरार्धधिरुता वदमेत्वद्हृदिस्थितं॥
३४॥ ॥कुमारउवाच॥ ॥इतिशंभोर्वचः श्रुत्वागिरिजाहर्षनिर्भरा॥ समुद्यदश्रुपुलकाप्राहकामारि
मीश्वरी॥३५॥ गिरिजोवाच॥ ॥देवदेवमहादेवशरणागतवत्सल॥ स्वानंदाशिवाराशेकृपाराशेम
हेश्वर॥३६॥ शिवार्चनविधानंमेकालतिथ्यर्क्षकेनव॥ लिंगेभिषेकसंभारःफलपंचामृतैःकृत॥३७॥
पुष्पधूपादिदानेचदीपनैवेद्यकल्पनैः॥ धातुपात्रेनारनम्यंअर्घ्यतांबूलकल्पनं॥३८॥ नीत्यफलंना
रतम्यंचवदमेकरुणार्णव॥ ॥सूतउवाच॥ ॥इत्यपर्णावचः श्रुत्वासंपूर्णहृदयःशिवः॥ प्राहप्रमो
दभरितः दृष्ट्वातामद्रिकन्यकां॥३९॥ महादेवोमहानंदःपरानंदमहोदधिः॥ ॥ईश्वरउवाच॥
अयेसुगिरिकन्यकेनवसरोजराजाननं॥ त्रिलोकमुदभाद्दितःप्रभृतिपारसारंगतः॥४०॥ अनंतमहि
मास्पदंशिवरहस्यरत्नाकरंसुगोप्यमपिनह्यदेशिवगणेषुतुष्टिमदं॥४१॥ प्रकाशयमिदंभयवतेममहृ
दिप्ररूढंचिरंप्रतुष्टिदमिदंशिवविहितमर्वधर्मैरपि॥ नयागशतकोटिभिःविविधदानकोट्या
पिच॥ तुरंगगजगोगणेर्द्विजवरेषुदत्तेनकिं॥ सुमंत्रज्ञानजाप्यतोप्यखिलभूमिदानाधिकं॥४३॥
विमुक्तिदमिदंप्रियेममसदैवलिंगार्चनं॥ भक्तोमयदितुंगलिंगविहितानंगांगसंगोज्झितो॥ गंगा
तुंगतरंगचंचलमनःस्नापांतरंगच्युतः॥ भूयोभाउकभक्तिभावहृदयोभावोभवेपध्रुवेलिंगाच्चोंसुनि

षिक्तमुक्तहृदयोभक्तांसमुक्तिंगतः॥४५॥ ॥इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेप्रथमोध्यायः॥१॥
॥ ॥श्रीमहादेवायनमः॥ ॥श्रीपार्वत्युवाच॥ देवदेवमहादेववामदेवसनातनः॥विश्वरूपविरूपाक्षस
र्वेश्वरमहेश्वर॥सुखोपायमनोब्रूहिशिवधर्मंसनातनं॥विमुक्तिदंविरूपाक्षसर्वेषांभक्तिवर्धनं॥२॥ त
वप्रियकरंशंभोधर्मंसर्वस्वमुत्तमं॥सुगोप्यमपिमेब्रूहिशिवशंकरसर्वग॥३॥ भ्रांतस्यघोरसंसारेजन्म
मृत्युजरार्तिदे॥जरायुजांडजस्वेदभूमिजातेषुजंतुषु॥४॥ चराचरेषुजातस्यसुखदुःखाभिमानि
नः॥पुरुषस्यभवेभक्तिःकदाचिज्जायतेविभो॥५॥ तवप्रसादसंपन्नोयदाजंतुर्भविष्यति॥तदे
वलभतेभक्तिंततोमुक्तिंचविंदति॥६॥ कीटोवापिपतंगोवासुरोवापिनरोपिवा॥ब्राह्मणोवांत्य
जोवापितवभक्त्याविमुच्यते॥७॥ सर्वेषांमुक्तिदंधर्मंवदमेकरुणाकर॥सुब्रह्मण्यउवाच॥ ॥ए
वंदेव्यातदापृष्टोभगवान्परमेश्वरः॥कैलासनिलयोयोगीसर्वज्ञःसर्वभावनः॥८॥ पार्वत्यैप्राह
देवेशःसुखोपायंमहोदयं॥परमंसर्वधर्माणांशिवधर्मंमहामुने॥९॥श्रूयतामभिधास्यामिगणैःसु
रगणैर्मुने॥शिवेनकथितंदेव्यैदेवीभामाहसादरं॥१०॥ तद्वक्ष्यामिसुविस्तारंशिवप्रियकरंमुने॥शिव
धर्मंशिवप्रीतिकरणंकारणंनृणां॥११॥ सर्वेषांप्राणिनांविप्रसंसाराब्धेस्तुतारकं॥अज्ञानार्णवमग्ना
नांसर्वेषांप्राणिनामयं॥१२॥ संसारोदधिमग्नानांजन्ममृत्युजरावतां॥शिवधर्मोडुपःश्रीमानुत्तार
कउदाहृतः॥१३॥ स्वर्गकामप्रदाधर्मायज्ञाद्याःसकलाअपि॥महादानादयोधर्माःअन्नगोभूमि
पूर्वकाः॥१४॥ व्रतकृच्छ्रादिचरणाआश्रमश्रमदायकाः॥ इष्टापूर्तादयःसर्वेमोक्षव्यपातांतर्सुदाः॥

॥१५॥ बह्वायासप्रदां विप्र नैव मुक्तिप्रदायकाः॥ शिवधर्मोऽत्र विहितः शिवेनैव दयालुना॥१६॥ अज्ञान
ज्ञानिनां तुल्यो भक्तिमुक्तिप्रदायकः॥ सांसा ह्यल्पप्रीतिकरा मोक्षज्ञानैकसाधनाः॥१७॥ शिवधर्माः शि
वप्रोक्ताः शिवायै तेशिवाय च॥ तद्वक्ष्यामि मुनिश्रेष्ठ संवादं शिवयोर्वरं॥१८॥ ॥श्रीशिव उवाच॥ ॥
शृणु देवि मुने भद्रं सुखोपायं महोदयं॥ संसारे क्लिश्यतां नृणां मयाचोद्धारकः कृतः॥१९॥ शिवधर्मो
विशिष्टोऽत्र शिपिविष्ट पदाश्रयः॥ संसेव्योयं परो धर्मः शिवाख्यो यं शिवार्थिभिः॥२०॥ यः सेवंति परं
धर्मं ते कृतार्थानात्र संशयः॥ ग्रामे वा यदि वारण्ये जले वापि स्थलेपि वा॥२१॥ क्षेत्रे वा नगरे वापि कीक
टे वा जनार्दने॥ यत्र यत्र विद्यते लिंगं सर्वतीर्थानि तत्र वै॥२२॥ यत्र वा रमते चित्तं तत्रैव शिवमर्चयेत्॥
एककालं द्विकालं वा त्रिकालं नित्यमेव वा॥२३॥ ये चेर्चयंति महादेवं विज्ञेयास्ते गणाः शिवे॥ कीर्त
यिष्यंति मामीशे सकृदप्यातुयेनराः॥२४॥ सर्वपापैर्विमुच्यंते कोटिजन्मकृतैरपि॥ ये
पूजयंति लिंगं मे त्रिकालं बिल्वपल्लवैः॥२५॥ ये पश्यंति सकृद्देवि शिवलिंगं ममाश्रयं॥
भूभागसंचाररुद्राः ते कृतार्था न संशयः॥२६॥ प्रातः संगवमध्याह्ने प्रदोषे वापि शंकरं॥
ये पश्यंत्यर्चयंतो वा नरएव गणपुंगवाः॥२७॥ अस्मिन्कैलाससदने वस्तु योग्याभवंति हि॥
यः क्षणं वा मुहूर्तं वा शिवं मायो विचिंतयेत्॥ सर्वोपि दिवसो वंध्यो भवत्येव गिरींद्रजे॥ दुर्लभं प्राप्य
मानुष्यं ये र्चयंति सदा शिवं॥२९॥ तेषां हि सफलं जन्म भस्मरुद्राक्षधारिणां॥ शिवभक्तिपरा ये
तु शिवप्रणतमस्तकाः॥३०॥ शिवलोके क्षणादेवि वीक्षणाद्या भवंति ते॥ शिवपूजाकरकराः शि

वालयगतांघ्रयः॥ ३१॥ शिवार्पितलसन्घ्राणाः नैवेद्यास्वादजिह्वकाः॥ शिवध्यानैकहृदयाः नतेदुः
खस्यभाजनं॥ ३२॥ तेषांहिसफलंजन्म कृतार्थाः त्वांभवोत्तमाः॥ भवनानिमनोज्ञानिमंचाश्चाभरणं
स्त्रियः॥ ३३॥ धनंचादितृपर्यंतं ममपूजाविधेः फलं॥ तुरंगवरमातंगगोमहिष्यादिकोटयः॥ ३४॥
नद्दरिवरवक्षाश्चनित्यंसंनिहिताः शिवे॥ येवांछंतिमाहाभोगं राज्यंचत्रिदशालयं॥ ३५॥ ब्रह्मत्वं
वायविष्णुत्वमिंद्रत्वंचापिपार्थति॥ तेर्चयंतिसदाकालं ममैवचरणांबुजं॥ ३६॥ सौभाग्यंकांतिम
द्रूपंशौर्यंत्यागः प्रभावना॥ यशश्चजगतिख्यातिः शिवमर्चयतोभवेत्॥ ३७॥ देवासुरेषुमुनि
षुयद्यदुत्कृष्टमीश्वरि॥ तत्सर्वंमत्प्रसादेन लब्धमीशेशिवार्चनात्॥ ३८॥ ममैवपूजयाविष्णु
पालयेज्जगतीत्रयं॥ ममैवपूजयाब्रह्मा जगत्सर्वंकरोत्यपि॥ ३९॥ ममैवपूजयारुद्रोअंतः
संहरतेजगत्॥ ममैवपूजयाशक्रः पालयत्यमरावतीं॥ ४०॥ ममैवपूजयादेवादिक्पालवरुणा
र्यमाः॥ वसवोद्वादशादित्यामरुतआश्विनावपि॥ ४१॥ रुद्राएकादशगणाश्चयवोग्रहनायकाः॥
मनवोमुनयः सिद्धाः गंधर्वागरुडाः खगाः॥ ४२॥ यक्षाः किंपुरुषानागानपायेकालसंभवाः॥ युगेयुगे
प्रजायाः स्ताः सर्वेमत्पूजयावराः॥ ४३॥ भांत्येवप्रधानवः सर्वेषांनिवानाः सदाशिवे॥ वर्धंतिमेघाः स
ततंयांतिसिद्धिकायनयोजगत्॥ ४४॥ ज्योतींष्यपिप्रकाशंते नगानागाश्चभूधराः॥ शेषोप्यधोधशिरसाधु
वंधत्तेशिवार्चनात्॥ ४५॥ स्वांशुभिः पोषयत्येवसोमोप्योषधिमंडलं॥ नद्यः समुद्राश्चशिवेनोद्वेलाः
संवहंत्यपि॥ ४६॥ किंशिवेबहुनोक्तेन सर्वंमत्पूजयास्थिरं॥ चरंवाप्यचरंवाद्यजगच्चक्रंप्रवर्तते॥

॥४७॥ नारुद्रः संस्मरेद्रुद्रं नारुद्रो रुद्रमर्चयेत्॥ नारुद्रः कीर्तयेद्रुद्रं नारुद्रो रुद्रमाप्नुयात्॥४८॥
संपर्कात्कौतुकाल्लोभात्भयाद्वापि च संस्मरेत्॥ कीर्तयेदर्चयेद्यो मां स मे प्रियतरो गणः॥४९॥ शिव
धर्मस्य सारो यं शिवभक्तिः सुनिश्चला॥ साष्टांगा मयैवोक्ता कार्या नित्यं विशेषतः॥५०॥ मद्भक्तजनवा
त्सल्यं पूजयाश्चानुमोदनं॥ स्वयमभ्यर्चनं भक्त्या ममार्थे चांगचेष्टनं॥५१॥ मत्कथाश्रवणे भक्तिः स्व
रनेत्रे भ्रुविक्रिया॥ ममानुस्मरणं नित्यं यश्च मां नोपजीवति॥५२॥ भक्तिरष्टविधा ह्येषा यस्मिन्म्लेच्छे
पि वर्तते॥ स ज्ञो भवेन्मुनिश्रेष्ठः स यतिः स च पंडितः॥ न मे प्रियश्चतुर्वेदी मत्र यान्यपि शंकरि॥ ब्रा
ह्मणो वांत्यजो वापि मद्भक्तः श्वपचो वरः॥५४॥ तस्मै देयं ततो ग्राह्यं स हि पूज्यो यथा ह्यहं॥ पत्रं पु
ष्पं फलं तोयं यो मे भक्त्या प्रयच्छति॥ तस्याहं न प्रणश्यामि स च मे न प्रणश्यति॥ नार्चयेद्यः सदा
त्मस्थं यो मां सम्यक्समास्थितः॥५६॥ स मां पर्वतदुर्गेषु मार्गमाणो न पश्यति॥ यो मां सर्वगतं पश्येत्स
र्वं च मयि पश्यति॥५७॥ तस्याहं नित्यमात्मस्थः स च नित्यं मयि स्थितः॥ सुदुर्लभा शिवे भक्तिः दुर्ल
भं च शिवार्चनं॥५८॥ सुदुर्लभं शिवे दानं शिवहोमश्च दुर्लभः॥ सुदुर्लभं शिवज्ञानं तदभ्यासोति
दुर्लभः॥५९॥ सुदुर्लभतरं ज्ञेयं जपध्यानं शिवात्मकं॥ अत्यंतदुर्लभं देवि शिवलिंगे शिवार्चनं॥
॥६०॥ सुदुर्लभं तु तद्भक्तिः तदभ्यासोतिदुर्लभः॥ सुदुर्लभमिदं ज्ञात्वा शिवभक्तिं समाश्रयेत्॥६१॥
लाभस्तेषां जयस्तेषां पशास्तेषां पदे पदे॥ ये शिवं शरणं प्राप्ताः शिवार्चनपरायणाः॥६२॥ येषां
दिवा च रात्रौ च नित्यं शिवगतात्मनिः॥ नमस्कारादिसंयुक्तं शिवायेत्यक्षरत्रयं॥६३॥ जिह्वाग्रेव

वर्तनेयस्यसफलंतस्यजीवितं॥यदंगंभस्मसंयुक्तंत्रिपुंड्रललितालकं॥६६॥रुद्राक्षमालाभरणंचंद्रचू
डारूपंशिवे॥जानिनात्मद्रुहायेनभगवान्नसमर्चितः॥सचिरंसंचरंत्यस्मिन्संसारेदुःखसागरे॥दुर्ल
भंप्राप्यमानुष्यंनमूकोबधिरोभवेत्॥यदिसर्वांगनासिद्धिःचिप्रत्वंचनरेखुच॥इहामुत्रसुखप्राप्त्ये
शिवभक्तिंसमाश्रयेत्॥६७॥दुर्लभादुर्लभादेविममभक्तिःसुदुर्लभा॥मुक्तिदामोक्षदात्रीचपशु
पाशनिकृंतनी॥६८॥ ॥ईश्वरउवाच॥ ॥येकालकालकलनेननयंतिकालंशीलेनफालनयनार्चं
नतस्त्रिकालं॥धन्यास्तएवजगतीतलचारिरुद्राविद्राविताघनिचयाःशुचयोभवानि॥६९॥क्षणं
क्षीणाघौघःकलयतिकृतांतांतकमुमेनिरातंकंशांतोभवभयजतांतोमुदुरहो॥लनुःशेषेशोषेभ
वतिविपुलेचासुषिरयोविशेषोनोभाग्येप्रथिलगतौक्षोणिवलये॥७०॥वैराग्यभाग्यरहितस्यभवो
रुदुःखंसंजानतेजनिविनाशनलोकजालं॥आलोकयन्नघकुलानलशीलनेनआरोग्यभाग्यरहि
ताःप्रचलंत्यभाग्याः॥७१॥ ॥इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेद्वितीयोध्यायः॥२॥
॥श्रीमहादेवायनमः॥ ॥पार्वत्युवाच॥ ॥लिंगार्चनविधिंपुण्यंश्रोतुमिच्छामिशंकर॥त्वत्प्रसादादशेषे
णभगवन्नचंद्रशेखर॥यत्पुण्यंस्थापितेलिंगेरूनेयच्चशिवालये॥मृदाविष्टकपाषाणसुधाभिःपरि
कल्पिते॥२॥लिंगबेरप्रतिष्ठायांचरस्थावरपूजने॥संमार्जनेनयत्पुण्यंयत्पुण्यमुपलेपने॥३॥
नीराजनौषधीबीजस्नानमंगलवादनैः॥वाहनोत्सवदीपानांप्रदानेवाकियत्फलं॥४॥यत्पुण्य
मर्घ्यदानेनतोयस्नानेनयद्भवेत्॥क्षीरस्नानेनयत्पुण्यंरवंऽदध्नामहेश्वर॥५॥घृतस्नानेनयत्पुण्यं

शर्कराभिर्महेश्वर॥ मधुस्नानेन यत्पुण्यं तत्प्राप्नुं ब्रूहि सुसारनः॥ ६॥ पंचगव्यवरस्नाने तैलाभ्यंगेन च
द्रवेन॥ गंधचंदनतोयैश्च कर्पूरागरुमिश्रितैः॥ ७॥ नारिकेलेक्षु जंबीर मोचाम्रवर फानसैः॥ तत्त
द्रसवरैः शंभोर्ष्याभिषेके फलं च किं॥ ८॥ स्वर्णरत्नादितोयैश्च पुष्पमिश्रांबुभिः शिव॥ कर्पूरागरुतो
यैश्च वस्त्रपूतैश्च वारिभिः॥ ९॥ सहस्रधाराकलशैः शतधाराघटैस्तथा॥ सहस्रशतशंखानां स्न
पनैः पुण्यवारिभिः॥ १०॥ नदीनदसमुद्राणां वापीकूपोदकैर्जलैः॥ गवांशृंगोदकस्नाने कुशोद
कविशोधने॥ ११॥ यवगोधूमपिष्टानां लेपनस्नपने च किं॥ विलेपनेश्च गंधाद्यैर्विलिप्तेन च य
द्भवेत्॥ १२॥ सुवर्णरौप्यताम्रादिकांस्यपैत्तलमार्त्तिकैः॥ दारवाश्ममयैः पात्रैः तथा पर्णपुटै
रपि॥ १३॥ पात्रकल्पनतो वापि किं फलं स्यान्महेश्वर॥ श्रीखंडागरुकस्तूरीमिश्रगंधविले
पने॥ १४॥ यक्षकर्दमजालेन फलं स्याच्छिवपूजने॥ हेमकार्पासकौशेयवस्त्रदाने च यत्फ
लं॥ १५॥ घृतनैलवराणां च कर्पूरवरदीपनः॥ फलं किं यन्महादेव धूपेषु परमेश्वर॥ १६॥ सां
म्राणि गुग्गुलरुनेबिल्वत्वक् परिकल्पिते॥ पंचवर्णकापि ष्टैश्च रंगवल्या च किं फलं॥ १७॥
किं फलं स्याच्छिवेदने वद शंकर सर्वग॥ मुक्तपुष्पार्चने यच्च मालाभिः लिंगपूरणे॥ १८॥ पुष्प
मंटपिकायाश्च पुष्पमालावलंबने॥ तथा पुष्पविशेषे च ग्राम्यारण्योद्भवेषु च॥ १९॥ किं फ
लं श्रीमहादेव बिल्वैरभ्यर्चने कृते॥ नवरत्नादिपुष्पेषु सुवर्णरौप्यसुमेषु च॥ २०॥ नवधा
न्यमहापूजाफलं किं या महेश्वर॥ अन्नाभिषेके यत्पुण्यं अवच्छिन्नांबुधारया॥ २१॥ अभि

खेके कियत्पुण्यं फलं किंवा महेश्वर ॥ उद्वर्तनानलस्नाने को यो न च सुवारिणा ॥२२॥ नाना
रत्नादिमालानां प्रदाने च महाफलं ॥ रत्नगोलकदाने वा रत्नवर्णे रौप्यविनिर्मिते ॥२३॥ सह
स्रशानदीपानां दर्शने च किं यत्फलं ॥ यवगोधूमशाल्यन्नभक्ष्यभोज्यप्रदानतः ॥२४॥
शाकपूपादिदाने च फलकं दनिवेदने ॥ छत्रदाने महादेव चामराणां प्रदानतः ॥२५॥ ता
लवृन्तमयूराच्छपक्षनो लभ्यनिर्मिते ॥ चित्रध्वजपताकानां दर्पणानां च दर्शने ॥२६॥ तांबू
लदानेन यत्पुण्यं वादित्राणां प्रदानतः ॥ घंटावाद्यत्रशंखानां काहलानां च वादने ॥२७॥ वेणु
वीणामृदंगानां दुंदुभीनां रवेषु च ॥ स्त्रीणां संगीतनाट्येन नृत्तेन च फलं कियत् ॥२८॥ रथो
त्सवादिकरणे नगरांतपरिभ्रमैः ॥ कियत्फलं महादेव महोत्सवहदानतः ॥२९॥ वित्ता
नदाने यत्पुण्यं बलिहोमक्रियासु किं ॥ गवाश्वभृत्यनागानां भूमिदाने महेश्वरे ॥३०॥
ग्रामखेटपुराणां च देशदाने च यत्फलं ॥ नीलोत्पलसहस्राणां मालादाने फलं च किं ॥३१॥
स्वयं माल्योपहारेण पुंसां पुण्यं च यद्भवेत् ॥ तन्मालनापहारेण पुण्यापुण्यं च यद्भवेत् ॥३२॥
प्रातःकालार्चने किं वा मध्याह्ने वा फलं कियत् ॥ सायनने प्रदोषे वा निशीथे वा महेश्वर ॥
३३॥ भूतासु सोमवारेषु अष्टमीषु च पर्वसु ॥ शिवरात्र्यां महादेव पूजया किं फलं भवेत् ॥३४॥ ति
थिनक्षत्रपूजायां मासि मासि समर्चने च किं ॥ मासि मासि च पूजासु द्रव्ये लिंगेषु किं फलं ॥३५॥ प्रदक्षि
णानमस्कारैस्तु नैवाद्य किं पद्भवेत् ॥ शिवक्षेत्रे नदीतीरे गोष्ठे वा वनपर्वते ॥ बिल्वमूलेषु पूजायां कि

यत्फलमुदीरितं॥ घृतकंबलपूजाभिः पवित्रारोपणेऽपि वै॥ ३७॥ श्रावणे कार्त्तिके वापि पूजया किं फलं
भवेत्॥ धनुर्मासेषु षष्टिप्रीत्या पूजया किं फलं भवेत्॥ ३८॥ ग्रहणे सोमसूर्याणां विषुवायनयोरपि॥ सं
क्रांतौ च व्यतीपाते महापूजाप्रकल्पने॥ स्नानाभ्यंगे किं फलं स्यादृदमे करुणाकर॥ शिवाय कामकराणां च
पुष्पार्थं शिवपूजने॥ ४०॥ किं बिल्ववनकर्तॄणां वापीकूपक्रियासु च॥ शिवालयेषु विशेषेण शिवक्षेत्रेषु
वा पथि॥ ४१॥ छायावृक्षाग्रहाराणां करणं शांभवेषु च॥ वेदानां पठने वापि ब्रह्मचारिषु पोषणे॥ ४२॥
यतीनामन्नपानादि मठे पकरणानि च॥ नमस्कारं तथा तेषां प्रत्युत्थानाभिवादने॥ ४३॥ भिक्षां प्रति
श्रयं वस्त्रं दत्वा च शिवयोगिषु॥ सर्वेवर्णे शांभवेषु दत्वान्नं लभते फलं॥ ४४॥ शिवप्रीत्यर्थमेवेह मठा
नां करणे च किं॥ शिवभक्तार्चने किं स्यात्फलं मे वद शंकर॥ ४५॥ तत्सर्वं कृपया पुण्यं सुसूक्ष्ममपि तद्व
द॥ सुगोप्यमपि देवेश ह्यनुग्राह्यनामपि॥ ४६॥ नाहं वदाम्यभक्तेषु सत्यं सत्यं महेश्वर॥ अस्मिन्के
लासस दने मदनांतक राम्प्रिये॥ ४७॥ शपामि शिवपादाब्जैः सत्यं नात्र संशयः॥ देव्युवाच॥ ॥
एवं ये शिवधर्मसारमतुलं कुर्वंति तेषां फलं किं वा स्यात्परमेश्वर त्रिभुवने तन्मे वदे वादरात्॥ एवं त्व
त्पदपूजनैकमतयो भक्तास्त एव ध्रुवं॥ पुण्यं चाद्य दरिद्रकेषु च कथं प्राप्नोति तच्छंकर॥ ४८॥ स्कंद
उवाच॥ ॥ इत्थं पार्वतनंदिनीप्रियवचोवीचीभिराप्लावितः॥ सद्योहृद्यमभेद्यमद्भुतमहाधर्मेषु सारं

शिवः॥ प्राहानंदभरेण भावितमहानंदैकसारादरो मोचाधिकसुधाधरीकृतमहावाचा नगेंद्रात्मजां॥
॥ ४९॥ ॥ इति श्रीशिवरहस्ये महादेवाख्ये एकादशसाहस्र्यां शिवगौरीसंवादे शिवधर्मप्रश्नो नाम तृतीयोऽध्यायः॥ ३॥

९ तु

श्रीमहादेवायनमः॥ श्रीईश्वरउवाच॥ ॥शृणुपर्वतराजेंद्र तनयेगोप्यमप्यथा।प्रकाश्यंत्वयिमेस
त्यंत्वतःप्रियतरान्नमे॥१॥तेनतेचाखिलंवक्ष्ये शृणुष्वेकाग्रमानसा॥पूर्वंमेकार्णवे घोरेनष्टेस्था
वरजंगमे॥२॥विवादःसुमहानासीद्ब्रह्मविष्णोःपरस्परं॥अहंकर्ताह्यहंकर्तानमत्तोन्योजग
त्पितुः॥३॥एवमाहहरिंब्रह्माब्रह्माणंचहरिस्तथा॥तयोर्दर्पापहारायप्रबोधार्थंचदेवयोः॥
४॥ मध्येसमभवल्लिंगमैश्वरंतेजसंपरं॥ज्वालामालासहस्राढ्यमप्रमेयमनूपमं॥५॥ योजना
नायुतविस्तीर्णंस्थितंतत्रमलांभसि॥ज्वालाभिर्मोहितौतस्यलिंगस्यसुरसत्तमौ॥६॥तदावि
स्मयमापन्नोपश्यंताववमराधिपो॥गताऊर्ध्वमधस्तस्यसंप्रधार्यपरस्परं॥७॥अधोहंसंग
तोविष्णुस्तादूर्ध्वंपितामहः॥अदृष्ट्वांतमधश्चोर्ध्वंतौलमेत्यपरस्परं॥८॥कृतांजलिपुटौभू
त्वालिंगंतुष्टुवुस्तदा॥ ब्रह्मविष्णूऊचतुः॥ ॥अनादिदेवदेवेशविश्वेश्वरमहेश्वर॥सर्वज्ञ
ज्ञानविज्ञानप्रदानेशनमोस्तुते॥ अनेककांतिसंपन्नअनंतासनसंस्थित॥अनंतशक्तिसंभो
गपरमेशानमोस्तुते॥१०॥परात्परतरातीतउत्पत्तिस्थितिकारण॥सर्वार्थसाधनोपायविश्वेश्व
रनमोस्तुते॥११॥बहुरूपमहारूपसर्वरूपोनमोत्तम॥पशुपाशार्णवातीतवरारोहनमोस्तु
ते॥१२॥स्वभावनिर्मलाभोगसर्वस्वामिन्महेश्वर॥योगयोगिन्महायोगिन्योगेश्वरनमोस्तु
ते॥१३॥निरंजननिराधारस्वाधारनिरुपप्लव॥प्रसन्नपरमेशानयोगेश्वरनमोस्तुते॥१४॥जि
ह्वाचपलभावेनयदिदंगदितंमया॥तत्सर्वंनयमनोपम्यकस्तेस्तौतिगुणार्णवं॥१५॥ नमस्तेना

मलिंगायशिवलिंगायतेनमः॥ नमस्तेगूढलिंगायपरलिंगायभोगिने॥१६॥ नमस्तेज्योतिर्लिंगाय
देवलिंगायलिंगिने॥ नमस्तेसूक्ष्मलिंगायबुद्धिलिंगायबुद्धये॥१७॥ नमः पर्वतलिंगाय भावलिं
गायतेनमः॥ जगत्कारणलिंगायजगतांपतयेनमः॥१८॥ आवयोः पतयेचैवपतीनांपतयेनमः॥
सर्वेषांपतयेचैवदेवानांपतयेनमः॥१९॥ ज्ञानीनांपतयेचैवमोक्षाणांपतयेनमः॥ जनानांपतये
चैवमोक्षाणांपतयेनमः॥२०॥ जनानांपतयेचैवधर्माणांपतयेनमः॥२१॥ लिंगोत्पत्तिस्तवंपु
ण्यंयः शृणोतिनरः सदा॥ नोत्पद्यतेतिसंसारेस्थानमाप्नोतिशाश्वतं॥२२॥ तस्मात्सर्वप्रयत्नेन
शृणुयाद्वाचयेत्तथा॥ पापकंचुकमुत्सृज्यप्राप्नोतिपरसंपदं॥२३॥ एवंस्तुत्वामहादेवंप्रण
म्यशिरसाप्रभुं॥ ब्रह्मविष्णुसमापन्नौभक्त्यापरमयायुतौ॥२४॥ लिंगमध्येपरंलिंगंस्थितंमा
देशसंमितं॥ समादिश्लोत्रसंपन्नोदृष्टवंतौशिवात्मकं॥२५॥ नैवकांचनरौप्यंवाभूस्फटिकमौक्तिकं
॥लक्षमात्रंस्थितंशांतंकेवलंतच्छिवात्मकं॥२६॥ तयोस्तुष्टोमहादेवः प्रदायवरमुत्तमं॥ कारणात्त
मनुज्ञायतत्रैवांतरधीयत॥२७॥ तदाप्रभृतिब्रह्माद्याः प्रतिष्ठाप्यसुरासुराः॥ तल्लिंगानुकृतिंलिं
गंपूजयेयुस्तपोधनाः॥२८॥ परंशुध्रशरीरंचलिंगक्षेत्रमनादिमत्॥ यदाद्यमेश्वरंतेजः तल्लिंगं
पंचसंज्ञितं॥२९॥ कल्पांतेनस्यलिंगस्यलीयतेसर्वदेवताः॥ दक्षिणेलीयतेब्रह्मावामतस्तुजना
र्दनः॥३०॥ हृदयेचैवगायत्रीसर्ववेदेवानमोनमः॥ मूर्ध्निलीयंतिवेदाःषडंगापदक्रमाः॥३१॥
जठरेलीयतेसर्वंजगत्स्थावरजंगमं॥ उत्पद्यतेपुनस्तस्माद्ब्रह्मादिसचराचरं॥३२॥ आकाशं

लिंगमित्याहुः पृथिवी तस्य पीठिका ॥ आलयः सर्वभूतानां लयनाल्लिंगमुच्यते ॥ तस्माल्लिंगं प्र
तिष्ठाप्य सर्वदेवभवोद्भवं ॥ स्थापितं तेन सर्वस्य पूजितं च न संशयः ॥ कृतांजलिपुटो विष्णुः ब्रह्मा
चापि विशेषतः ॥ पूर्वं लिंगं समभ्यर्च्य पश्चात्कर्माणि चक्रतुः ॥ ३५ ॥ ब्रह्मा ब्रह्माक्षरैर्दिव्यैः लिं
गं पूजयते सदा ॥ गंधपुष्पादिभिर्नित्यं विष्णुः पूजयते शिवं ॥ ब्रह्मा शैलमयं भक्त्या लिंगं पूजय
ते सदा ॥ तस्य संपूजनाद्देव प्राप्तं ब्रह्मत्वमुत्तमं ॥ ३७ ॥ इंद्रनीलमयं लिंगं विष्णुरर्चयते सदा ॥
विष्णुत्वं प्राप्तवांस्तेन सोऽद्भुतं कं सनातनं ॥ ३८ ॥ शक्रोपि देवदेवस्य लिंगं मणिमयं शुभं ॥
नित्यमर्चयते भक्त्या तेन शक्रत्वमाप्तवान् ॥ ३९ ॥ लिंगं हैममयं कांतं धनदोऽर्चयते सदा ॥
तेनासौ धनदो देवो धनदत्वमवाप्तवान् ॥ ४० ॥ विश्वेदेवा महात्मानो रौप्यं लिंगमयं हरं ॥
अर्चंति विधिवत्तेन विश्वेदेवत्वमाप्नुयात् ॥ ४१ ॥ वायुः पूजयते नित्यं लिंगं पित्तलसंभवं ॥
वायुत्वं तेन संप्राप्तं सर्वप्राणिशरीरगं ॥ वसवः कांस्यकं लिंगं पूजयंति विधानतः ॥ प्राप्ताने
न महात्मानो वसुत्वं सुमहोदयं ॥ अश्विनौ पार्थिवं लिंगं पूजयंतौ विधानतः ॥ तेन ताव्श्वि
नौ देवौ देवानां चभिषग्वरौ ॥ ४३ ॥ स्फाटिकं निर्मलं लिंगं वरुणोर्चयते सदा ॥ तेन तद्वरुण
त्वं हि प्राप्तवान्दिशि तिष्ठतां ॥ ४४ ॥ लिंगमन्नमयं देवि हव्यवाहः यजति स्वयं ॥ अग्नित्वं प्राप्तवा
न्स्तेन तेजोरूपगुणान्वितं ॥ ४५ ॥ ताम्रलिंगं सदा कालं भक्त्या देवो दिवाकरः ॥ त्रिकालं
जते तेन प्राप्तं सूर्यत्वमुत्तमं ॥ ४६ ॥ मुक्ताफलमयं लिंगं सोमः पूजयते सदा ॥ तेन सोमत्वमा

पन्नः सर्वे कांतशरीरभ्भृत्॥ ४७॥ प्रवालकमयं लिंगं नागाः संपूजयंत्यपि॥ तेन नागास्तु भोगाढ्या पाताले नित्यमास्थिताः॥ ४८॥ कृष्णायसमयं लिंगं पूजयंति सुरोत्तमाः॥ राक्षसा दैत्यनाथाश्च तेन ते मित्तविक्रमाः॥ ४९॥ त्रपुलीसमयं लिंगं पिशाचाः पूजयंति हि॥ गंधर्वाप्सरसो यक्षा यातुधा नामहेश्वरि॥ ५०॥ वज्रवैडूर्यगोमेदं पुष्परागोद्भवानि च॥ लिंगानि पूजयंत्येव भक्त्या सर्वेश्वरस्य हि॥ ५१॥ तेन त ऋद्धिबलोपेताः प्राप्तास्ते परमं पदं॥ त्रैलोह्यिकं महालिंगं यजंते गुह्यकाः सदा॥ ५२॥ तेन भोगबलोपेताः प्रयांति परमं पदं॥ वन्यदारूमयं लिंगं यजंते मानरः सदा॥ ॥५३॥ मानत्वं प्राप्य नाः सर्वाः प्रयांत्येव महेश्वरं॥ मुनयो मनवो यक्षा रक्षोरगमरुद्गणाः॥ ५४॥ देवा दैत्याः खगंधर्वा विद्याधरमहोरगाः॥ पूजयंति शिवे लिंगे मामीशं देवनायकं॥ ५५॥ सर्वो लिंगमयो लोकः सर्वो लिंगे प्रतिष्ठितः॥ तस्मात्संपूजयेल्लिंगं यदिच्छेत्सिद्धिमात्मनः॥ ५६॥ लिंगे त्वया हं देवेशि सर्वदा संस्थितो ह्यहं॥ अनुग्रहाय लोकानां तथा लिंगे प्रपूजयेत्॥ ५७॥ यो न पूजयेल्लिंगे मामीशं भुवनेश्वरि॥ नासौ स्वर्गस्य मोक्षस्य नैव राजस्य भाजनं॥ ५८॥ तस्मादेकमनादेवि यावज्जीवं प्रतिज्ञया॥ अर्चयेत सदा लिंगे मामीशं भुवनेश्वरि॥ ५९॥ वरं जीवपरिछेदः स्वशिरः छेदनं वरं॥ न त्वनभ्यर्च्य भुंजीयाद्भगवंतं महेश्वरं॥ ६०॥ मानुषेषूपपद्यैवं लभेद्दुर्गपात्यतां॥ देवि लिंगार्चनात्पुण्यमधिकं नास्ति किंचन॥ ६१॥ इति विज्ञाय यत्नेन पूजनीयः सदा शिवः॥ नास्ति लिंगार्चनसमं तपो वा गिरिकन्यके॥ ६२॥ तपोन्यत्क्षरते सर्वममुत्रफलभोग

मः।। नलिंगार्चनपुण्यस्यसयोन्यास्तिगिरिंद्रजे।।६३।। वर्धनेभक्तिभावेनअल्पमल्पंननःकृतं।।
योवालिंगार्चनेद्वेष्टिधिकृधिकृनस्यकुमानसं।।६४।। सखरोत्पन्नरथस्याद्धात्मगोपिसचां
त्यजः।। तादृशंनुसकृदृष्ट्वासचासाजलमाविशेत्।।६५।। नरोनरकगामीस्यात्तत्पसंभाष
णादपि।। महेश्वरंमहादेविपेद्विषंतिमहीतले।।६६।। नेकृतघ्नाभवंतीहयेनभक्तामहेश्वर।।
रुद्रीपं३समुद्भूताब्राह्मणारुद्रदेवताः।।६७।। तस्माद्रुद्रार्चनंश्रेष्ठंब्राह्मणानांमहेश्वरि।।त
स्माल्लिंगार्चनेसर्वैः कार्यंवर्णाश्रमैरपि।।६८।। यस्मात्सर्वेप्रभुंजंतेयुगानिदेवोमहेश्वरः।।त
स्मात्सर्वप्रयत्नेनशिवमेवसमाश्रयेत्।। ।। सागराणांक्षयोस्त्येवक्षीयतेहिमवानपि।।
६९।।रुद्रार्चनजपुण्यंचक्षयोनास्त्येववरांकरि।।एष्टव्याबहवःपुत्राःबहवःपुत्राःसर्वेलिंगा
र्चकाःसदा।।७०।। यद्येकोममलिंगार्चायेकरिष्यंतिभूतले।। समुद्धरंतितेगोत्रंरज्जुःकूपा
त्घटंयथा।।७१।। समुत्थत्यनपाद्यंतेकुलानामेकविंशतिः।।शिवत्वंयांतितेक्षिप्रंधर्माध
र्मविवर्जिताः।।७२।। ।।ईश्वरउवाच।। ।।लिंगोत्पत्तिस्तवमिदमुमेयःशृणोतीहभक्त्या
तस्यापारमहाघसंघनिचयंसद्योविनाशंव्रजेत्।।लिंगस्थापनपुण्यमप्यतितरांसंप्राप्य
गाणत्वमप्यंतेयातिममाद्रिराजशिखरंसत्यंवदाम्यद्रिजे।।७३।। ।।इतिश्रीशिवरहस्ये
महादेवाख्येएकादशांशेशिवगौरीसंवादेलिंगोत्पत्तिस्तवोनामचतुर्थोध्यायः।।४।। ।।
श्रीमहादेवायनमः।। ।।श्रीस्कंदउवाच।। ।।एवंदेव्यातदापृष्टोमहादेवोभ्युवाचतां।।लिंग

प्रतिष्ठासुविधिं देव्यै प्रोवाच शंकरः॥ १॥ तत्तेहं संप्रवक्ष्यामि समाहितमना शृणु॥ ॥जैगीषव्य
उवाच॥ ॥ तत्कथं तारकारातेर्देव्यै प्रोवाच शंकरः॥ २॥ लिंगप्रतिष्ठानविधिं तन्मे वद विशेष
तः॥ सुरेश्वरगणाराध्यं देव्यश्रोतुमुत्कंठितमनः॥ ३॥ ॥सूत उवाच॥ ॥ तस्य स्कंदो मुनिः श्रुत्वा वच
नं प्रत्यभाषत॥ ॥श्रीस्कंद उवाच॥ पुरा कैलासशिखरे सुखासीनं जगत्प्रभुं॥ पार्वती प्रणता
ऽऽह महादेवं घृणानिधिं॥ ४॥ ॥पार्वत्युवाच॥ ॥ देवदेव महादेव महाकारुणिकोत्तम॥ लिं
गप्रतिष्ठामहिमां वद मे परमेश्वर॥ ५॥ यत्पुण्यं स्थापिते लिंगे स्थावरे वाथ जंगमे॥ किं तत्पु
ण्यफलं शंभो कस्मिन्काले विशेषतः॥ ६॥ कोधिकारी विशेषेण आगमे वैदिकेपि वा॥ के
षु स्थानेषु भगवन्प्रतिष्ठासु फलप्रदा॥ ७॥ प्रसीद दयया शंभो हृत्स्थं वक्तुमर्हसि॥
श्रीमहादेव उवाच॥ ॥शृणु पद्मपलाशाक्षि प्रतिष्ठाविधिमुत्तमं॥ शिवलिंगस्य मे देवि जंगमस्थावर
स्य च॥ ८॥ शिवक्षेत्रे गिरौ नद्यां वने गंगातटे शुभे॥ हिमालये च केदारे वाराणस्यां महेश्वरि॥ ९॥
गंगाब्धिसंगमे वापि वेधनाथे कुरुस्थले॥ तथा भद्रवटे पुण्ये रुद्रकोटौ प्रभासके॥ १०॥ पुष्करे च
तथोंकारे महाकाले त्रिशूलके॥ पिंडारके त्र्यंबके वा प्रतिष्ठा नर्चविंध्यके॥ ११॥ श्रीशैले दंडकार
ण्ये गोकर्णे वा महेश्वरि॥ नदीनां चैव तीरेषु लिंगं स्थाप्य सुपुण्यभाक्॥ १२॥ कृष्णावेण्या पयोष्ण्या
श्च गोदावर्यां महेश्वरि॥ तुंगायाश्चाथ पंपाया वेत्रवत्यां तथा तटे॥ १३॥ क्षिप्रायां नर्मदायाश्च गंगा
यमुनयोस्तटे॥ नीरायां भीमरथ्यायाश्च मेपवत्यां महेश्वरि॥ १४॥ कावेरजायास्तीरेषु क्षेत्रेष्वेतेषु

क्षेत्रेष्वेतेषु शंकरि॥ श्रीकंठे च तृणावर्ते मात्तरत्नगिरौ तथा॥१५॥ जंबुकेशे पंचनदे कुंभघोणे र्जु
नेतथा॥ श्वेतारण्ये ब्रह्मवने पुण्यछायावने शिवे॥१६॥ घंटेश्वरे सुंदरे च वेदारण्ये महेश्वरि॥ क
मलालयसंज्ञे च हालास्ये गंधमादने॥१७॥ श्रीमद्दक्षिणकैलासे शिवे शोणाचले मम॥ श्रीमदभ्र
सभायां वा वृद्धाद्रौ गोनगे तथा॥१८॥ लिंगप्रतिष्ठादेशास्तुः नदीक्षेत्राण्यमूनि मे॥ पुण्यानि च प्रति
ष्ठासु नथारण्यानि शंकरि॥१९॥ नैमिशं दंडकारण्यं ब्रह्मारण्यं महेश्वरि॥ कुशारण्यं देववनं रु
द्रारण्यं बहद्वनं॥२०॥ कालंजरं पद्मवनं सप्तपुर्योत्र पुण्यदाः॥ प्रतिष्ठायां महादेवि शिवलिंग
स्य सत्तमे॥२१॥ अयोध्या मथुरा माया काशी कांची अवंतिका॥ पुरि द्वारावती देवि प्रतिष्ठासु म
हाफलाः॥२२॥ कुलाचला अपि शानि प्रतिष्ठासु महाफला॥ निषधः कुमुदो विंध्यः पारिपात्र
श्च नीलकाः॥२३॥ मेरुर्दर्दरकैलासौ दक्षिणो हेमकूटकः॥ कुलाचलेष्वथैतेषु स्थाप्यालिंगं म
हाफलं॥२४॥ महाकैलासमौलौ तु शिवलिंगप्रतिष्ठितः॥ दुर्लभा सर्वदेवानां मनुष्याणां च किं पुनः॥
२५॥ सर्वक्षेत्रनदीतीरवनपर्वतमौलिनः॥ विशिष्टात्र महादेवि कोटिकोटिगुणाधिका॥२६॥ स्व
यंभुवं तथा देवमार्षं मानुषमेव च॥ स्वायंभुवस्य लिंगस्य परितः क्रोशमेव हि॥२७॥ तत्र वासो वि
शिष्टानां भवतीत्येवमे मनः॥ तत्रैव मरणाज्जंतोः शिवलोक न संशयः॥२८॥ दैवे चापि तदर्धे
स्यात्परिमाणं तु मानुषे॥ पादन्यूनं महादेवि मूर्तिके तु फलं किंदुः॥ २९॥ बाणं स्वयंभु तुल्यं स्यात्क्षे
त्रमानं सदैव हि॥ क्षेत्रे लिंगस्थापनाच्च पुण्यं नद्याः तटेश तं॥ ३०॥ वनेषु स्थापितं तस्मात्ततोपि गिरि

मौलिगं॥ नवधातुजालिंगानि समुत्कर्षाणि शांकरि॥ ३१॥ नवरत्नोद्भवान्येव ततो त्कर्षाणि शैलजे॥ त
तो रसेंद्रकलितं बाणलिंगं ततोधिकं॥ ३२॥ न प्रतिष्ठा न च स्पर्शो बाणलिंगे शुविधते॥ सपीठमस्त्वपी
ठं वा बाणलिंगं प्रपूजयेत्॥ ३३॥ बाणलिंगं तु शूद्रेण यदि दैवि प्रतिष्ठितं॥ सर्वेषां दर्शनार्चासु अ
धिकारो भविष्यति॥ ३४॥ केवलं स्याच्छिलालिंगं न द्रव्यं सर्वथा द्विजे॥ अर्चा कामलकालिंगं न कार्यं
रत्नवर्जितं॥ ३५॥ धातुजं चांगुलेः षड्भिः स्फाटिकं स्याद्यथोचितं॥ वितस्तिमात्रं मल्लिंगं कार्यं वै सर्वथा
शिवे॥ ३६॥ ततोन्यूनं हरेदायुः बाणं प्रादेशसंमितं॥ गृहस्थैश्च गृहे पूज्यं स्थावरे सुततोधिकं॥
३७॥ लिंगमस्तकविस्तारो लिंगोच्छायसमः शिवे॥ वेदी च तद्द्विगुणिता तद्वत्पीठमुमे स्थितं॥ ३८॥
गोमुखी तद्द्विगुणिता पंचसूत्रं विदुः शिवे॥ पंचपातकनाशाय पंचसूत्रं समं सदा॥ ३९॥ न्यूनाधिके
हरेदायुः कीर्तिरारोग्यनाशनं॥ सर्वद्रव्यकृतं लिंगं पंचसूत्रं प्रशस्यते॥ ४०॥ नैवायं नियमो देवि स्वयं
भूतेषु शस्यते॥ अरत्निमात्रादूर्ध्वं यत्स्थावरं लिंगमेव हि॥ ४१॥ न स्थाप्यं तद्गृहे गौरि स्थाप्यं तच्च
शिवालये॥ प्रतिमा वामदेशस्य देवतानां महेश्वरि॥ ४२॥ वितस्तिमात्रादूर्ध्वा च तन्नार्चा सा वै गृहे स
दा॥ मदातु निर्मिता या स्यात्सा चाणप्रभवा च या॥ ४३॥ प्रतिष्ठाप्यार्चयेत्तास्तु तदूर्ध्वाश्च शिवालये॥
मूर्तयोष्टौ महेशस्य पं॰ चविंशत्परिमिताः॥ ४४॥ समाकारा स्युनेत्रान्याः प्रतिष्ठाप्यगणो भवेत्॥ गृहे
शिवालये वापि मूर्तयो मीमहेशितुः॥ ४५॥ उमासहायो नन्तेन्नो दक्षिणामूर्तिरेव वा॥ कंकालो लिंगो
भागस्थस्तथा शूलधरो हरः॥ ४६॥ चंद्रचूडो रषांगस्थ अर्धनारीश्वरः शिवे॥ कपालपाणिर्वरदो वि

ष्णावे ब्रह्मणेशिवे ॥४७॥ दिगंबरो कालनाशः गजचर्मपरीवृतः ॥ कैलासवासो घोरात्मा सद्योजातो थ
पूरुषः ॥४८॥ वामदेवस्तथेशानो त्रिपुरांतकरो हरः ॥ एताभ्यां न्या मूर्तयो यत्र प्रतिष्ठाप्यार्चयेच्छिवे ॥
॥४९॥ धातुजानां च लिंगानां प्रतिमानामपीश्वरी ॥ चराणां वास्थिराणां च वा नवर्षात्प्रतिष्ठितः ॥५०॥
वैदिकी चागमीया च प्रतिष्ठा द्विविधा शिवे ॥ खंडस्फुटितदग्धो वा पाखंडपतितां त्यजेः ॥५१॥ शूद्रस्प
र्श प्रतिष्ठा स्यात् पुनः संस्कारमेव वा ॥ अत्यंतोपहतानां तु परित्यागो जले भुवि ॥ ५१॥ चराणां स्थावरा
णां वा न पास्ता यं भुवे पि वा ॥ स्थायं भुवीय लिंगस्य न्याकलं वैदिकास्त्वपि ॥५२॥ अष्टबंधकद्रव्येण
यो ज्यवधा प्रतिष्ठितः ॥ आगमी चागमी यानां वैदिकानां तु वैदिकी ॥५३॥ यस्तु प्रतिष्ठितो लिंगप्र
तिमां वा स्थिरा चिरां ॥ ब्राह्मणक्षत्रियो वैश्यः शूद्रो वा मत्परायणः ॥५४॥ तस्याहमर्चा ग्रहणात्मिमो
लोचंद्र विभूषिते ॥ वसंतो यत्र ऋतुर्देवि वार्षिकः शिशिरो थ च ॥५५॥ ग्रीष्मो वापि भवेद्देवि प्रतिष्ठा
सुमहाफलः ॥ उत्तरायण एवेह प्रतिष्ठा सुविधीयते ॥५६॥ उत्तरशशा गते भानो लिंगस्थाप्यर्चयेच्छिवे ॥ माघफाल्गुनवैशाखज्येष्ठाषाढेषु पंचसु ॥ मासेषु शुक्लपक्षे तु लिंगस्थापनमुत्तमं ॥ अष्ट
म्यां वा चतुर्दश्यां पर्वणो चो महेश्वरि ॥५८॥ सोमवारो थवा भद्रे रविभौमावथापि ॥ स्थिरप्रतिष्ठा
शुभये स्थिरर्क्षे च चरे चरं ॥५९॥ शांतो द्विजवरे देवि शिवभक्तो जितेंद्रियेः ॥ शानावरास्थावरेषु ऋ
त्विजः परिकीर्तिताः ॥६०॥ दशा त्रयो वा विप्रेंद्रा शिवभक्ताः सुवाससः ॥ भस्मरुद्राक्षसंपन्नाः त्रिपुं
ड्रपरिमंडिताः ॥६१॥ चरलिंगप्रतिष्ठायां चरणीया द्विजोत्तमाः ॥ ब्रह्माभदास्य चार्यो यं सर्वोपस्कैण

पूजिताः॥ ६२॥ वासोभिरहितैश्चैव गोभिः पूज्या यथाबलि॥ वस्त्रालंकारणैरत्नैर्धनधान्यैर्गृहैरपि॥ पू
जनीया प्रतिष्ठादौ ब्राह्मणा वेदपारगाः॥ धान्यादिवासः कर्तव्यो जलवासश्च शांकरि॥ ६४॥ प्रतिमा
याश्च लिंगस्य कर्तव्यो यथाविजानता॥ द्रोणत्रयं धान्यमिति जलकुंभं सपल्लवं॥ ६५॥ नदीनदाहृतं
तोयं तडाकं कूपजं तथा॥ वनधान्यानि वासांसि समाहृत्य द्विजैः सह॥ ६६॥ तथैवौषधयः पुण्या वि
ष्णुक्रांतापमार्गना॥ दर्भाग्राश्च तथा दूर्वा यवाग्राण्यथ मुंडिका॥ ६७॥ पल्लवास्तु शुभे पंच फल्का
न्यपि सुमध्यमे॥ समाहृत्य शुभे देशे गोमयेनोपलेपिते॥ ६८॥ रंगवल्यादिशोभाढ्ये मंडपे पुष्पमं
डिते॥ गणेशमादौ संपूज्य नांदीश्राद्धं विधाय च॥ ६९॥ ततः प्रतिसरं कृत्वा ब्राह्मणाननुमंत्र्य च॥
पत्न्या सह समासीनो अरजे वाससी दधत्॥ ७०॥ संकल्प वरयेद्धीमान् आचार्यं च सदस्यकं॥ ब्रह्मा
णं च प्रतिष्ठाप्य दिनत्रयमथेश्वरि॥ ७१॥ बोधायनोक्तविधिना प्रतिष्ठाप्य महेश्वरं॥ हावयेत्पाय
सैर्विद्वान् चरूणा सघृतेन वा॥ ७२॥ स्वस्वशाखोक्तमार्गेण प्रतिष्ठाप्य हुताशनं॥ कुंभाभिषेकं रू
त्वैवं मूलेन प्रणवेन वा॥ ७३॥ नेत्रोन्मीलनवर्ज्यं वै लिंगे त्वेव प्रतिमास्वपि॥ कुर्यान्नेत्रोन्मीलनादि प्रति
मास्वपि शांकरि॥ ७४॥ महाभिषेकविधिना पूजयेल्लिंगमीश्वरं॥ पंचामृतैः पंचगव्यैः तथा फलरसैरपि॥
श्रीरुद्रेणाभिषेकोऽत्र कर्तव्यमपरैरपि॥ ॥वस्त्रैर्गंधैश्च धूपैश्च दीपैर्नैवेद्यकल्पनैः॥ ७६॥ तांबूल
नीराजनतः पूजयेच्छत्रचामरैः॥ प्रदक्षिणानमस्कारैः संस्तुवीत महेश्वरं॥ ७७॥ नमस्ते देवदेवाय
शिवायाकाशमूर्तये॥ भवाय भव्यरूपाय हर भूम्यात्मने नमः॥ ७८॥ व्यक्ताव्यक्ताय सोमाय जलरूपा

यतेनमः॥ उग्रायभीमरूपायवायुमूर्त्यात्मनेनमः॥७९॥ व्योमकेशायनित्यायतेजोमूर्त्यात्मनेनमः॥
एवंसंस्तुत्यदेवेशिक्षमाप्यपरमेश्वरं॥ ८०॥ ज्ञानताज्ञानतावापिप्रतिष्ठायांमयाकृतं॥ तांक्षमस्वम
स्वमहादेवलिंगेस्मिन्सुस्थिरोभव॥ ८१॥ ततोर्चयन्गंधपुष्पैर्धनैर्गोभिःप्रपूजयेत्॥ आचार्यंऋत्वि
जश्चैवदीनानाथाद्विजोत्तमान्॥ ८२॥ भोजयेच्छिवभक्तांश्चदक्षिणाभिःप्रतोषयेत्॥ सहस्रंत्रिंश
तंवापिशतंद्वादशएववा॥ ८३॥ हंत्यर्थहीनंकर्तारंमंत्रहीनंतुऋत्विजं॥ स्त्रियंलक्षणकंहीनंनप्र
तिष्ठासमोरिपुः॥ ८४॥ वित्तशाठ्यंनकुर्वीतफलमाप्यदरिद्रयोः॥ एवंसंक्षेपतःप्रोक्तःप्रतिष्ठावि
धिरुत्तमः॥ ८५॥ सूतउवाच॥ ॥ प्रतिष्ठादिनिष्ठायांदिस्याद्दिशिष्ठामहातुंगालिंगेगारिष्ठासहिष्ठा॥
महाकष्टहंत्रीधनिष्ठासुत्रास्तागारिष्ठामहाज्येष्ठलिंगेविशिष्ठा॥ ८६॥ अलंमहीमंडलदानजा
लैरारवंडलक्षीणनयज्ञसंघैः। अखंडकृच्छ्राचरणाद्रतेयल्लिंगंस्यतत्कोटिगुणंप्रतिष्ठिते॥ ८७॥ ॥
इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेशिवलिंगप्रतिष्ठानाम पंचमोध्यायः॥५॥ ॥श्रीम
हादेवायनमः॥ ॥देव्युवाच॥ ॥ प्रासादगोपुराणांचकरणेयत्फलंचकिं॥ प्राकारगोपुरद्वारवाह
नानांप्रकल्पने॥ १॥ मंटपानांचकरणेवापीकूपोदपानकृत॥ शिवागारेविशेषेणशिवपुष्पवनस्य
च॥ २॥ किंफलंस्यान्महादेवतन्मेवददयानिधे॥ ॥ईश्वरउवाच॥ ॥ महार्विद्दकपाषाणैर्यःकु
र्याद्दाशिवालयं॥ त्रिसप्तकुलसंयुक्तःशिवलोकेमहीयते॥ ३॥ मृन्मयात्कोटिगुणितंपुण्यंस्याद्दा
रुभिःकृतं॥ त्रिगुणंचेष्टकादिभ्यःसुधयापरिकल्पितं॥ ४॥ शैलेरत्नंतंदेवेशिकल्पितंशिल्पिभिःद

ढं॥ कोटिकोटिगुणं पुण्यं उत्तरत्र महेश्वरि॥ ५॥ म्लेच्छेलयोः समं ज्ञेयं फलमाढ्यदरिद्रयोः॥ यत्र का
पि शिवेभक्त्या कुर्याच्छेले ष्टकादिभिः॥ ६॥ नवं पुराण रहितं जीर्णपतितमेव वा॥ नवादपि सहस्रं
जीर्णोद्धारं महेश्वरि॥ ७॥ अथेष्टकाभिर्वा कुर्यात्क्रीडमानः शिवालयं॥ सोपि रुद्रगणो भूत्वा यातु भ
क्त्या वित्तानुसारतः॥ ८॥ गर्भगेहं महेशस्य यः कुर्याद्रुक्मधातुभिः॥ पट्टिकावेदिलं देवकोष्ठेश्वा
पि शोभितं॥ ॥ ९॥ रुद्रावतारचरितैर्वृषकुंभविराजितं॥ यावद्युगसहस्राणि रुद्रलोके महीय
ते॥ १०॥ तत्पाषाणसुधालेपकणैः साहस्रसंख्यया॥ तावत्कालं वसेत्स्वर्गे यावदिंद्राश्चतुर्दश॥
॥ ११॥ मंडपं दश स्तंभैश्च युतं यः कारयेच्छिवे॥ शतस्तंभं ततोपीशे सहस्रस्तंभमंडितं॥ १२॥ सुपीठे
वेदकोपेतं वलभीकुंभमंडितं॥ जालकातोरणोपेतं चित्रविद्रुमपुत्रिकं॥ १३॥ तावद्युगसहस्रा
णि रुद्रलोके महीयते॥ तावत्कालं वसेत्स्वर्गे यावदिंद्राश्चतुर्दश॥ १४॥ तत्पाषाणसुधालेपक
णैः साहस्रसंख्यया॥ गोपुरैः भूधराकारैः सहस्रतलमंडितैः॥ १५॥ कारयेच्छिल्पशास्त्रज्ञैः रुद्ररूपवि
चित्रितैः॥ दशैकादशसाहस्रं तलैः शतपरीमितैः॥ १६॥ कुंभैर्वृषैः रुद्ररूपैः योलं कुर्याच्छरंगतः॥
यावंति रुद्ररूपाणि स्वरूपाण्यपि लेखयेत्॥ १७॥ तावद्वर्षसहस्राणि शिवलोके महीयते॥ शिवा
लयस्य परितः चतुर्दिक्षु विराजितैः॥ १८॥ प्राकारं कारयेद्यस्तु भारभारस्य पत्रांकवि॥ यावत्तस्मिन्वि
रचिताः पाषाणा इष्टकास्तथा॥ १९॥ तावद्वर्षसहस्राणि मम लोके महीयते॥ एवं ड्स्फुटितसंस्का
रं यः कुर्वीत शिवालयं॥ २०॥ प्राकारं गोपुरं वापि मंडपं वा सपीठकं॥ नूतनादपि चोत्कृष्टं जीर्णोद्धारं

प्रशस्यते॥२१॥ दूरागःशिखरं दृष्ट्वा गोपुरस्य महेशितुः॥सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति॥२२॥प
श्चात्तं मुखलिंगस्य गर्भागारं तु कारयेत्॥ देवालयं ततः कृत्वा देवीमूर्तिभिरन्वितं॥२३॥शिवलोकेग
णोभूत्वा मोदते शाश्वतीः समाः॥ एकं द्वारुयं गणेशस्य भैरवस्य महात्मनः॥२४॥ चंडेश्वरालयं कृ
त्वा सलभेत्पुण्यमुत्तमं॥ द्वाराकृयं प्रकुर्वीत तदग्रे बलिपीठकं॥२५॥ तस्याग्रतो ध्वजस्तंभं कुर्या
दूर्ध्वसुवर्तुलं॥ पंचविंशतिमूर्तीनां मारूयानि समंततः॥२६॥ श्लक्ष्णानि सुमनोज्ञानि सुकुट्टिमयु
तानि च॥ चित्रध्वजपताकाग्रस्वर्णकुंभयुतानि च॥२७॥ कृत्वा यत्फलमाप्नोति तदे[illegible]काग्रमनाः शृ
णु॥ स्कंदोमासहितं देवमासीनं परमासने॥२८॥ कृत्वा भक्त्या प्रतिष्ठाप्य सर्वान्कामानवाप्नुयात्॥
कैलासे संवसेद्देव दक्षिणे विष्णुपंचकं॥ यावत्कालेन संतिष्ठेत्तावद्भोगभुगव्ययः॥ एकपादचतु
र्बाहुं त्रिनेत्रं शूलसंयुतं॥३०॥ दृष्ट्वा स्थितं हरिं वामे दक्षिणे विधिमव्ययं॥ अष्टविंशतिकोटीनां
रुद्राणां स्वामितो हरः॥३१॥ विनिर्माया थ मूर्तीनां पंचविंशतिकं तथा॥ पुरुषं हृदयाद्देवि सद्योजा
तं तु पादतः॥ अघोरं वक्त्रतः शंभुर्हस्ताभ्यां वामुमीश्वरं॥ ईशानं मूर्धतः शंभुः निर्मायाग्रे सचासृ
जत्॥३३॥ प्रकृतिं वामतश्चैव बुद्धिं वै बुद्धिदेशतः॥ अहंकाराद हंकारं तन्मात्राणि च मात्रया॥
॥३४॥ इंद्रियाणींद्रियाद्देव लीलया परमेश्वर॥ पृथिवीपाददेशात्स गुह्यदेशाज्जलं तथा॥३५॥ नाभि
देशान्महावन्हिं हृदयात्भास्करं तथा॥ कर्णात्सोमं तथात्मानं भ्रूमध्यान्मस्तकं दिवं॥३६॥ दृष्ट्वै
वं संस्थितः साक्षाज्जगत्सर्वं चराचरं॥ पंचविंशतिमूर्तिश्च प्राविशत्तेन तेजसा॥३७॥ एकांशेन

महादेवएकधाबहुधाश्रुतः॥ वामांगास्थितंलोकेश हरिणाचैवसेवितः॥३८॥ सर्वज्ञंसर्वज्ञंदेवंरु
त्वाभक्त्याविधानतः॥प्रतिष्ठाप्ययथान्यायंशिवसायुज्यमाप्नुयात्॥३९॥त्रिपादंसप्तहस्तंचचतुः
शृंगंत्रिशीर्षकं॥कृत्वायज्ञेशमीशानंअग्निलोकेमहीयते॥४०॥तत्रभुक्त्वामहाभोगान्कल्पलक्षं
सुखीनरः॥क्रमादप्राप्यलोकेस्मिन्धराधीशोभवेन्नृपः॥४१॥ वृषारूढंतुयःकुर्यात्सोमंसोमार्ध
भूषणं॥ हयमेधायुतंपुण्यंकृत्वाप्राप्येंद्रवल्लभः॥४२॥ कांचनेनविमानेनकिंकिणीजालमालिना॥
गत्वाशिवपुरंदिव्यंतत्रैवसविमुच्यते॥४३॥ नंदिनासहितंदेवंसांबंसगणमव्ययं॥ कृत्वायत्फल
माप्नोतितत्तेवक्ष्याम्यनुत्तमं॥४४॥ सूर्यमंडलसंकाशैर्विमानैर्वृषसंयुतैः॥ अप्सरोगणसंकीर्णैःदे
वदानवदुर्लभैः॥४५॥ नृत्यद्भिरप्सरसंघैःपुष्पगंधमनोहरैः॥गत्वाशिवपुरंदिव्यंगाणपत्यमवा
प्नुयात्॥४६॥ नृत्यंतंदेवदेवेशंशैलजासहितंप्रभुं॥सहस्रबाहुंदेवेशंचतुर्बाहुमथापिवा॥४७॥
नंद्याद्यैर्भूतसंघैश्चसंवृतंपरमेश्वरं॥कृत्वाभक्त्याप्रतिष्ठाप्यरुद्रलोकेमहीयते॥४८॥शैलजा
सहितंसाक्षाद्वृषभध्वजमीश्वरं॥ ब्रह्मेंद्रविष्णुसोमाद्यैःकृतांजलिपुटैर्गणैः॥४९॥मातृभिर्मुनिभि
श्चैवसंवृतंपरमेश्वरं॥कृत्वाभक्त्याप्रतिष्ठाप्ययत्फलंतद्वदाम्यहं॥५०॥ सर्वयज्ञतपोदानतीर्थवेदे
षुयत्फलं॥ तत्फलंकोटिगुणितंलब्ध्वायातिशिवंपदं॥५१॥ तत्रभुक्त्वामहाभोगान्यावदाभूत
संप्लवं॥तत्क्षयांतरेततःप्राप्यमानवंपदमाप्नुयात्॥५२॥नंदिचतुर्भुजंश्वेतंत्रिनेत्रंसर्पमेखलं॥ कपाल
हस्तंदेवेशंकृष्णकुंचितमूर्धजं॥५३॥तत्क्षयांतरेततःप्राप्यमानवंपदमाप्नुयात्॥ नंदिचतुर्भुजं०॥

कृत्वाभक्त्याप्रतिष्ठाप्य शिवसायुज्यमाप्नुयात्॥ ईदृशं रुद्रदारकं देवं सांबं सिद्धाकृतिं प्रभुं॥ सुधूम्रवर्णरक्ता
क्षं त्रिनेत्रं चंद्रशेखरं॥ वकपस्वधरं मूर्ध्ना नागटंकधरं हरं॥५५॥ सिंहाजिनोत्तरीयं च मृगचर्मांबरप्रियं॥
तीक्ष्णदंष्ट्रं गदाहस्तं कपालोद्धृतपाणिनं॥५६॥ हुंफट्कारमहाशब्दं शब्दाद्धिनाखिलदिङ्मुखं॥ पुंडरी
काबरं दोर्भ्यां विभ्रद्वैकं कनंमथा॥५७॥ हसंतं च नदंतं च पिबंतं सप्तसागरं॥ नृत्यंतं भक्तसंघे श्वसं
वृतं सगणं प्रभुं॥५८॥ कृत्वाभक्त्याप्रतिष्ठाप्य यथाविभवविस्तरं॥ यस्माद्विघ्नाद्विनिर्जित्य शिवलो
के महीयते॥५९॥ तत्र भुक्त्वा महाभोगान् यावदाचंद्रतारकं॥ ज्ञानं विचारतो लब्ध्वा रुद्रेभ्यस्तत्र
मुच्यते॥६०॥ अर्धनारीश्वरं देवं चतुर्भुजमनुत्तमं॥ वरदाभयहस्तं च शूलपद्मधरं शिवं॥६१॥ भावे त्रिपुं
न संस्थितं तत्सर्वं सर्वाभरणभूषितं॥ कृत्वाभक्त्याप्रतिष्ठाप्य यथाविभवविस्तरं॥६२॥ यस्माद्विघ्नाद्वि
निर्जित्य शिवलोके महीयते॥ तत्र भुक्त्वा महाभोगान् यावदाचंद्रतारकं॥६३॥ ज्ञानं विचारतो लब्ध्वा
रुद्रेभ्यस्तत्र मुच्यते॥ अर्धनारीश्वरं देवं चतुर्भुजमनुत्तमं॥ वरदाभयहस्तं च शूलपद्मधरं शिवं॥ भा
वेन संस्थितं तत्सर्वं सर्वाभरणभूषितं॥६५॥ कृत्वाभक्त्याप्रतिष्ठाप्य शिवलोके महीयते॥ तत्र भुक्त्वा म
हाभोगानणिमादिगुणैर्युतः॥६६॥ आचंद्रतारकं ज्ञानं ततो लब्ध्वा विमुच्यते॥ यः कुर्यादेवदेवेशं
सर्वज्ञं लकुटीश्वरं॥६७॥ वृत्तं शिष्यैः प्रशिष्यैश्च व्याख्यातो धृतपाणिनं॥ कृत्वाभक्त्याप्रतिष्ठाप्य
शिवलोकं स गच्छति॥६८॥ भुक्त्वा तु विपुलांस्तत्र भोगानुग्रतरं नरः॥ ज्ञानयोगं समासाद्य तत्रैव स वि
मुच्यते॥६९॥ पूर्वं देवासुराणां च नदास्त्रांशाकलेत्थितैः॥ कृतमुद्रस्य रुद्रस्य चिताभस्मानुलेपनः॥

॥७०॥ त्रिपुंड्रधारिणस्तेषां शिरोमालाधरस्य च॥ ब्राह्मणः केशजेनैकमुपवीतं च बिभ्रतः॥७१॥ बिभ्र
तो वामहस्तेन कपालं ब्रह्मणो वपुः॥ विष्णोः कलेवरं चैव बिभ्रतः परमेष्ठिनः॥७२॥ कृत्वा भक्त्या प्रति
ष्ठाप्य विष्णुलोके महीयते॥ कालकूटकरा ज्ञानेन निधायासीनमासने॥७३॥ कृत्वा भक्त्या प्रतिष्ठा
प्य मुच्यते भवबंधनात्॥ ॐ नमो नीलकंठाय इति पुण्याक्षराष्टकं॥ मंत्रमाह सकृद्धायतः पानकैः
सदा प्रमुच्यते॥ मंत्रेणानेन गंधाद्यैर्भक्त्या विनानुसारतः॥७५॥ संपूज्य देवदेवेशं शिवलोके महीय
ते॥ जलंधरांतकं देवं सुदर्शनकरं प्रभुं॥७६॥ कृत्वा भक्त्या प्रतिष्ठाप्य विष्णुलोके महीयते॥ तिष्ठ
तो यतिकुंभस्य प्रयतश्चरणांबुजं॥७७॥ वामेतरं प्रविन्यस्य वाममालिंग्य चाद्रिजा॥ शूलाग्रे च
र्परं स्थाप्य कर्कणीकृतपन्नगं॥७८॥ संप्रोक्ष्य चांतकं पार्श्वे कृतांजलिपुटं स्थितं॥ रूपं कृत्वा यथान्या
यं शिवसायुज्यमाप्नुयात्॥७९॥ यः कुर्याद्देवदेवेशं त्रिपुरांतकमीश्वरं॥ धनुर्बाणसमायुक्तं सोमं
सोमार्धभूषणं॥८०॥ रथे तु संस्थितं देवं चतुराननसारथिं॥ तदाकारतया सोपि गत्वा शिवपुरं सु
खी॥८१॥ क्रीडते नात्र संदेहो द्वितीय इव शंकरः॥ तत्र भुक्त्वा महाभोगान्यावदिच्छा द्विजोत्तमाः॥८२
ज्ञानं विचारितं लब्ध्वा तत्रैव स विमुच्यते॥ गंगाधरं सुखासीनं चंद्रशेखरमेव च॥८३॥ उमया सहितं
देवं वामोत्संगां सविकाम्युतं॥ विनायकं तथा स्कंदं ज्येष्ठं दुर्गां सुशोभनां॥८४॥ भास्करं च तथा सोमं ब्रह्मा
णी च महेश्वरीं॥ कौमारीं वैष्णवीं देवीं वाराहीं वरदां तथा॥८५॥ ईंद्राणीं चैव चामुंडीं वीरभद्रसमन्वि
तां॥ विघ्नेशेन च योधीमान्कृत्वा सायुज्यमाप्नुयात्॥८६॥ लिंगमूर्तिं महाज्वालामालासंवृतमव्य

यं॥ लिंगस्यमध्येवेकृत्वाचंद्रशेखरवन्नतुं॥ ८७॥ योम्भिंकुर्यात्तथालिंगेब्रह्माणंहंसरूपिणं॥
विष्णुंवराहरूपेणलिंगस्याधस्त्वधोमुखं॥ ८८॥ ब्रह्माणंदक्षिणेतस्यकृतांजलिपुटंस्थितं
॥ वामेविष्णुंमहाबाहुंकृतांजलिपुटंतथा॥ ८९॥ मध्येलिंगंमहाघोरंमहाभस्मसुसंस्थितं॥ कृ
त्वाभक्त्याप्रतिष्ठाप्यशिवसायुज्यमाप्नुयात्॥ ९०॥ क्षेत्रसंरक्षकंदेवक्षेत्रपालकनामकं॥ कृत्वा
तथायथान्यायंशिवलोकेमहीयते॥ ९१॥ येपंचविंशात्परमेशमूर्तेयोः कृत्वालयाभ्यंतरपीठसं
स्था॥ सुरूपवर्णाभरणामनोज्ञाशिवेप्रतिष्ठाप्यसुपुण्यभाक्भवेत॥ भूयात्तुगणेभ्योरजताद्रिमौ
लौयेगोपुरंरम्यकवाटजालं॥ स्वर्णाग्रकुंभैःसुपताकजालैःसन्मंटपालीवलभीप्रतोलिका॥ ९२॥
सुपालिकापुत्तलिकाविचित्रेसत्यंचवर्णोत्तमगर्भगेहं॥ कृत्वासुधाचित्रितमीशानुल्यःलिंगंप्रति
ष्ठाप्यसुपुण्यभाक्भवेत्॥ ९३॥ देवींगणस्कंदवृषेशचंडंयावद्ब्रह्मशानंमुकुंदसदनेस्थित्वाचि
रंभोगभाक्भूयात्सान्वयकोटिभिर्मम्मशिवेनाराणेनार्चितः॥ पश्चात्प्रगणमुख्यतामुपगतः॥
सर्वोप्यखर्वोजनः सर्वस्मादधिकंफलंसलभतेपुण्यस्यशैलेंद्रिजे॥ ९४॥ ॥ इतिश्रीशिवरह
स्येमहादेवाख्येएकादशांशेशिवलिंगप्रतिष्ठानामषष्ठोध्यायः॥ ६॥ ॥ श्रीमहादेवायनमः॥
॥ ईश्वरउवाच॥ ॥ कैलासाचलसंकाशंगोपुरावलिभासुरं॥ प्राकारवरशोभाढ्यंमहामंटपसुंद
रं॥ पर्यंतराजद्वृषभंचित्रविद्रुमवेदिकं॥ गवाक्षतोरणयुतंवलभीकुलभूषितं॥ नानाद्रुमलतो
पेतंवापीकूपानदावृतं॥ सरोभिःफुल्लकल्हारकमलोत्पलमंडितैः॥ ५॥ नानाविहगशोभाढ्यंम

गीनन्तमपूरकं॥ कृत्वा नगोर्ध्वे शिखरजालीजालकितांबरं॥ ४॥ रम्यनिर्झरकोशीतिरंगवल्याविचित्रितं॥ तन्मध्ये मम देवेशि कुर्यात्प्रासादमुन्नतं॥ ५॥ शतं सहस्रमयुतं स्तंभकुंभविराजितं॥ वेदिकापटिकोपेतं चित्रविद्रुमपुत्रिकं॥ ६॥ प्रतोली वलभीनिर्यूहाराराम गृहांतरं॥ पुष्पमालापरिष्ठितं गंधधूपदीपविराजितं॥ ७॥ मध्यसिंहासनयुतं डोलास्तरणशोभितं॥ वितानशोभितोर्ध्वानं सोपधानशतास्तृतं॥ ८॥ तस्मिन्न्यासन पर्यंके मूर्तिं सोमां महेश्वरि॥ त्रिनेत्रां चारुचंद्रार्कोत्यन्तसहायां सुशोभनां॥ ॥ ९॥ स्कंदान्वितां नीलकंठां त्रिपुंड्रपरिशोभितां॥ प्रतिष्ठाप्य च कैलासप्रासादे परमेश्वरि॥ १०॥ स यत्फलमवाप्नोति नदेकाग्रमनाः शृणु॥ सूर्यकोटिप्रतीकाशैर्यानैः कैलाससुप्रभैः॥ ११॥ ओं शं कौमारमैशानं वैष्णवं ब्राह्ममेव च॥ प्राजापत्यं महानेजा जनो लोकं महस्तथा॥ १२॥ ऐंद्रमासाद्य चैंद्रत्वं कृत्वा कल्पायुतं दिवि॥ मन्वंतरपरिवर्तं यावद्दिं द्रशतं शिवे॥ १३॥ यावदायुर्ब्रह्मणोथ वसेत्कैलासप र्वते॥ भुक्त्वा चैव भुवर्लोके भोगान्देवेषु दुर्लभान्॥ यावदायुर्ब्रह्मणोथ वसेत्कैलासपर्वते॥ १४॥ मेरुमासाद्य देवानां भवनेषु प्रमोदते॥ किंपुरुषाप्सरोलोके नागविद्याधरालये॥ १५॥ भुक्त्वा भोगान्सुविपुलान्यदि स्याद्देहिको भुवि॥ आखंडलाधिको भूपान्महीमंडलमंडनः॥ १६॥ एकछत्राधिपो राजा भवेद्धीजितचामरः॥ जातिस्मरो भवेद्भूम्यां कृत्वा धर्मं शिवस्य तु॥ पुनर्मे गणपो भूयात् नास्यां नो धर्मवर्त्मनः॥ मंदराद्रिं प्रकुर्वीत मम प्रासादमुत्तमं॥ १८॥ शिखरायुतसंयुक्तं प्रसादे दिव्यवेदिकं॥ रुद्रावतारक्रीडाभिरप्सरोगणचित्रितं॥ १९॥ देवदानवगंधर्वप्रतिमापरिशोभितं॥ संतानपारि

जानादिमंदराद्यैरलंकृतं॥२०॥ देवोद्यानोद्भवैर्वृक्षैः समंतादुपशोभितं॥सुधाविचित्रितास्तत्र कारये त्प्रतिमाः शुभाः॥२१॥ रंगिताः पंचवर्णैश्च तत्प्रासादे विशेषतः॥मम देव्या गणेशस्य स्कंदभैरवनंदिनः
२२॥ वृषाग्रेः चास्य मंगैश्च शोभितं कारयेन्नरः॥तत्प्रसादे महापीठे पुष्पमालाविराजिते॥२३॥ गंधधू पादिविततेदीपमालावृतांतरे॥ न त्वमानंत्रयीनेत्रं सोमं सोमार्धशेखरं॥२४॥ मत्पार्श्वे त्वां महादेवि प
श्यंतीं मत्पदांबुजं॥ कृत्वा भक्त्या प्रतिष्ठाप्य स मे प्रियतरो गणः॥२५॥ मंदराद्रिप्रतीकाशैर्विमानैर्विश्व तो मुखैः॥ हावभावसमायुक्तो रुद्राणीनृत्तभिर्भरैः॥२६॥ गत्वा शिवपुरं दिव्यं भुक्त्वा भोगाननुत्तमान्॥
ज्ञानयोगं समासाद्य गाणापत्यं लभेन्नरः॥२७॥ यः कुर्यान्मेरुनामानं प्रासादं मे महेश्वरि॥ सहस्रशृं गसंयुक्तं स्तंभसाहस्रसंयुतं॥२८॥ वेदिकातोरणोपेतं वलभीजालकान्वितं॥ दिक्पालैर्देवसंघैश्च त
त्तद्वर्णसुधान्वितैः॥२९॥ कल्पितं शिल्पिवर्यैश्च तत्प्रासादोत्तरपीठके॥ दीपधूपसमामोदप्रसारि तदिगंतरे॥३०॥ वामदक्षिणपार्श्वस्थविष्णुब्रह्मादिसेवितं॥उमान्वितं मामेवं वेशिमूर्निसंस्थाप्य
पूजयेत्॥३१॥ सयत्फलमवाप्नोति न तत्सर्वमहामखैः॥सर्वयज्ञतपोदानसर्वतीर्थेषु यत्फलं॥३२
लब्ध्वा विमानवर्येण जितसूर्येण याति मां॥ निषधन्नाम लः कुर्यात्प्रासादं भक्तिमान्नरः॥३३॥
सहस्रशिखरोपेतं स्तंभकुंभसमन्वितं॥ वलभीकुलसंछन्नं तोरणारूणमंडितं॥३४॥ वेदिकापट्टि कोपेतं मुनिवर्यैश्च शोभितं॥ वैखानसैर्वालखिल्यैर्देवगंधर्वशोभितं॥३५॥ नाट्यविधसुधाक्रमभू र्तिभिः परिशोभितं॥ तत्रासने सुखासीनं चंद्रखंडजटालकं॥ त्रिपुंड्रफालं मां देवि योगपट्टासनो

ज्वलं॥ चिन्मुद्रा द्राविताज्ञानं मुनीनां भावितात्मनां॥ ३७॥ संवृतं मुनिभिस्तत्र नतप्रांजलिभिः शिवे॥ कृ
त्वामे दक्षिणामूर्त्तिं वटमूले प्रतिष्ठितां॥ ३८॥ देवलोकं यानवर्यैः हंसयुक्तैर्विराजितः॥ विमानैश्चं द्रगौ
रैश्च वजमप्सरसां गणैः॥ ३९॥ भुक्त्वाथ सुचिरं कालं देवभोगाननुत्तमान्॥ आभूतसंप्लवं देवि पश्चान्मेशा
नमैश्वर्यं॥ ४०॥ लब्ध्वा मय्येव लीयं ते भक्तियुक्तः प्रमुच्यते॥ कुर्याद्यायः शिवे भक्त्या हिमशैलाख्यमुत्तमं॥
॥ ४१॥ प्रासादं परयाभक्त्यादिव्यस्तंभशतैर्युतं॥ जालिकामालिकामध्यस्तंभगुंभशतावृतं॥ ४२॥ वेदि
कातोरणोपेतं दिव्यपीठमनोहरं॥ धूपदीपावृतं पुष्पमालामुद्रितमेदुरं॥ ४३॥ नंदिभृंगिमहाकालमू
र्तिभिः परिशोभितं॥ तिष्ठंतमांतत्र मूर्तिं कृत्वावृषमुखेवकरं॥ ४४॥ सोष्णीषं सोमसुकुटं पुष्पपीडमु
मान्वितं॥' ॥ प्रतिष्ठाप्य लभेगौरीविमानं सार्वकामिकं॥ हिमशैलोपमैर्यानैः भुक्त्वा देवपुरे सुखं॥
॥ ४५॥ नंदनादिवने देवि पीत्वामृतमनुत्तमं॥ स्त्रग्गंधवासोबिभ्राजद्दप्सरोभिः प्रमोदते॥ ४६॥ याव
दिंद्रायुतं देवि पश्चान्मे गणपो भवेत्॥ नीलाद्रिशिखराख्यं वा प्रासादं तोरणान्वितं॥ ४७॥ वेदिका
पट्टिकोपेतं गोपानसिविराजितं॥ पंचाशत्स्तंभवितनचित्रविद्रुमपुत्रिकं॥ ४८॥ राजितरत्नाग्नं
च धूपमानपताककं॥ वेणुवीणारवानेकं सुमधूपादिदीपितं॥ ४९॥ पीठे देवि प्रतिष्ठाप्य गजोग्रमू
र्तिमय्ययां॥ त्रिनेत्रां चारुचंद्रांकां गजयस्त्रलसांघ्रिकां॥ ५०॥ दिदीपितमहाशूलकरां दंष्ट्राकुरास्य
कां॥ यानैर्वृषयुतैर्देवि निषेव्यसपरमेष्ठिनः॥ ५१॥ लोके भोगायुतो धीमानधीतेज्ञानमुत्तमं॥ पश्चात्ते
नैव मां प्राप्य ब्रह्मणापरिमुच्यते॥ ५२॥ वृषभाख्यमनुयः कुर्यात्प्रासादं परमेश्वरि॥ मंटमेवासुविहि

तंस्तंभकुंभशतावृतं ॥५३॥ राजद्द्वाराग्रकलशं पुष्पमालापरिष्कृतं ॥ तत्रपीठे कालहरं मां प्रतिष्ठाप्य
शांकरि ॥५४॥ कालस्य मकुटे पादहस्तस्थशूलेन ताडितं ॥ कालं च पतितं व्याघ्रेऽप्युग्रं मां चंद्रशेखरं ॥५५॥
दंष्ट्राकरालवदनं कृत्वा वरं लभेन्नरः ॥ गाणापत्यं प्रियं मे स्याद्विमानेनार्कभास्वता ॥५६॥ गत्वा शिवपु
रं देवि लीलानंलब्ध्वा विमुच्यते ॥ महेंद्राख्यं नृपः कुर्यात्प्रासादं परमेशितुः ॥५७॥ नानालंकारशोभा
ढ्यं स्तंभकुंभशतावृतं ॥ गवाक्षपंक्तिमध्यस्थशिखरप्रकरान्वितं ॥५८॥ वेदिकाद्वारविहितं दृ
षद्भिर्पिहितं दृढैः ॥ तस्मिन्नासनवर्ये मां प्रतिष्ठाप्य त्वया सह ॥५९॥ मूर्तिं कृत्वा ताम्रमयीं राज
तीं स्वर्णनिर्मितां ॥ चंद्रापीडां त्रिनयनां मंदस्मितमनोहरां ॥६०॥ वामदक्षिणभागे मे गणेशगु
हसंयुतां ॥ सफलं लभते मर्त्यो भुवि भाग्यसमन्वितः ॥६१॥ पुत्रपौत्रयुतो दारैर्वंशलक्ष्मसमन्वि
तः ॥ रविसंज्ञोऽभिधानेन पुष्पमालाविराजितं ॥६२॥ कैलासं दक्षिणं प्राप्य यक्षेंद्रार्चितभोगभाक्
॥ प्रासादं हेमकूटाख्यं कृत्वा स्तंभान्वितायुतं ॥६३॥ गवाक्षलक्षैर्विततं त्र्यक्षप्रीतिकरं शिवे ॥
× (कर्तुरप्यधिकं पुण्यं लभते नात्र संशयः ॥६४॥ भक्त्या वित्तानुसारेण कुर्यात्प्रासादमक्षयं ॥ अल्पे मह
ति वा पुण्यं सममाढ्यदरिद्रयोः ॥६५॥ सराजद्वेदिकाकुंभपताकावलिशोभितं ॥ तत्र सिंहासना
सीनं मर्धनारीश्वरां हि मां ॥ प्रतिष्ठाप्य लभेन्मुक्तिं भुंक्ते भोगाननुत्तमान् ॥६६॥ विषयान्विषवत्त्य
क्त्वा निःशेषं मामवाप्नुयात् ॥ हेमावारजतेनापि ताम्रकांस्यसुपैत्तलैः ॥६७॥ मणिभिः स्फटिकैर्वापि
विद्रुमैर्वा महेश्वरि ॥ आढ्यो वा द्रव्यरहितो भक्त्या कुर्याच्छिवालये ॥६८॥ मन्मयात्कोटिगुणितं पु

ण्यं स्याद्दारुभिः कृतं॥ कोटिकोटिगुणं पुण्यं मत्काषादिष्टकामये॥ ६९॥ त्रिगुणं चेष्टकादिभ्यो शैले
दैवि शिवालयं॥ दृषद्भिः कृष्णवर्णैश्च ततः कोटिगुणं भवेत्॥ ७०॥ मच्छैलयोः समं ज्ञेयं फलमाधर
रिद्वयोः॥ वने वापि नदीतीरे पुण्यपर्वतमूर्धसु॥ ७१॥ तीरे नदीपते देवि भक्त्या कुर्याच्छिवालयं॥ स्थावरं
शिवलिंगस्य महेवा पुरुषाधिकं॥ ७२॥ न कार्यमालयं देवि चरलिंगस्य शंकरि॥ यत्र कापि शिवे भक्त्या
कुर्याच्छैलैः शिवालयं॥ ७३॥ जीर्णं वा पतितं वापि खंडितं स्फुटितं तथा॥ पूर्ववत्कारयेद्यस्तु सर्वस्मा
ल्लभते फलं॥ ७४॥ नवादपि महादेवि जीर्णोद्धारं प्रशस्यते॥ प्रासादं गोपुरं वापि प्राकारं मंडपं तु वा॥
॥ ७५॥ × ॥ वित्तशाठ्येन यः कुर्यात्पुण्यमाप्नोपि मानवः॥ न सत्फलमवाप्नोति प्रलोभाक्रांतमानसः॥
७६॥ तस्मान्मदालये देवि कुर्याद्वित्तमवंचयन्॥ अथेष्टकाभिरपि वा कुर्याद्देवि शिवालयं॥ ७७॥ प्रासा
दार्थं महेशस्य प्रासादं परमेश्वरि॥ तथैवान्यस्य करणे साहाय्यमपि यावत्स्वयं॥ ७८॥ वाचा धनेन वा दे
विस्वस्य शक्त्यो सदा शिवे॥ कुर्याद्विघ्नकरो यस्तु नरके पच्यते चिरं॥ ७९॥ यावद्भूस्थानं गौरि यः शिवाल
यभंगकृत्॥ किं पुनर्बहुनोक्तेन भक्त्या वित्तानुसारतः॥ ८०॥ कुर्याद्देवि शिवक्षेत्रं जन्मप्राप्यदमानवं॥
वापीकूपकरा ये स्युः नटार्कं वा शिवालये॥ यावत्तद्दिं दृनोयानां सहस्रपरिवत्सरं॥ ८१॥ सुधासागर
मध्यस्थो निवसेत्तत्पितामहैः॥ वनवाटीं करोति यस्तु पुष्पार्चार्थं महेश्वरे॥ ८२॥ एकं विल्वतरुं वापि
रोपयेद्यः शिवालये॥ यावत्तत्पत्रकुसुमबीजमूलफलानि च॥ ८३॥ तावद्वर्षसहस्राणि मम लोके म
हीयते॥ उत्सवार्थं महेशस्य वाहनानि च कारयेत्॥ ८४॥ गजमश्वं भूलगणं वृषं चापि महेशितुः॥ दे

अत्रश्लोकदशपत्रे प्रथमदे कर्तुम्यधिकं त्वष्टार ध्य सार्द्धकश्लोक द्वितीय पृष्ठस्य पंच शलोकिः लो कमेत्रुटिते यं विश्वस्तगः अत्र चिन्हं मस्ति ×

वीस्कंदगणेशानामारवुकेकिहरीमुखे॥८५॥ सौवर्णं राजतं वापि दारुणा रंगचित्रितं॥ कृत्वाभवेन्ग
णेंद्रो सौमम कैलासमौलिषु॥८६॥ रथंचममदेवेशि ध्वजकुंभपरिष्कृतं॥ सहस्रशानचक्रं वाद
शाचक्रं मनोहरं॥८७॥ उत्तमं शतचक्रं स्याद्दशचक्रं तु मध्यमं॥ अधमं षट्चतुःश्चक्रं रथं शिल्पिवि
द्भिर्विदुः॥ नाटकं लेपरिचतं पुष्पमालापरिचतं॥ कर्षद्भिर्वेदगांधर्वैर्ब्रह्मसारथिमुन्नतं॥८९॥ कृ
त्वामल्लोकमाप्नोति पुनरावृत्तिवर्जितं॥ गृहोत्सवार्थं कुर्वीत पुरुषार्थं रथं शिवे॥९०॥ ईश्वर उवाच॥
मुदेशिभक्त्या परमेश्वरस्य कृत्वाष्टलोष्ठैरपि रुद्रलोके॥ प्रयाति दिव्येन विमानवर्यैः सुरेंद्रपद्मोद्भव
विष्णुवंद्यः॥९१॥ पाल्येन लोष्ठेन शिवं च कृत्वा मृदापि वा पांसुभिरीशलिंगं॥ संपूज्य पुण्यैर्लभते
गणेंद्रनाभक्त्या कृतानां सगणस्य पुण्यं॥९२॥ प्रासादप्रकारं महेशसदने कृत्वा प्रसादं लभेत्॥ अं
भोमुख्यगणेंद्रनामुपगतो र्मदारवंदार्चितः॥९३॥ तस्मिन्नीश्वरमूर्तयः सुविहिताः संस्थाप्य मेधा
युतं॥ पुण्यं प्राप्य समो दते गिरिसुते पातादिशो को स्थितः॥९४॥ यो वाहनानि रुचिराणि राजाश्च भूत
केलासवर्यमगजेंद्रमकरोति भक्त्या॥ दिव्यं सुधांशुवरदीधितिसन्निभागं कृत्वा वृषं मम महोत्सव
कृत्समुक्तः॥९५॥ कृत्वा रथाधिपतये वरचारुचक्रप्रोद्यत्पताककनकोत्तमकुंभमौलि॥ वेदाश्वसा
रथिविधिं रथमीशमूर्तिं संस्थाप्य कर्षति महोत्सवकृत्समुक्तः॥९६॥ ॥इति श्रीशिवरहस्ये म
हादेवाख्ये एकादशांशे प्रासादकरणं नाम सप्तमोध्यायः॥७॥ ॥श्रीमहादेवायनमः॥ ॥
॥ईश्वर उवाच॥ ॥शृणु देवि प्रवक्ष्यामि सूक्ष्मं धर्मं ममैव हि॥ प्रसादजनकं साक्षादल्पायासं मह

ष्फलं॥१॥ गोप्यमेतन्मयप्रोक्तं नाभक्तेषु प्रकाशयेत्॥ रहस्यं नोक्तपूर्वमेतन्नस्माद्यत्नेन धारय॥२॥
दरिद्रोपि शिवं कर्तुं प्रासादं वा शिवालयं॥ संमार्जनादिभिर्वापि प्रसादं शांभवं लभेत्॥३॥ वृत्यर्थं वा
महादेवि शिवक्षेत्रे च कर्म कृत्॥ संमार्जनं तु यः कुर्यान्मार्जन्याम ड्रु सूक्ष्मया॥४॥ चांद्रायणायुतस्या
शीफलं मासाच्छिवालये॥ नाद्भाद्भवत्रा जीर्णाया वंध्यायाक्षीणवत्सका॥५॥ रोगार्तायागोमयं तु नाह्य
समुपलेपने॥ अन्याभ्योगोमयं ग्राह्यं स्थाने व्यापतितं शुभे॥६॥ उपर्यधश्च संत्यज्य गृह्णीया
न्मध्यमं शुभं॥ वस्त्रपूतेन तोयेन यः कुर्यादुपलेपनं॥७॥ शिवालयेति रात्रस्य यज्ञस्य फलमा
प्नुयात्॥ व्रीहिपिष्टैः प्रकुर्याद्यो रंगवल्लीं समालये॥८॥ अग्निष्टोमस्य सफलं प्राप्नोतीशो न संशयः॥
पंचवर्णकपिष्टैश्च पद्मशंखसमाकृतिः॥९॥ रंगवल्लीं शिवस्याग्रे स्वस्तिकाद्यैरलंकृतं॥ वाजिपेय
सफलं नारस्त्री वा समाप्नुयात्॥१०॥ कदलीस्तंभविन्यस्तं तोरणाद्यैरलंकृतं॥ शिवालयं प्रकुर्याद्यः
स चोक्थ्यफलमाप्नुयात्॥११॥ पात्राणि शिवपूजार्थमाहरेच्च यथाबलं॥ मृदश्मदारुजानीशो
धातुजान्युत्तरोत्तरं॥१२॥ अश्मपात्राद्दारुमयं बिल्वोदुंबरपर्णजं॥ स्नानार्घ्यदानविधिषु प्रशस्तं
शिवपूजने॥१३॥ दारवेणार्घ्यपात्रेण यद्दत्वा लभते फलं॥ तस्माच्चतुर्गुणं पुण्यं शिवे मृत्पात्रदा
नतः॥१४॥ ताम्रपात्रादपि श्रेष्ठं कांस्यपैत्तलसंभवं॥ ताम्रपात्राभिषेकेण फलं शतगुणं भवे
त्॥१५॥ पलाशपद्मपत्राभ्यां अर्घ्यं ताम्रसमं भवेत्॥ रौप्यपात्रेण विज्ञेयं तस्माल्लक्षगुणाधिकं॥
॥१६॥ सुवर्णपात्रे च ततो कोटि देवि गुणोत्तमं॥ एवं स्नानार्घ्यनैवेद्यबलिधूपादिभिः क्रमात्॥१७॥

पात्रोत्तरविशेषेण फलं स्यात्परमेश्वरे॥ मृत्कुंभताम्रकुंभेन स्नानं शतगुणोत्तरं॥१८॥ रौप्यं लक्षाधिकं पुण्यं हैमं कोट्यधिकं भवेत्॥ अर्घ्यपुष्पजलोपेतं यः शिवायनिवेदयेत्॥१९॥ स पूज्यः सर्वलोकेषु शिववमोदते भृशं॥ गंधतोयेन संमिश्रं पुष्पार्घ्याद्दशगुणोत्तरं॥२०॥ पंचगव्यसमायुक्तमर्घ्यं त्वनगुणोत्तरं॥ आपः क्षीरकुशाग्राणि घृतं दधि च तंडुलाः॥२१॥ तिलाभिक्षार्थकाश्चैवमर्घ्यमष्टांगमुच्यते॥ घृतं विना क्षतं ग्राह्यमिति केचित्प्रचक्षते॥२२॥ यव तंडुलगोधूममाषैरक्षतमादिशेत्॥ अर्घ्यमष्टांगमापूर्य लिंगमूर्ध्नि विशोधयेत्॥२३॥ दशवर्षसहस्राणि शिवलोके महीयते॥ देवाग्निकार्यमुद्दिश्य देहशुध्यर्थमेव च॥२४॥ कपिलामाहरेद्विद्वान्मुनिदेवादिवंदितां॥ अन्यवर्णगवां क्षीरस्नानेनापि महेश्वरि॥२५॥ कपिलापंचगव्येन घृतक्षीरयुतेन च॥ स्नानं दशगुणं ज्ञेयं इतरस्मान्न संशयः॥२६॥ स्नानं फलशतं ज्ञेयमभ्यंगः पंचविंशति॥ पलानां द्विसहस्रेण महास्नानं विदुः शिवे॥२७॥ पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात्॥ ईशादिमंत्रैः संस्नाप्य शिवलोकमवाप्नुयात्॥ योमां तिलतैलेन करयंत्रोद्भवेन च॥ शिवाभिषेकं कुरुते स मे प्रियतमो भवेत्॥२९॥ अभिषेको दशपलः स्नानार्धं शतमीश्वरि॥ महास्नाने प्रशस्तः कुंभद्रोणत्रयं शिवे॥३०॥ पंचविंशत्पलेनैव लिंगेऽभ्यंगं तु कारयेत्॥ घृतेन वाऽथ तैलेन गंधयुक्तेन वा शिवे॥३१॥ शिवस्य सर्पिषा स्नानं प्रोक्तं फलशतेन वै॥ पलानां द्विसहस्रेण महास्नानं विधीयते॥३२॥ तस्यार्धं मधुना देवि दध्ना तत्समीश्वरि॥ तत्पादतः शर्करया स्नानमेनच्छिवे मम॥३३॥ क्षीरस्नानायुतं देवि दध्ना घृतं भवेत्ततः॥ मधुनासितया

देवि पुण्यं स्यात्तच्छताधिकं॥३४॥ पादस्नानं महादेवि कुंभत्रयमितीरितं॥ क्षीरस्नानं महेशस्य कपिलेनैव
रेण वा॥३५॥ कुर्यात्तस्यापराधानि क्षमते मे शंकरः शानं॥ खंड दध्ना यो अभिषिंचेत्सहस्त्रं क्षमते शिवः॥ वर्ष
कोटिसहस्त्रेषु यत्पापं समुपार्जितं॥ घृताभिषेको लिंगस्य दहेत्सर्वं न संशयः॥३७॥ लिंगस्य दर्श
नं पुण्यं दर्शनात्स्पर्शनं वरं॥ स्पर्शनाद्दर्चनं श्रेष्ठं घृतस्नानमतः परं॥३८॥ मधुस्नानेन देवेशि अश्वमे
धफलं लभेत्॥ मधु बांचत्रयं देवि गिरि द्रोणि भवं वरं॥३९॥ मध्यमं पुष्परसजं यल्मीकं कृष्णमाधवं
॥ सितपास्नापयेमां देवि सर्वजीवव धो द्भवैः॥४०॥ पापैर्न लिप्यते गौरि पुण्यं महदवाप्नुयात्॥ कृष्णा
ष्टम्यां सोमवारे प्रदोषे वा महेश्वरि॥४१॥ घृतस्नानं करोयस्यात्सफलं लभते शिवे॥ कुलेकविंशमु
नार्य शिवलोके महीयते॥४२॥ क्षीरस्नानात्क्षरं त्यं होदेवि जन्मशतार्जितं॥ क्षीरेण दध्नाज्येन नापि
मिनयामधुनाफलं॥४३॥ अभिषिंच्य मुदा लिंगे लभेत्पर्वणि वा शिवे॥ संक्रान्तावयने पाने ग्रहणे
सोमसूर्ययोः॥४४॥ अप्युनं येगवा दद्याद्दोग्ध्रीणां शांभवेषु च॥ वस्त्रे हेमसवत्सानां द्विजवर्ये भुन
लभेत्॥४५॥ नारिकेलोदकेनापि यो अभिषिंचेन्महेश्वरि॥ चरं वा स्थिरलिंगं वा स्नानमात्रेण पुण्य
भाक्॥४६॥ गवामयन यज्ञस्य कदलीफलमाननः॥ फलानां च सहस्त्राणि स्नाने रंभाफले विदुः॥४७॥
शतं वा दशकं वापि समध्यमाधममुच्यते॥ स्नाप्यरंभाफलैर्लिंगं उर्वरादानजं लभेत्॥४८॥ कोशेर्यः फ
नसानां तु अभिषेके शतं शिवे॥ महस्त्रपरमं देवि शतमध्यममुच्यते॥४९॥ एषामेकतमं स्नानं गो
दानदशकं फलं॥ स्नानमिक्षुरसेनापि यो लिंगे सकृदाचरेत्॥५०॥ लभेद्धिर्यं वंशाशानेर्भमलोके महीय

ते॥पक्वाम्रसुरसेर्देवि अभिषिच्य महेश्वरं॥५१॥ जंबीररसारैर्यो लिंगं स्नापयेद्भक्तिसंयुतः॥ विधूय
पापकलिलं सोमयद्वाजने शिवे॥५२॥ कुशतोयेन यो लिंगं स्नाप्य भक्त्या सकृन्नरः॥ कांचनेन वि
मानेन ब्रह्मलोके महीयते॥५३॥ गंधचंदनतोयेन यो लिंगं स्नापयेच्छिवे॥ गंधर्वलोकमासाद्य नि
दिवि गंधर्वपूजितः॥५४॥ पुष्पोदकेन मावित्रं कौबेरं हेमवारिणा॥ रत्नोदकेन चाप्येंद्रं लोकं संप्रा
प्य मोदते॥५५॥ द्रोणत्रयं धर्माराशिं द्रोणपुष्पनिभं शिवे॥ दत्वा लिंगस्य मौले मे सिक्थसिक्थे
श्वमेधजं॥५६॥ पुण्यं स लभते गोशिशिवरात्रो शताधिकं॥ सितेन भस्मना स्नाप्य गंधिना शोधिते
न च॥५७॥ द्रोणपंचकमानेन सोमधाम्नि प्रमोदते॥ कूपोदकाद्यं नाडाकं नाटकाद्या प्यमुत्तमं॥
॥५८॥ नदीनां चैव सर्वासां पुण्यानां चाब्धिसंगजं॥ वरं गांगं महादेवि स्नाने पर्युषितं न मे॥५९॥
वस्त्रपूतेन तोयेन यो लिंगं स्नापयेत्सकृत्॥ सर्वकामसमृद्धात्मा वारुणं लोकमाप्नुयात्॥६०॥
पाटलोत्पलपद्मानि करवीराणि चंपकं॥ स्नानकालेंबु योज्यानि कह्लानि सुरभीणि च॥६१॥
तेनाभिषिच्य लिंगं मे राजसूयफलं लभेत्॥ कर्पुरागरुतोयेन यो लिंगं स्नापयेन्नरः॥६२॥ यः स
सर्वविनिर्मुक्तः प्रयाति शिवमंदिरं॥ पितॄन्समुद्दिश्य यो लिंगं स्नापयेच्छीतवारिणा॥६३॥ तस्मात्
सर्वे प्रयास्यंति पितरो नरकादपि॥ लिंगं स्नाप्य महादेवि जलाविछिन्नधारया॥६४॥ ग्रीष्मे गलं
तिकाभिर्वा नैरंतर्यं दिवानिशं॥ समे गणेशतुल्यः स्यादश्वमेधायुतं लभेत्॥६५॥ श्रीखंडद्रवसा
रेण यो विलिंपेदुमा सर्वं॥ ग्रीष्मर्तौ सकलानैर्वा पौंडरीकफलं लभेत्॥६६॥ कृष्णागरुं देवदा

रूंप्रभवाश्रितरोरपि॥ गंधंदत्वाचंद्रमौलेर्द्वादशाहफलंलभेत्॥ त्रिफलंचंदनंप्रोक्तंकुंकुमंतत्समंस्मृ
तं॥ कर्पूरंतुतदर्धस्याद्धुनसारश्चतत्समः॥६८॥ पलमेकंतुकस्तूर्यामेलनाद्यक्षकर्दमः॥ यक्षकर्द
मपंकेनयोविलिप्यमहेश्वरं॥६९॥ सायिनचित्यायुतमखफलमाप्नोतिमानवः॥ लिंगमूर्तेर्ममेकंतु
कस्तूर्यामेलनाद्यक्षकर्दमः॥७०॥ यक्षकर्दमपंकेनयोविलिप्यमहेश्वरं॥ सायिनचित्यायुतमखफ
लमाप्नोतिमानवः॥७१॥ लिंगंमूर्तेर्महेशस्यपशिवस्यपरमात्मनः॥ स्नानकालेप्रकुर्वीततौर्यत्रिक
रवंशिवे॥ भेरीमर्दलशंखानांकाहलंवरदुंदुभिः॥ वीणावेणुमहाढक्कापटहानकडंबराः॥७३॥
कांस्यझल्लरवाद्यंभोचर्मवाद्यंविशिष्यते॥ ततोमुखेनचाध्मानंततस्तंत्रीभवंततेने॥७४॥ एवंवादि
त्रघोषंयोप्रकुर्यात्स्नानकर्मणि॥ वंशालक्षयुतोधीमान्ममलोकेमहीयते॥७५॥ नाट्यार्थंमंगनाजा
लंलयशिक्षासमन्वितं॥ तरुणंरूपसंपन्नंगेयवादित्रकोविदं॥७६॥ दत्वालिंगालयेभद्रेसर्वाँऋ
षिमवाप्नुयात्॥ घृताभ्यंगेघृतस्नानेलिंगस्याद्विरूषितं॥७७॥ यवगोधूमजैश्चूर्णैःकषायैर्गंधयो
जितैः॥ कवोष्णेनांबुनादिविस्नापयेत्तदनंतरं॥७८॥ घर्षयेद्बिल्वपत्रैश्चलिंगपीठंसुशोधयेत्॥
दशधेनुसहस्राणिददतःफलमाप्नुयात्॥७९॥ कपिलापंचगव्येनकुशवारियुतेनच॥ स्नापयेन्मंत्र
पूतेनब्रह्मस्नानमघापहं॥ ८०॥ ॥ ईश्वरउवाच॥ ॥ शंखानांचसहस्रकैःश्वशतकैःधारासह श्रीशिव
स्रौघटैःकुंभैश्छिद्रशतानाष्टकैर्वरगवांश्रृंगाग्रधारादिभिः॥ स्नानपंचामृतभवैर्महेशाजनिम
श्रीरुद्रमंत्रैःशिवेक्षीराज्यादिदधीमधुप्रभवजासारोरुधारायुतंपुण्यंप्राप्यसमोदनेगिरिसु-

ते कैलाससमीपे लीयते गणः॥ ८१॥ ॥इति श्रीशिवरहस्ये महादेवाख्ये एकादशांशे ऽष्टमोध्यायः॥८॥ ॥
॥श्रीमहादेवाय नमः॥ ॥ पार्वत्युवाच॥ ॥पुष्पैः कतिविधैः पूजा कर्तव्या कथयस्व मे॥ ॥ईश्वर
उवाच॥ ॥ पुष्पैरारण्यसंभूतैः पत्रैर्वा गिरिसंभवैः॥ अपर्युषितनिश्छिद्रैः प्रोक्षितैर्जंतुवर्जितैः॥१॥
आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेच्छिवं॥ २॥ पुष्पजातिविशेषेण भवेत्पुण्यं ततोधिकं॥ तपश्शी
लगुणोपेते पात्रे वेदस्य पारगे॥ ३॥ दत्वा सुवर्णमथुलं तत्फलं कुसुमे शुभे॥ दश दत्वा सुवर्णानि य
त्फलं तदवाप्नुयात्॥ ४॥ अर्कपुष्पेपि वैकस्मिन् शिवाय विनिवेदयेत्॥ एवं पुष्पविशेषेण फलं त
स्य ततोधिकं॥ ५॥ पुष्पजातिविशेषेण यथा स्यात्तन्निबोध तत्॥ अर्कपुष्पसहस्रेभ्यो बकपुष्पं विशि
ष्यते॥ ६॥ बकपुष्पसहस्रेभ्य एकं धुर्धुरकं परं॥ धुर्धुरका सहस्रेभ्यो बृहत्पुष्पं विशिष्यते॥ ७॥ बृ
हत्पुष्पसहस्रेभ्यो करवीरं विशिष्यते॥ करवीरसहस्रेभ्यो बिल्वपत्रं विशिष्यते॥ ८॥ बिल्वपत्र
सहस्रेभ्यो पद्ममेकं विशिष्यते॥ पद्मपुष्पसहस्रेभ्यो द्रोणपुष्पं विशिष्यते॥ ९॥ द्रोणपुष्पसह
स्रेभ्यो कुशपुष्पं विशिष्यते॥ कुशपुष्पसहस्रेभ्यो शमीपुष्पं विशिष्यते॥ १०॥ शमीपुष्पसहस्रेभ्यो
श्रीमन्नीलोत्पलं वरं॥ सर्वेषामेव पुष्पाणां प्रबलं नीलमुत्पलं॥ ११॥ नीलोत्पलसहस्रेण यो मालां
संप्रयच्छति॥ अलाभे तु सहस्राणां तदर्धार्धेन मल्लिका॥ १२॥ शिवाय विधिवद्दत्वा तस्य पुण्यफ
लं शृणु॥ कल्पकोटिसहस्राणि कल्पकोट्ययुतानि च॥ १३॥ वसेच्छिवपुरे श्रीमान् शिवतुल्यप
राक्रमः॥ शेषाणां पुष्पजातीनां यत्फलं परिकीर्तितं॥ १४॥ तत्फलस्यानुसारेण शिवलोके महीयते॥

राप्याश्चैवब्रह्मत्याश्चतुल्यंकुसुममुच्यते॥१५॥ करवीरसमाज्ञेयाजातीविजयपाटला॥ श्वेतमंदारकु
सुमंसितपद्मसमंभवेत॥१६॥ नागचंपकपुन्नागधुर्धुरकसमाश्रितः॥ केतकीमागधीचैवह्यदिकाच
मदंतिका॥१७॥ शिरीषसर्जबंधूकाकुसुमानिविवर्जयेत्॥ अंकोलकूर्मपत्रंचकरंजेंदुतरुद्रवं॥१८॥
वैभीतकानिपत्राणिनत्सुष्पाणिचवर्जयेत॥निर्गंधान्युग्रगंधानियानितानिविवर्जयेत॥१९॥गंधवं
त्यपवित्राणियानितानिविवर्जयेत्॥ गंधहीनमपिग्राह्यंपवित्रंयत्कुशादिकं॥२०॥सात्विकंतद्धिकु
सुममपवित्रंनुतामसं॥ कनकानिकदंबानिरात्रौदेयानिशंकरे॥२१॥ दिवाशेषाणिपुष्पाणिदिवारा
त्रौचमल्लिका॥पात्रौस्वर्णकदंबानिअर्धरात्रौचमल्लिका॥२२॥ प्रहरंतिपदेनजानिकरवीरमह
र्निशं॥कीटकेशापविद्धानिशीर्णपर्युषितानिच॥२३॥ स्वयंपतितनपुष्पाणित्यजेदुपहतानिच॥
मुकुलैर्नार्चयेद्देवअपक्वंननिवेदयेत्॥२४॥ फलंक्वचिनविधंचपक्वात्यक्वमपिसमर्पयेत्॥अलाभे
सतिपुष्पाणांतत्पत्राणिनिवेदयेत्॥२५॥पत्राणामप्यलाभेतुफलान्यपिनिवेदयत॥फला
नामप्यभावेतुतृणगुल्मौषधीरपि॥२६॥औषधीनामभावेतुमानसंप्रवरंशुभं॥प्रत्येकमुक्तपु
ष्पेषुदर्शसौवर्णकंफलं॥२७॥स्त्रक्नितिबंधेषुतेष्ववद्विगुणंफलमिष्यते॥यःसुगंधैर्मुक्तपुष्पैःलिं
गंसम्यक्प्रपूजयेत॥२८॥मालाभिर्वासुगंधाभिःसोनंतत्फलमाप्नुयात॥विल्वपत्रैरखंडैर्यस्तसक
ल्लिंगप्रपूजयेत॥२९॥सर्वपापविनिर्मुक्तःशिवलोकेमहीयते॥धत्तूरकैश्चयोलिंगंसकृत्पूजयतेनन
रः॥३०॥सगोलक्षफलंप्राप्यशिवलोकेमहीयते॥ बृहतीकुसुमैर्भक्त्यायोलिंगंसकृदर्चयेत॥३१॥ग

गवामयुतदानस्य फलं प्राप्य शिवं व्रजेत्॥ मल्लिकोत्पलपद्मानि जातीपुन्नागचंपकैः॥३२॥अ
शोकश्वेतमंदारकर्णिकारसुमानि च॥ करवीरार्कमंदारशमीपाटलकेसरं॥३३॥ कुशापामार्गकुमुदा
कदंबद्रोणकानि च॥ सौगंधिकासमानामसिंधुवारफालिकार्जुनैः॥३४॥ तुलसीकुरवंकोलनारावं
चलसंभवैः॥ नंद्यावर्तैश्च शम्यागतिलकैर्नवमालिका॥३५॥ तरूपुन्नागदंतीचमालतीकुटजात
पः॥ पुष्पैरेतैर्यथालाभं योनरो पूजयेच्छिवं॥३६॥ स च यत्फलमाप्नोति तदेकाग्रमनाः शृणु॥ सू
र्यकोटिप्रतीकाशैर्विमानैः सर्वकामिकैः॥३७॥ पुष्पमालापरिक्षिप्तैः गीतवादित्रनिस्वनैः॥ तंत्रीम
धुरवाद्यैश्च स्वच्छंदगमनालसैः॥३८॥ रुद्रकन्यासमाकीर्णैर्देवदानवकिन्नरैः॥ चामरैर्वीज्यमाने
श्च स्तूयमानः सुरासुरैः॥३९॥ गच्छेच्छिवपदं दिव्यं यत्र वासश्चिरं भवेत्॥ यैस्तैर्गोपीहकुसुमैर्जलस्क
रुहैः शिवं॥४०॥ संपूज्य प्राप्नोत्यभ्यर्च्या शिवलोके महीयते॥ शिवस्योपरि यः कुर्यात्सुखसंपुष्पमं
डपं॥४१॥ शोभितं पुष्पमालाभिरापीडलंबितं॥ अत्याश्चर्यमहायत्नैः दिव्यपुष्पोपशोभितैः॥
॥४२॥ सर्वोपरिचरश्रीमान्गच्छेद्दिव्यपुरं सुखी॥ अनेकाकाररचिन्यस्तैः सुगंधकुसुमैर्गृहं॥
॥४३॥ यः कुर्यात्सर्वकालेषु विचित्रकुसुमोज्वलं॥ सुपुष्पकविमानानां सहस्रैः परिवारितः॥
॥४४॥ दिव्यस्त्रीसुखसंभोगक्रीडारतिसमन्वितः॥ अक्षयं मोदते कालंमन्निरंशोनत्रासनः॥४५
शिवाद्रिसर्वलोकेषु यत्रस्कंनत्रयानिसः॥ पूजासु भक्तिविन्यासवेदनादिषु सर्वदा॥४६॥ फलमे
वं समासेन दातुर्विज्ञानुसारतः॥ फलमिष्टं समाप्नोति लिंगं संपूज्य येन्नरः॥४७॥ शिववत्सुप

त्राद्यनंदवन्मोदते चिरं॥ लिंगवेदीभवेद्देवी लिंगं साक्षान्महेश्वरः॥ ४८॥ तयोः संपूजनं भक्त्या देवीदेवश्च पूजितौ॥ स्वयमुत्पाद्य पुष्पाणि यः शिवं पूजयेत्सदा॥ ४९॥ नानिसाक्षात्प्रगत्कानि न दुष्कः सततं शिवः॥ यः कुर्यात्तु शिवारामं मामं बिल्वादिशोभितं॥ ५०॥ जातीविजयराजाङ्कुकरवीरार्ककुब्जकैः॥ पुन्नागबकुलैश्चैव अशोकोत्पलचंपकैः॥ ५१॥ कदलीयूथहेमाद्यैः तस्य पुण्यफलं शृणु॥ यावत्तत्पत्रकुसुमबीजमूलफलानि च॥ ५२॥ तावद्वर्षसहस्रेण रुद्रलोके महीयते॥ न पर्युषितदोषोस्ति बिल्वपत्रस्य धांकरि॥ ५३॥ बिल्वानां चूर्णमपि वा पातयेल्लिंगमूर्धनि॥ नाबिल्वं पूजयेल्लिंगं अन्यतन्त्रामपोजयेत्॥ ५४॥ अपामार्गैः दर्भपत्रैः पूजने तत्रव संभवेः॥ अर्हनिर्नित्यं कृतैः पापैः मुच्यते नात्र संशयः॥ ५५॥ पत्रेषु बिल्वपत्रं स्यात्सुख्यनीलोत्पलं प्रियं॥ ततत्र्लंभवं चान्यत्प्रियमेपरमेश्वरि॥ ५६॥ महत्रिषणे जाजीकरवीरमहर्निशं॥ तुलस्यां बिल्वपत्रेषु सर्वेषु जलजेषु च॥ ५७॥ न पर्युषितदोषोस्ति बिल्वस्या वर्षमीश्वरि॥ पद्मं पंचदिनात्यां ज्यं शेषं पर्युषितं दिनात्॥ ५८॥ सुभिर्यः पुष्पलक्षेमां समभ्यर्च्यैव मुक्तिभाक्॥ तस्याहं मुक्तिदं ज्ञानं प्रयच्छाम्यवशांकरि॥ ५९॥ ईश्वर उवाच॥ ॥
बिल्वापामार्गजाजी तुलसीशमिबहल्केतकी॥ भंगदूर्वामंदाभोजाहिदर्भामुनिनिलानगरब्रसकह्लारमल्ली॥ ये चाश्वारातिकुंभीदमनमरुबकाबिल्वनो ■ ह्रालिशस्ता॥ र न त्वपर्युषितं नचैवकलितं वतैर्विहिनं शिवे॥ ६०॥ दुर्गंधाद्युपहं त्रिकेन कमहापद्मादिनार्च्ये शिवे॥ छित्वाने वनिपातये सुममुमेसंपूर्णमेवार्चयेत्॥ ६१॥ सोवर्णेषु च रत्नगर्भकलितेनो पर्युषुत्वे विधिः॥ स्वारामोद्भवमे

वपुष्पमर्गजैमत्पूजनार्हंभवेन्॥ ६२॥ नोश्मूद्दक्रयलब्धमाहृतमधोयात्वेवतत्पूजनात्॥ भूमौवापति
तेरपिस्पृष्टानिचेत्स्नानाद्विहीनोनरः॥ पुष्पेत्वेवमयंविधिः भवंतिमनोबिल्वपत्रेतमे॥ अकारस्य
पत्रंचकपित्थपत्रंनिर्गुंडिकावारणबिल्वपत्रं॥ ६४॥ पंचैवबिल्वानिममेशिपूजनेप्रशस्तरूपंप्रि
यमेवबिल्वं॥ वसुधाराधिपमित्रपादपूजावसुधाधन्वरहारपादसाश॥ ६५॥ सकृदारग्वधपुष्प
तोर्च्यलिंगेसकलप्राणिवधोत्थपापमुक्तः॥ गोरीपल्लकलिंगपूजनरतोमल्लीभिरेवादरात्मल्ली
भिर्नियमेनमलयरतोगल्लस्यवाद्यंचरन्॥ ६६॥ हृल्लीलास्थलयानुगेममकृपावल्लीप्ररोहंगतात्तस्मि
न्नेवसमुल्लसत्यनुदिनंमल्लापनस्तस्यहि॥ ६७॥ राम्पाकबंधूकमधूककिंशुकैःधत्तूरकार्कै
श्चवकैस्समर्च्यनशोककश्रूकंलभनेमनुष्योप्यशोकसौख्यंलभनेधरायां॥ शर्जेलिपापान्निकिला
द्रिकन्येमन्येर्जुनीसुमगणेममपूजकश्च न॥ नर्जेननवैयमभटोघकुलानिनश्यभर्जंतिफालफल
फीकलिनासरणि॥ कुःशोकशंकावसरोभवानिअशोककाशार्चनवंशकोटौ॥ ६९॥ पराकरुक्ष्र
चरणादपीच्छंवराककस्यापिविशोध्यमंहसां॥ बकुलार्चननोनचाकुलोभवेत्हीनकुलोपिलिंगमौ
लौ॥ सहिकालानलजालफालमूलंनहिपश्येत्कुलशैलबालकन्यके॥ पारिभद्रसुमपूजयाशिवेवी
रभद्रगणयोममलीलः॥ भद्रमेवलभतेजिननंद्रोरुद्रश्ववसमभवेल्लदीरिद्रः॥ शिवेमरुबकैर्बकै
र्दमनकैश्वसचंपकैलथाकुरुबकैर्धवैः॥ ७२॥ कनकनागपुन्नागकैःसमर्च्यशिवमंहसांप्रवरा
शापारंगतोप्युनाहरहोरकमप्यतुलतुंगलिंगेमम॥ ७३॥ कदलीफलपुष्पपूजयादलितांन्येवभवंति

पानकानि॥ गलितान्यथ नमस्य दुःखजालान्यमितान्यथ सत्यमेव गौरी॥ ७४॥ धुर्त्तरो भैर्वधैः ध्रुवशानज
कालेप्यचलितो चलमेरोलाज्जोधिवधिर सिपुष्यार्चकवरः॥ ७५ तथाजं बूनिंब प्रभवसुमसेफालि
कुसुमैकुरंटैरर्चा माभवनिकुटजैरप्यतुलिता॥ कुशाकाशसुमार्चको यदि स्यामथि भक्तोंबर केचालिं
गे॥ ७६॥ यमपाशाकशाभिपातदुःखं न भवेजातु कदाचिदस्य गौरि॥ भूनास्वपामार्गदलैः समभ्यालिं
गमंमांगे विशनेस धन्यः॥ ७७॥ कनिष्ठजन्मापि स गर्भदुःखं न वेत्सुयाज्ज्ञालु सुदर्भनोर्च्य॥ जिनेनमद
सौरभैट समविल्वपुष्पैर्दलैः सुसौरभसुमे॥ शिवेन न वसंतकालोत्थितैः मेमेष्ठजनिमार्चनं यदि लभते
भाग्यान्निशा सुवरकेतकीकुसुमपूजकोधन्यधीः॥ ७८॥ यः पुंडरीककुसुमैः नेव वंद्रखंडलीलाल
काकलितलिंगसुपूजकश्चेत्॥ आखंडलादिसुरवंदितपादपीठः श्वंडांशुजातवदनं न स जातु प
श्येत्॥ ७९॥ कमलैरमलैर्महेशलिंगं शतपत्रैः शतपत्रमित्रनेत्रं॥ परिपूज्य लभते कलत्रपुत्रंमरव
सत्रादधिकं न पुण्यवर्षं॥ ८०॥ बिंबांभदाडिंबकदंबपुष्पैरंबापतेः प्रियतमोत्तमचारुलिंगं॥ वं
दारुवृंदोत्तममौलिवंद्यो वंधाद्विमुक्तिमघगंधसुमैर्लभेत्॥ ८१॥ अतसीतुलसीभिरीशलिंगं कु
मुदैरप्यसटैर्मुदाभवानि॥ सकृदीश्वरि पूज्य वन्यपुष्पैः यदि सामान्यनरो भवेत्स धन्यः॥ ८२॥ अ
र्कद्र यंचकरवीरमुनिंद्रपुष्पैः धात्रीपवित्रकुसुमैर्वरजातिकाभिः॥ द्रोणैश्चनंदिकुसुमैररसमैः कदं
बैः सोमंतिकात्रपसुमैः परिपूज्य धन्यः॥ ८३॥ जातेन किं तेन न पारिजातनःपुजाकरं यस्य न मानसं स्या
त्॥ मंदोऽपि मंदारसुपुष्पपूजया वाचस्पतिं निधिक्कुरुते सभासु॥ ८४॥ शमीकुशमपूजया सुमराशरि

ल्लिंगे शिवेन्द्रा रासरि वनीरगोपुरगोवेरि येगानिगः ॥ भयोधन्विरसंभ्रमैरघवराब्धिमध्यंगतो तं नरो नि
रंतरमनुस्मरेच्छमनजानभीत्युज्झितः ॥ ८५ ॥ सर्वीवमेधनानकादपि दूर्वयार्च्याशार्यं लभतिपुण्यफ
लंचसर्वे ॥ सर्वीवराजीविधिजदानकृतां च लोकं कालस्यगर्वमपनीयनिमर्गाग्यः ॥ ८६ ॥ सौवर्णवर्ण
समंदिव्यसुकर्णिकारैः संपूज्यलिंगमगजेसफलेपिवर्णैः ॥ पर्वण्यपिप्रथितदोषहरप्रदोषपर्णोप
नैःप्रियनरोगतापःसनूर्णं ॥ ८७ ॥ मितामितसुपाठलीपटलपुष्पसंपूजयासपाठयतिपातकद्रुमवनंक
टेमेशिवे ॥ ससंकलंकुलेसदानहिसजातुपश्येयंनरोसकंटकपथंशिवेयमभटोरुदंडाहतः ॥ ८८ ॥
मंदारसुंदरसुमैररविंदवृंदैःकुंदैकदंबनिचयैःवरपापरंदैः ॥ माकंदकंदलदलैर्गिरिजेससुक्रोनंदा
पमेभवतिचेदकलावतंसलिंगार्चनेनसनिशासुदिवास्वपीडः ॥ ८९ ॥ ईषच्छिरीषकुसुमैर्मभिलिंग
मोलौयोबान्नरक्तहृदयःसंविशेषयेच्च ॥ पापौघतापगणनांगणपुंगवेंद्रोभद्राणिसोद्यलभतेससुरोघनं
घः ॥ ९० ॥ उत्फुल्लहल्लकुसुमैर्मृगवालुपाणिंलिंगार्चनेननफलंभन्नसजातुकालं ॥ आयल्लकोभवतिस
र्वेधराधिनाथवंघाघ्रियुग्मनरवचंद्ररुचिर्भवानि ॥ विष्णुक्रांतसुमैर्मदीयमगजेशलिंगंसकृत्पूजयन्
संक्रांतावपिपातकान्यपिनरंनैवाक्रमंतिध्रुवं तस्याक्रांतिरथानिमेसुरवपुतामपाचमुल्लंगताह
स्त्राक्रांततरालभेतसुलभास्त्यंनतेविस्मयः ॥ ९१ ॥ यमवदंनरदनोरघोषभीषनहिपत्रेपत्रसभयंभ
यानि कृतसक्रंदनवदनोमहात्मामदनारिंदमनैरथार्च्यचेत्रे ॥ ९२ ॥ मंदारांबुजमल्लिकासुकुसु
मीमालांचनीलोत्पलैःपुन्नांयोप्रददातिशंकरमहालिंगेमहस्त्रैःकृतां ॥ तस्याधोर्धसुसंस्थपासुविहि

नास्यात्प्रीतयेमुक्तिदामुक्ता पुण्यसमर्चनादपिसदासंप्रीतयेमेपरा ॥९३॥ पुण्याध्यायमिमंसदेवहृदयो
धार्योहिवर्यैःसदाकार्यस्यान्ममपूजनंसुविहितंधीर्योन्नतैःशैलजे ॥ गांर्वचाप्यपहृत्यधैर्यपरमैःस्वे
नार्जितैःपावनैःरर्चोहंभुविसादरंसुमगणैर्दीनोभवेत्यानकैः ॥९४॥ ॥इतिश्रीशिवरहस्येमहादे
वाख्येएकादशेअंशेपुण्याध्यायोनामनवमोध्यायः ॥९॥ ॥श्रीमहादेवायनमः॥ ॥ईश्वरउवाच॥
वक्ष्येपूजाविधिंदेविममलिंगेविशेषतः ॥ नक्षत्रेषुविशेषेणफलंस्यात्कृतपूजया ॥१॥ प्रथमायांद्विज
स्नात्वावाग्यतोभक्तिमांवर ॥ भस्मत्रिपुंड्ररुद्राक्षमालालंकृतविग्रहः ॥ उपलिप्यसमांभूमिंगोमये
नस्वयंशिवे ॥ आसनंपरिकल्प्यास्मिंनवाह्यवषभंततः ॥३॥ लिंगमूर्तिमहादेवंस्नाप्यपुण्योदकेन
च ॥ पंचाक्षरेणमंत्रेणप्रतिष्ठाप्यवरासने ॥४॥ पुष्पैश्वबिल्वपत्रैश्च पूजयेद्गिरिकन्यके ॥ धूपदी
पादिकंदत्वानैवेद्यंचैवबुद्धिमान ॥५॥ प्रदक्षिणत्रयंकृत्वास्तोत्रैस्तुत्वाभिवंद्यच ॥ दद्यात्पूजाफ
लंतस्मैनफलंकांक्षयेद्बुधः ॥६॥ ब्रह्महत्याकृतंपापंछित्वापूर्वोक्तमार्गतः ॥ द्वितीयायांतथास्नात्वा
ब्रह्मचर्यपरायणः ॥ पंचाक्षरेणमंत्रेणस्नाप्यलिंगंसमाहितः ॥ तिलैश्चतंडुलैःपुष्पैःपूज्यपूर्वो
क्तमार्गतः ॥८॥ हविर्निवेद्यमेधावीदिनमेकमुपोषितः ॥ सुरापानकृतंपापंस्वर्णादध्वाद्यगछति
॥९॥ तृतीयायांतथापूजाशिवलिंगंसमाहितः ॥ ब्राह्मणान्भोजयित्वातुस्वर्णस्तेयाद्विमुच्यते ॥
॥१०॥ चतुर्थ्यांशंकरंभक्त्यापूज्यपूर्वोक्तमार्गतः ॥ यथाशक्तिधनंदत्वाब्राह्मणायसमाहितः ॥ गुरु ११ ॥ गुरु
तल्पगदोषेणमुच्यतेनात्रसंशयः ॥ पंचम्यांतंडुलैर्वपूज्यपूर्वोक्तमार्गतः ॥१२॥ महत्पातकिसंसर्गो

दोषान्मुक्तोभवेन्नरः॥ षष्ठ्यांघृतेनचस्नाप्यचंदनेनघृतेनच॥१३॥ महापातकदोषेणमुच्यतेनात्र
संशयः॥सप्तम्यांशुद्धतोयेनस्नाप्यपुष्पैःप्रपूजयेत्॥१४॥क्षुद्रपापात्प्रमुच्येतनमुनेनात्रास्तिसंश
यः॥अष्टम्यांपंचगव्येनस्नाप्यतोयेनशंकरं॥१५॥सर्वपापविनिर्मुक्तःशिवलोकमवाप्नुयात्॥ नवम्यां
पूज्यदेवेशंसर्वान्कामानवाप्नुयात्॥१६॥ दशम्यांमीश्वरंपूज्यसर्वपापैःप्रमुच्यते॥ एकादश्यांशुचिस्नात्वा
भोजनेनविवर्जितः॥१७॥शिवंशुद्धोदकैःस्नात्वाशिवलोकेमहीयते॥ द्वादश्यामभिषिच्येशंगुग्गु
लंधूपयेन्नरः॥१८॥ब्रह्मलोकमवाप्नोतिनात्रकार्याविचारणा॥ त्रयोदश्यांशिवंपूज्यशंकरंचंदनैःस
ह॥१९॥विलिप्यसर्वपापेभ्योमुच्यतेनात्रसंशयः॥चतुर्दश्यांमहादेवंस्नाप्यपूर्वोक्तमार्गतः॥२०॥
तिलतंदुलपुष्पाद्यैःपूज्यविप्रंतुभोजयेत्॥अभीष्टसकलंलब्ध्वाशिवलोकेमहीयते॥२१॥पंचद
श्यांशुचिस्नात्वातोयेनैवाभिषेचयेत्॥२२॥ पुष्पैर्नानाविधैःपूज्यंब्राह्मणान्भोजयेन्मुदा॥ ऐश्वर्यम
चलंलब्ध्वाप्रेत्यस्वर्गेमहीयते॥२२॥ अश्विन्यांदेवमाराध्यब्राह्मणान्भोजयेन्नरः॥ अश्विनीलोक
माप्नोतिनात्रकार्याविचारणा॥२३॥भरण्यांरुद्रमाराध्यब्राह्मणंभोजयेन्नरः॥ यमलोकमवाप्नोति
यावदाचंद्रतारकं॥२४॥ कृत्तिकायांशिवंपूज्यब्राह्मणानेवभोजयेत्॥ अग्निलोकमवाप्नोतिमु
नेनात्रविचारणा॥ रोहिण्यांशंकरंपूज्यब्राह्मणायान्नदोनरः॥ सर्वपापविनिर्मुक्तोब्रह्मलोकमवाप्नु
यात्॥२६॥ मृगशीर्षेमहादेवंपूज्यान्नंवस्त्रमेववा॥ ब्राह्मणायाददत्स्वाचंद्रलोकेमहीयते॥२७॥
आर्द्रायांदेवमाराध्यःदद्याद्ब्रह्मविदेधनं॥ सम्यक्ज्ञानमवाप्नोतिनात्रकार्याविचारणा॥२८॥

आदित्येपोर्चयित्वेशं ब्राह्मणानेवभोजयेत्॥ आदित्यलोकमाप्नोति सपुनर्ब्रह्मगच्छति॥२९॥ पुष्येपु
ष्पमहादेवंविप्रायान्नंददातियः॥ बृहस्पतिसमोबुध्याभवेदत्रनसंशयः॥३०॥ अश्लेषार्क्षेमहादेवं
पुज्यपुष्पंददातियः॥ नागलोकमवाप्नोतिनपुनस्तत्रजायते॥३१॥ मघेदेवंसमाराध्यंतिलानांमोद
कंनरः॥शिवंवाद्रोणयुग्मंयाब्राह्मणायददातियः॥३२॥ सर्वपापविनिर्मुक्तःपितृलोकमवाप्नुयात्॥
भगनक्षत्रकेभक्त्यापूज्यदेवंत्र्यंबकं॥३३॥ यथाशक्तिप्रदानेनभगलोकमवाप्नुयात्॥ उत्तरेशिव
मभ्यर्च्यगोर्ददातिद्विजातये॥३४॥सर्यलोकमवाप्नोति नात्रकार्याविचारणा॥ हस्तेपूज्यमहादेवं
दत्वाब्रह्मविदेधनं॥३५॥सूर्यलोकमवाप्नोतिसौख्यंचानंत्यमश्नुते॥ चित्रायांईश्वरंपूज्यदत्वाभ
र्माङ्गुलीयकं॥३६॥त्वष्टारंप्राप्यतेनैवसहरुद्रमवाप्नुयात्॥ स्वातौसोमंसमभ्यर्च्यब्राह्मणानपि
पूजयेत्॥३७॥ वायुलोकमवाप्नोतिसौख्यंचानंत्यमश्नुते॥विशाखेपूज्यदेवेशंदत्वावेदविदेधनं॥
॥३८॥ ईशानित्वमवाप्नोतिशिवंप्राप्नोत्यसंशयः॥ अनुराधादिनेमासादीपपूज्यवृषध्वजं॥३९॥
दत्वाब्राह्मणहस्त्यर्थंमैत्रलोकमवाप्नुयात्॥ ज्येष्ठायांशिवमाराध्यदत्वामाषंद्विजातये॥
४०॥इंद्रलोकमवाप्नोतिमुनेनात्रविचारणा॥मूलेमहेश्वरंपूज्यंब्राह्मणायददातियः॥४१॥अन्नं
सम्नैर्कृतंलोकंगत्वारुद्रमवाप्नुयात्॥ पूर्वाषाढेमहादेवंपूज्यपुष्पंददातियः॥४२॥सयातिवारुणंलो
कंनात्रकार्याविचारणा॥उत्तराषाढनक्षत्रेपूज्यदेवंत्रियंबकं॥४३॥ दत्वातंडुलमन्यद्वाब्राह्मणा
यानसूयवे॥ ब्रह्मलोकमवाप्नोतिनात्रकार्याविचारणा॥४४॥रुद्रेशानमभ्यर्च्यब्राह्मणायानस्

श्रीशिव

यवे॥ दत्वा वस्त्रं हिरण्यं वा वारुणं लोकमवाप्नुयात्॥५५॥ पूर्वाभाद्रपदे पूज्ये पुराणं परमेश्वरं॥ मेकपादभवं याति मुने नात्र विचारणा॥५६॥ यस्तु पूज्योत्तरे भाद्रे शिवं परमकारणं॥ ब्राह्मणाय विनीताय ददाति धनमुत्तमं॥५७॥ अहिर्बुध्न्यमवाप्नोति नात्र कार्या विचारणा॥ रेवत्यामपि पूज्ये शं दत्वा विमाय भोजनं॥५८॥ सूर्यलोकमवाप्नोति सत्यं सत्यं वदाम्यहं॥ अर्कवारे महादेवं त्रिः कृत्वा नु प्रदक्षिणं॥५९॥ प्रणम्य दंडवद्भूमौ भक्त्या परमया सह॥ स्नानस्त्रक्चंदनाद्यैस्तु स्वशरीरमलंकृते॥६०॥ भोग्यं ददाति यो वेश्याः यथेष्टं शिवयोगिने॥ तस्याः पुण्यफलं ब्रह्मन् शृणु वेदविदांवर॥६१॥ ब्रह्महत्या सुरापानस्वर्णस्तेयादि पातकैः॥ मुच्यते नात्र संदेहो मद्भक्तस्येह पूजनात्॥६२॥ इह लोके मुने पुंसां वल्लभा भवति ध्रुवं॥ आयुरारोग्यमैश्वर्यमपि प्राप्नोत्यसंशयः॥६३॥ प्रेत्य सूर्यप्रतीकाशैर्गणैर्विमानैः बहुभिः सह॥ पार्वतीलोकमाप्नोति सुखं चाक्षयमश्नुते॥६४॥ अर्कवारे नु विद्वांसं धनं दत्वा तु भोजयेत्॥ वेश्यामलंकृतां ब्रह्मन् तस्य पुण्यफलं शृणु॥६५॥ सर्वपापविनिर्मुक्तो सर्वैश्वर्यमवाप्नुयात्॥ प्रेत्य चेश्वरमाप्नोति मुने नात्र विचारणा॥६६॥ सोमवारे महादेवं दृष्ट्वा भूमौ प्रणम्य च॥ वस्त्रं वा धनमन्यद्वा ददाति शिवयोगिने॥६७॥ संकराच्चापि मुच्यंते पापैः सर्वैर्न संशयः॥ भौमवारे महादेवं प्रणम्याशिवयोगिनि॥६८॥ ददाति धनमन्यद्वा स युद्धे जयमाप्नुयात्॥ बुधवारे विरूपाक्षं प्रणम्य भुवि दंडवत्॥६९॥ अभ्यंगं योगिनं कुर्वन् आरोग्यं शीघ्रमवाप्नुयात्॥ जीववारे शिवं दृष्ट्वा प्रणम्य परमेश्वरं॥७०॥ ज्ञानिनं भोजयित्वा तु शीघ्रं ज्ञानमवाप्नुयात्॥ शुक्र

वारेमुने दृष्ट्वा प्रणम्य च वृषवाहनं ॥६१॥ शिवयोगिकरे दत्वा यत्किंचिद्धनमुत्तमं ॥ वंध्यापुत्रमवाप्नोति वर
श्चाप्नोति कांक्षितं ॥६२॥ मंदवारे महादेवं नमस्कृत्य तु योगिने ॥ ददाति धनमत्यल्पमपि यो मुनिसत्तम ॥
६३॥ स राजा वल्लभो भूत्वा धनमक्षयमाप्नुयात् ॥ यतीपाते धनं धान्यं तिलं वा तंडुलं तु वा ॥६४॥ नमस्कृ
त्य महादेवं योगिने यो ददाति सः ॥ सर्वपापविनिर्मुक्तः स्वर्गमोक्षं च विंदति ॥६५॥ बहुनोक्तेन किं ब्रह्म
न् महादेवस्य पूजनात् ॥ निकृष्टविप्रो मुच्येत स च संसारमहोदधेः ॥६६॥ यः शिवं पूजयेन्नित्यं लिं
गे भक्त्या मुने तु सः ॥ न याति नरकं घोरं शिवं साक्षादवाप्नुयात् ॥६७॥ दानानि यज्ञाश्च महातपांसि
सन्यासवर्त्तिश्च जितेंद्रियत्वं ॥ सर्वं न तुल्यं भवनीश्वरस्य लिंगस्य नित्यार्चनमेति दृष्टिं ॥६८॥ संक्रा
तिराजजनितादपि पुण्यसंघात् पात्रेषु दानकरणादपि पुण्यवर्यं नक्षत्रपूजनमुमेशमहालिंगमौ
लौ रत्रैर्जलैः कुसुमपत्रवरैः कृतं स्यात् ॥६९॥ ॥ इति श्रीशिवरहस्ये महादेवाख्ये एकादशांशे तिथि
नक्षत्रवारार्चनमहिमा नाम दशमोऽध्यायः ॥१०॥ ॥ श्रीमहादेवाय नमः ॥ श्रीईश्वर उवाच ॥ ॥
लिंगद्वयं मया ख्यातं चलं चाचलमेव च ॥ चरं धातुषु संक्लृप्तमचलं पार्थिवादिषु ॥१॥ चले सदा वसत्ये
व प्रीतियुक्तो महेश्वरः ॥ अचले मंत्रसंस्कारात् सत्यमेव सदाशिवः ॥२॥ जंगमस्यावसानेन स्थावरं
निष्फलं भवेत् ॥ तस्माल्लिंगद्वयं देवि नावमन्येत कर्हिचित् ॥३॥ कृतावसानो यो मोहान्नरके पच्य
ते चिरं ॥ तस्मात्पत्रैः फलैस्तोयैः क्षीराद्यैः स्नापयेच्छिवं ॥४॥ स यत्फलमवाप्नोति तद्देवाग्रमनाः शृणु
॥ सर्वयज्ञतपोदानतीर्थवेदेषु यत्फलं ॥५॥ तत्पुण्यं कोटिगुणितं स्नाप्य लिंगं लभेन्नरः ॥ मातृतः

पितॄन्सर्वेश्वयतः श्वोद्वहत्येकविंशतिः ॥६॥ कुलैकविंशमुत्तार्यममलोकेमहीयते ॥ गंधानुलेपनात्पुण्यंद्वि
गुणंचंदनस्यतु ॥ चंदनाद्दशरोत्कृष्टंपुण्यमष्टगुणाधिकं ॥ कृष्णागरोर्देवदारोःफलंपत्समभेवहि ॥८॥
यक्षकर्दमजालेपः ततःशतगुणोवरः ॥ लिंगस्यालेपनंकुर्याद्दिव्यगंधैःसुगंधिभिः ॥९॥ वर्षकोटिशतं
पुण्यंशिवलोकेसमोदते ॥ चंदनागरुकस्तूरीकर्पूरैःकुंकुमादिभिः ॥१०॥ लिंगमापीठमालिप्यकल्पको
टिवसेद्दिवि ॥ सर्वीज्यतालवृंतेनवापुलोकेमहीयते ॥ ११॥ लाक्षाप्राण्यंगानिर्मुक्तंधूपं दद्यात्सकृ
च्छिवे ॥ चतुर्वेदिगृहेजन्मप्राप्नोतिश्रीविराजितः ॥१२॥ कृष्णागरुसकर्पूरंधूपंदद्यान्महेश्वरे ॥ नि
रंतर्येणमासार्धेतस्यपुण्यफलंशृणु ॥ १३॥ कल्पायुतंमहादेविभोगभुक्ममालये ॥ भुक्त्वाशिवपुरे
भोगांस्तस्यांतेसमहीपतिः ॥१४॥ समागरोर्वरायानाराज्यंनिष्कंटकंलभेत ॥ गुग्गुलंघृतसंमिश्रंदद्यात्स हानि
त्यंकरः ॥१५॥ अपराधसहस्रंचइहामुत्रेक्षतंक्षमेत ॥ देवदारुंसकर्पूरंधूपंदत्वामहाफलं ॥१६॥ श्री
फलंचाज्यसंमिश्रंदग्ध्वाप्रियतरःशिवे ॥ रम्यःसुगंधिकंधूपंषट्सहस्रगुणोत्तरं ॥१७॥ अगरुदशसा
हस्रंद्विगुणंस्यात्सिताग्गुरुं ॥ गुग्गुलंदशसाहस्रंसघृतंस्यादनंतकं ॥१८॥ एतानिसघृतंदग्ध्वा अनि
ष्टोमायुतंलभेत ॥ पापानिनिर्दहत्येवनुवाग्निरिवकाननं ॥ १९॥ मधूकतिलतैलेनकौसुंभेनमहेश्व
रि ॥ दद्यान्शिवालयेदीपान्सितवर्तिसमुज्वलान ॥ २०॥ मधूकातिलतैलोत्थंदीपंस्याद्दशाकंफलं ॥
कौसुंभंतच्छतात्श्रेष्ठंघृतेनानंत्यमुच्यते ॥२१॥ घृतदीपप्रदानेनगच्छेनशालयोजने ॥ ममलोकंभास
इत्वाविमानेरर्कसन्निभैः ॥ गणश्रेष्ठोभवेद्देवि नैरंतर्येणदीपदः ॥ दत्वावर्षंयावत्तेमध्यंसहस्रंचरमेववसे
२३॥ एकंवापिशिवस्याग्रेदीपदोज्ञाननाशकृत् ॥ यःकुर्यात्कार्तिकेमासिशोभनांदीपमालिकां ॥२४॥

घृतेनवायतैलेनचतुर्दश्यामष्टमीषुच॥ पौर्णिमामावास्यायांवाग्रहणेपुण्यपर्वणि॥२५॥ यावत्प्रदीपसं
ख्यानंघृतेनापूर्यबोधितं॥ तावद्युगसहस्राणिशिवलोकेमहीयते॥२६॥ सर्पोयुनमतीकाशोविमाने
र्भासयन्दिशः॥ दीपवसानमुद्बोध्यसर्वस्यायतनेशिवे॥२७॥ सर्वस्माद्विगुणंपुण्यंलभतेनात्रसं
शयः॥ कृष्णवर्ज्यंसितंपीतंपट्टकौशेयरांकवं॥२८॥ कार्पासजंवादेवेशिवस्त्रंदत्वाशिवायतु॥ स्व
र्णकार्पासजंवापिउपवीतप्रदोममम॥२९॥ वासांसिसुविचित्राणिस्वर्णवंतिमृदूनिच॥ धूपितानिनि
वेद्यत्वात्भतेपुण्यमुत्तमं॥ यावत्तद्वस्त्रतंतूनांपरिमाणंविधीयते॥ तावद्युगसहस्राणिशिवलोकेम
हीयते॥३१॥ योर्कपत्रपुटेकृत्वामधुपर्केणमंत्रितं॥ निवेदयित्वाशर्वायसोश्वमेधफलंलभेत्॥
॥३२॥ तंडुलंप्रस्थमानेनकुर्वन्नन्नंसुसंस्कृतं॥ शिवायतंनिवेद्येद्यो लोमयुक्तभागभवेत्॥३३॥
दिनेदिनेपर्वणिवाशाल्यन्नेनसुपुण्यभाक्॥ हरिद्राकृसरंदद्याद्गोधूमाभिश्रितं॥३४॥ चणका
ढकमुद्गान्नंदत्तंस्याद्दुत्तरोत्तरं॥ सगुडंसघृतंदेविप्रशस्तंमन्निवेदने॥३५॥ क्षीराज्यदधिमिश्रान्नं
शाकापूपाज्यमिश्रितं॥ दत्वावर्षायुनोतप्रोदिवितिष्ठतिभोगवान्॥३६॥ यावंतस्तंडुलास्तस्मि
न्नैवेद्यपरिसंख्यया॥ तावद्युगसहस्राणिरुद्रलोकेमहीयते॥३७॥ गोधूमशर्करापूर्वंघृतपाचित
मुत्तमं॥ पिष्टोद्भवंमध्यमंस्याद्भक्ष्यवैचोत्तरोत्तरं॥३८॥ केवलंपायसंदत्वाशिवायानंतपुण्यभाक्॥
पानीयपानकार्थंतुप्रदद्याद्यःशिवायतु॥३९॥ क्षीरंदधिघृतंक्षौद्रंशर्करातक्रमेववा॥ शीतस्यस
लिलस्यापिसकर्पुरस्यचर्शांकरि॥४०॥ निवेदनेपराप्रीतिर्ममस्यादुत्तरोत्तरा॥ कदलीनारिकेलाम्रदा

डिमंमातुलिंगकं॥४१॥ फनसंवाफलान्येवासुस्वादुरसवंतिच॥ दद्यान्नैवेद्यभीशाय फलंस्यादुत्तरोत्त
रं॥४२॥ पंचसौगंधिकोपेतंतांबूलंचोत्तमोत्तमं॥ एलालवंगकर्पूरजातीपत्रफलानिच॥४३॥ नागव
ल्लीदलोपेतंदत्वामरवफलंलभेत्॥ क्रमुकंनागवल्लीनांदलानिदलयेद्द्यं॥४४॥ श्वेतवर्णंचपत्रंच क्रमुक
स्यफलानिच॥ नारिकेलफलोपेतंमातुलिंगसमायुतं॥४५॥ येलालवंगकर्पूरैः सुरवासंप्रचक्षते॥सु
रवासंशिवेदत्वावसेद्वर्षशतंदिवि॥४६॥ शालिपिष्टोद्भवेदीपैर्नीराज्यघृतवर्तिकं॥ ततोनिराज
नंदीपैः षड्भिर्वात्यालुकारयेत्॥४७॥ शतंतुमध्यमंदेयंसहस्रंपरमंविदुः॥ रथाकारंनटाकारंनाक्ष
त्रंपंचचैककं॥४८॥ कुंभदीपंततोदद्यात्पुण्यंस्यादुत्तरोत्तरं॥ कुर्यान्नीराजनंलिंगेशिवमुद्दिश्यमंगलैः
॥४९॥ अष्टम्यादिषुमर्त्येषुदिवसेषूत्सवेषुच॥ यावन्त्यब्दानिविधिवत्कुर्यान्नीराजनंशिवे॥५०॥ व
र्षाणिसंख्यासहस्राणिदिविमोदतिसर्ववत्॥ कांश्यलोहमयींघंटांप्रबध्नीयाच्छिवालये॥५१॥या
यावंनादंतदापुण्यंकुर्वंतोगिरिकन्यके॥ भेरीमृदंगपटहवीणावेणुरवाकुलं॥५२॥ शंखकोस्यादि
वादित्रंयः शिवायनिवेदयेत॥ सविमानैर्महाभोगैः वंशवीणापणवशोभितः॥५३॥पुण्यनामपुनर्दे
विवसेच्छिवपुरेसुखं॥ स्त्रीणांनाट्यादिकरणेनोर्ध्वत्रिकपुरःसरं॥५४॥ यथेष्टमेश्वरेलोकेमोदत्या
भूतसंप्लवं॥ शिवस्योपरियोदद्याद्विलानपट्टवस्त्रजं॥५५॥ मुक्ताजालिकपर्यंतंमध्यपद्मेनचित्रि
तं॥ योंतर्गर्भगृहेशंभोः बध्वामुक्तोभवेन्नरः॥५६॥ योंतःशिवगृहेभक्त्यासुसुगंधैः प्रलेपयेत्॥
कवाटमारकुड्यानंतिर्यगूर्ध्वंसवेदिकं॥५७॥ वासयेत्पुष्पमालाभिः धूपैश्चापिसुगंधिभिः॥ पःकु

यान्सरूदप्येवं तस्यपुण्यफलंश्रृणु॥५८॥ सर्वकामसुसंपूर्णैः महायानेश्च नो हरेः॥ आपूरयंदिशाःस
र्वाआमोदैश्च सुगंधिभिः॥५९॥ कल्पकोटिशतंदिव्यंशिवलोकेमहीयते॥ तस्यांते पृथिवीपालोभ
वेद्राजामहेश्वरि॥६०॥ भक्त्यानिवेदयस्तु शापतालवृंतंसुशोभनं॥ दशवर्षसहस्राणि रुद्रलोकेम
हीयते॥६१॥ मायूरव्यजनंदत्वाशिवायचसुशोभने॥ वर्षकोटिशतंसाग्रंशिवलोकेमहीयते॥ ६२॥
शिवायचामरंदत्वाहेमरूप्यादिदंडकं॥ हंसकुंदेंदुधवलमद्रुवालमनोहरं॥६३॥ चामरासक्त
हस्ताग्रदिव्यस्त्रीपरिवारितः॥ महाभोगैर्विमानस्थश्चिरंशिवपुरेवसेत्॥ ६४॥ योदद्याद्विमलंछत्रंपां
डरंगुच्छमंडितं॥ चंद्रयत्नशतेषिकानिर्मितंदेवदंडकं॥६५॥ एकातपत्रसाम्राज्येत्रिनेत्ररूपयाल
मेत्॥ शिवस्यपुरतोदत्वादर्पणंचातिनिर्मलं॥६६॥ चंद्रांशुनिर्मलः श्रीमान्सुभगः कामरूपधृक्॥
कल्पायुतसहस्रंचशिवलोकेसमोदते॥६७॥ कृत्वाप्रदक्षिणंभक्त्याशिवस्यायतनेनरः॥ अश्व
मेधसहस्रस्यलभेत्पुण्यंपदेपदे॥ ६८॥ अंगप्रदक्षिणंकोटिनमस्कारेपरार्धकं॥ उरसाशिरसा
दृष्ट्याबाहुभ्यामुरुवेशिवे॥ ६९॥ अष्टमूर्तिस्तथाष्टांगैः प्रणमनमुक्तिभेलिच॥ पश्यंलिंगंमहेश
स्यप्रणवेनहृदाशिवे॥७०॥ स्तुवीतदेवमीशानंगिराचस्पष्टयासदा॥ एवंसंस्तुवतेभुक्तिंदिशा
म्यहमतंद्रितः॥७१॥ प्रातर्दृष्ट्वामहालिंगंनैशंपापंविनश्यति॥ आजन्मसंचितंपापंमध्यान्हेद
र्शनात्क्षयः॥७२॥ सप्तजन्मकृतंपापंसायंदर्शनतःक्षयं॥ यात्येवनिशिदृष्ट्वेशंगोदानात्फलपुण्यभा
क्॥७३॥ प्रदोषेदोषराशिर्हि त्यक्त्वाब्रह्मसहत्यादिपंचकं॥ नश्यत्येवशिवंवीक्ष्यशिवधर्मस्यसंग्रहः॥७४॥

॥ईश्वरउवाच॥ ॥योइत्थंशिवधर्मसारमधुनाभितत्त्वात्स्वेवसंपूजयन्॥ पातिस्थानमहोगिरींद्रतनये
कैलासशैलंममतत्रैवाविरतंमदीयममलंज्ञानेनवेदांतजं संप्राप्यामरराजवंदितपदोनित्यःप्रमो
दतसः॥७५॥ ॥इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेशिवधर्मकथनेएकादशोध्या
यः॥११॥ ॥श्रीमहादेवायनमः॥ ईश्वरउवाच॥ ॥निर्माल्यंधारयेद्भक्त्याशिरसापार्वतीपतेः॥रा
जसूयायुतफलंप्राप्नोतिभुविमानवः॥१॥शिरसाशिवनिर्माल्यंभक्त्यायोधारयिष्यति॥अशुचिर्भि
न्नमर्यादःसर्वावस्थांगतोपिवा॥२॥ निर्माल्यधारणादेवशुचिःपूतोभविष्यति॥ निर्माल्यधा
रणेयोग्याःत्रिपुंड्रपरिचिन्हिताः॥३॥ निर्माल्यंपुरतोदत्तंहविरन्नंफलंजलं॥ नचंडाधिकृतंयत्तत्
ग्राह्यंभस्मभूषितैः॥४॥ नाभिषिक्तंस्थावरेवाप्यचरेवापिमहेश्वरे॥अन्नंविनापितद्ग्राह्यंफलानि
क्षीरजानयः॥५॥ स्वायंभुवेपार्थिवेवधातुजरत्नजे॥ नचंडाधिकृतानिहैविनद्ग्राह्यंवैदिकैरपि
॥६॥ मल्लोदरेनभग्नाग्राह्यंनिर्माल्यंजलमण्वपि॥अन्येषामागमानांतुनिर्माल्यंनैवभक्षयेत्॥७॥
नलंघयेन्ननिर्माल्यंसोमसूत्रंचपुण्यहृत्॥ अशांभवेभ्योनिर्माल्यंदत्वानरकमृच्छति॥८॥शंभोःस्ना
नोदकंसेव्यंसर्वतीर्थमयंहितत्॥ बिंदुत्रयाधिकंनैवग्राह्यंतीर्थंशिवस्यवै॥९॥ यतोमूत्रंभवेद्देहे
पीत्वामृत्युमवाप्नुयात्॥ कर्षणादिप्रतिष्ठांतंसंस्कारस्यात्क्रियालये॥१०॥ कृत्वाकुंभाभिषेकांताम
ष्टबंधनसंस्कृतिं॥शिवशास्त्रविधानेनसर्वपापैःप्रमुच्यते॥११॥ देवस्थानासमाभूमिःप्रागुदक्प्र
वणोनता॥शिवायतननिक्षेपविशिष्टासाशिवेसदा॥१२॥कूपारामान्नपानादिशिवायतनकर्म

सु॥ कूपं खात्वा शिवागारे वापीमपि नराः कृतं॥ १३॥ यावत्तनोयभागेन पितृभिर्मोदते दिवि॥ शिवालिं
गाग्रगं देवि यतो मंपुर तस्थितं॥ शिवगंगेति विज्ञेयं तत्र स्नात्वा च्छियं व्रजेत॥ गंगाद्याः पुण्यनद्यो
ये समुद्रास्तत्र संस्थिताः॥ १५॥ शिवाग्रके समुद्रे पि नित्यं स्नात्वा शिवं व्रजेत॥ गंगाद्याः पुण्यनद्यो
नं पर्वणि शस्यते॥ १६॥ दूरतः शिखरं दृष्ट्वा नमस्कारं शिवालये॥ सप्तजन्मकृतैः पापैः तत्क्षणाद्देव
मुच्यते॥ लिंगानां च शतं साग्रं शिवक्षेत्रं शिवे विदुः॥ देहि नां तत्र पंचत्वं शिव सायुज्यकारणं॥ १८॥
मनुष्यस्थापितेलिंगे क्रोशमानं शिवे सदा॥ स्वायंभुते सहस्रं स्यादार्षे पुण्यं तदर्धकं॥ १९॥ पापाचा
रोपि मनुजः मृतस्तत्र परां गतिं॥ प्राप्नोति परमां देव बाणलिंगास्थिते शहे॥ २०॥ तस्मादावसथं
कुर्यात् शिवक्षेत्रसमीपतः॥ शिवे दानं शिवे होमं शिवे स्नानं शिवे जपः॥ २१॥ अक्षयानि फलान्या
हुः शिवाग्रे च कृतं बहु॥ कुरुक्षेत्रे निवसतो यत्फलं नैमिशे शिवे॥ २२॥ प्रयागे च प्रभासे च गं
गासागरसंगमे॥ रुद्रकोट्यां गयायां च सालग्रामे महेश्वरे॥ २३॥ पुष्करे भारभूतेशे गोकर्णे मंड
लेश्वरे॥ श्रीशैले त्र्यंबके देवि महाकाले जटेश्वरे॥ २४॥ वाराणस्यां तु केदारे ओंकारे वै धना
थके॥ कालंजरे तथा देवि दृष्ट्वा मां परमेश्वरं॥ २५॥ संपूज्य भक्तानपि च यथा शक्त्यान्नपानदः॥ गो
दावर्यां कृष्णवेण्यां नर्मदायां तथा शिवे॥ २६॥ गंगायां यमुनायां वा वेणा चर्मण्वतीषु च॥ तापीप
योष्ण्या कावेर्यो तुंगा ताम्रासु नित्यशः॥ २७॥ तत्तीरस्थितक्षेत्रे लिंगं दृष्ट्वा पिनाकिनः॥ श्रीकंठे
रत्नभूतादौ जंबुकेशे यमातके॥ २८॥ जये कुंभेश्वरे देवि अर्जुनेश्चेनकानने॥ छायावने वेदवने

वल्मीके पुंडरीकके॥२९॥ वद्धाचले गोनगे च कालहस्तौ रुणाचले॥ कांच्यां हालास्यसदने पुण्ये वेगोध मादने॥३०॥ छित्वा पदद्वयं दार्पिनिवसेत्क्षेत्रे वरे नु यः॥ स याति शिवसायुज्यं क्षेत्रसंन्यासकारणात् ॥३१॥ क्षेत्राणां दर्शनं पुण्यं प्रवेशः तच्छताधिकः॥ तस्माच्छतगुणं लिंगं दर्शनं च प्रदक्षिणात्॥३२ तस्माच्छतगुणं पुण्यं जलस्नानमतः परं॥ क्षीरस्नानमतो देवि शताताधिकमनुत्तमं॥३३॥ दध्ना सहस्र माख्यातं मधुनाधीत यात्रा तं॥ घृतस्नानेन चानं त्यं भक्तपूजा ततोधिका॥३४॥ नास्ति लिंगार्चनात्पु ण्यमधिकं देवि निश्चितं॥ लिंगेर्चिते र्चितं विश्वमर्चितं स्यान्नसंशयः॥३५॥ यः पूजितः शिवं दृष्ट्वा प्रणा मेभुवि शांकरि॥ यस्तु लिंगार्चनं त्यक्त्वा देवानन्यांश्च पूजयेत्॥३६॥ रत्नं विहाय मूढात्मा यथा काच मपेक्षते॥ चतुर्दश्यामथाष्टम्यां पौर्णमास्यां तु पूजयेत्॥३७॥ पर्वकाले तु शर्वार्चा विशिष्टा सार्चकर्मणः॥ ग्रहणे सोमसूर्याणां पूजानंतफलप्रदः॥३८॥ शिवमाल्यापनयनं पूजां तेषु प्र मार्जने॥ एकैकमपि तुल्यं स्याच्चांद्रायणफलं शिवे॥३९॥ यः कुर्याद्रुद्रहोमं च चरुणा सघृतेन च॥ सकृत नागनि कार्येण रुद्रसायुज्यमाप्नुयात्॥४०॥ शिवालयाग्रे यः कुर्याद्दशमंडलकानि तु॥ सर्वान्न बलि दानं च कृत्वा पुण्यां स्तु तं लभेत्॥४१॥ पंचाक्षरजपात्क्षेत्रे नास्त्यन्यत्पापशोधनं॥ रुद्राणां प्रणवस्या पि सर्वपापविशोधने॥४२॥ नहि पंचाक्षरजपाच्छ्रेयोन्यद्भुवनेष्वपि॥ एवं ज्ञात्वा जपेद्विद्वान्पंचाक्ष रमतंद्रितः॥४३॥ दक्षपुष्पांस्तपत्रैश्चरूपपुष्पाशिवार्चने॥ गावश्चैव द्विजश्रेष्ठा प्रयाति परमां गतिं॥ ४४॥ शिवालये निहत्यैकमपि तत्सकलं लभेत्॥ शिवार्थे समनंतका र्यापुष्पाहिं शाम्महेश्वरि॥४५॥

यज्ञार्थंपशुहिंसावन्नास्तिदोषस्यकारणं॥ पूजितंवामहादेवंपूज्यमानमथापिवा॥ ४६॥ श्रुत्वानुमोदने
वापिमगच्छेदेश्वरंपदं॥ अर्चितंपरमेशानंशर्वमुमापतिं॥ ४७॥ सकृत्प्रसंगाद्दृष्ट्वापिसर्वपापैः प्रमुच्यते॥
आवाहनंचसान्निध्यंस्थापनंपूजनंतथा॥ ४८॥ पंचभिस्तपनंदेविरुद्राधैश्चविमुच्यते॥ पंचाक्षरेणमंत्रे
णबिल्वपत्रैःशिवार्चनं॥ ४९॥ करोतिश्रद्धयायुक्तः सगच्छेदेश्वरंपदं॥ दर्शनाद्बिल्ववृक्षस्यस्पर्शना
द्वंदनादपि॥ ५०॥ अहोरात्रकृतंपापंनश्यत्येवमहेश्वरि॥ सेकेनबिल्वमूलेषुतोयेनाघनिवारणं॥
५१॥ शिवक्षेत्रेभक्तमेकंबिल्वमूलेपिवाशिवे॥ भोजयित्वाघनान्नेनसक्षीरेणसुपुण्यभाक्॥ ५२॥
बिल्वमूलंसमाश्रित्ययस्त्रिरात्रमुपोषितः॥ हरन्नामजपेल्लक्षंससर्वपापैः प्रमुच्यते॥ ५३॥ योंतःकाले
बिल्वमूलेमनोयातिपरांगतिं॥ बिल्वपत्रैरखंडैस्तुचंद्रचूडंसमर्चयेत्॥ ५४॥ कृष्णाष्टम्यांसो
मवारेप्रदोषेपूजयेन्नरः॥ पंचभिःपातकैर्देविमुच्यतेनात्रसंशयः॥ ५५॥ शुष्कैःपर्युषितैर्वापि
बिल्वपत्रैःप्रपूजयेत्॥ युगानामयुतंसाग्रंशिवलोकेवसेन्नरः॥ ५६॥ सस्नातःसर्वतीर्थेषुसर्व
यज्ञेषुदीक्षितः॥ शिवलोकमवाप्नोतिदेहांतेसमुदुर्लभं॥ ५७॥ शिवार्चनरतोनित्यंमहापात
कसंभवैः॥ दोषैःकृतैर्न्नलिप्येतपद्मपत्रमिवांभसा॥ दर्शनाच्छिवभक्तानांसकृत्संभाषणादपि
॥ वाजिपेयस्ययज्ञस्यफलंप्राप्नोतिशंकरि॥ ५९॥ ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवाप्यंत्यजन्मजः॥
शिवभक्ताःसदापूज्याःसर्वथवस्यासुशंकरि॥ ६०॥ नास्याचारंपरीक्षेतनकुलंनव्रतंतथा॥ भस्मरुद्रा
क्षधारीयःपूज्यःसर्वहितंकरि॥ ६१॥ कर्मणामनसावाचायस्तुभक्तान्विनिंदति॥ निरयान्निष्कृ

निर्नास्य यावदाभूतसंप्लवं ॥ ६२ ॥ शिवभक्तान्वर्जयित्वा सर्वे यान्ति सकौलकः ॥ किं पुनर्मम भक्तानां महमेव हि शासकः ॥ ६३ ॥ न शिवाश्रमिणो मौनी नंदंडी न कमंडलुः ॥ नैव काषाय वासांसि भक्तिरेवात्र कारणं ॥ ६४ ॥ यदि भक्तः पशुपतौ पापकर्मसु योरताः ॥ यमस्य वदनं देवि नैव पश्यन्ति सर्वथा ॥ ६५ ॥ ये पुनः शांतमनसः शिवभक्ता जितेंद्रियाः ॥ मर्त्ये धर्मगतामीशे विद्धि ते गणेश्वराः ॥ ६६ ॥ मतस्य जीवनो वापि शिवभक्तस्य शंकरि ॥ यस्माद्दुःखं न तस्यास्ति अन्ये षां क कथा शिवे ॥ ६७ ॥ तस्माद्भक्ताः सदा पूज्या रुद्रक्षेत्रे विशेषतः ॥ यतीनां शांभवानां ये कुर्युः शुश्रूषणं मुदा ॥ ६८ ॥ मलोपकरणैरन्नैरभ्यंगैः पादधावनैः ॥ शिवयोगिष्वपि शिवे सुपुण्यं महदाप्नुयात् ॥ ६९ ॥ यः कुर्यात्सर्वकाले शुचित्रकुसुमोज्ज्वलं ॥ वितानमालाविततं धूपदीपविराजितं ॥ ७० ॥ मंडपं च सुगंधाढ्यं चितं ते शिवपूजने ॥ त्रिसप्तकुलसंयुक्तः शिवलोके महीयते ॥ ७१ ॥ पापकर्मसु कर्मसु तत्र ज्पजीर्णात्त्व चमिवोरगः ॥ यानि तत्सदनं गौरि मदनांतकरे मम ॥ ७२ ॥ यः कुर्यात्तु शिवारामं साम्रबिल्वादिशोभितं ॥ जाजीविजयमंदारकुंदमल्लिकयान्वितं ॥ ७३ ॥ पुन्नागनागबकुलैरशोकोत्पलचंपकैः ॥ कल्हारयूथहेमाद्यैर्नारिकेलैः सुदंडकैः ॥ ७४ ॥ यावन्त्यत्र कुसुमबीजमूलफलानि च ॥ तावद्वर्षसहस्राणि शिवलोके महीयते ॥ ७५ ॥ स्वयमुत्पाद्य पुष्पाणि यः शिवं पूजयेन्नरः नृ ॥ तानि साक्षात्प्रगृह्णाति महादेवो घृणानिधिः ॥ ७६ ॥ न भूमौ पतितान्येव गृह्णीयाद् शुचिर्नरः ॥ कुड्मलैर्नार्चयेद्दीर्घं अन्यपुष्पेतु पातकं ॥ ७७ ॥ न शिवार्चनतुल्योऽस्ति धर्मो न्यो भुवनत्रये ॥ सर्वमन्यत्परि

त्यज्यन्निविवेकहितमानसः॥ ७८॥ शिवपूजाविधिं कुर्याद्यदिच्छेच्छिवमात्मनः॥ त्वरितं जीवितं याति त्वरितं याति यौवनं॥ ७९॥ त्वरितं व्याधिरभ्येति तस्मात्पूज्यः सदाशिवः॥ यावन्नायाति मरणं यावन्नाक्रमते जरा॥ ८०॥ यावन्नेन्द्रियदौर्बल्यं तावत्पूजय शंकरं॥ ॥सूत उवाच॥ ॥ यः पूजयेत्त्रिनयनं शशिखंडचूडं बिल्वीदलेश्च कुसुमैः शिवलिंगमौलौ सोत्यर्कराजितविमानवरेण याति प्रोद्यत्सुधांशुधवलां रजताद्रिमौलिं॥ ८१॥ ॥इति श्रीशिवरहस्ये महादेवाख्येऽरकादशांशे शिवगौरीसंवादे द्वादशोध्यायः॥ १२॥ ॥श्रीमहादेव उवाच॥ ॥ ॥ईश्वर उवाच॥ ॥मासि मासि महादेवि पूजयामि सदाशिवं॥ किं फलं कोविधिस्तस्य समासेन वदामिते॥ १॥ शृणु स्वसावधानेन चेन समासपूजनं॥ यत्कृत्वा पूजका मनुजः सद्यो विद्याह्यंधां समश्नुते॥ २॥ आसमाप्ति व्रतस्यास्य भूशाय्या नक्तभोजनं॥ शिवे त्रिषवणं स्नानं भस्मरुद्राक्षधारणं॥ ३॥ क्षमा दानमहिंसा च सत्यार्जवपरायणः॥ ब्रह्मचर्यादिनिरतो विकल्परतो विषयेषु च॥ ४॥ पाखंडपतितोदक्यसूतकांत्यजपूर्वकान्॥ वर्जयेत्सर्वयत्नेन मनसा कर्मणा गिरा॥ ५॥ मंतु षडक्षरमशंमन श्च शिवध्यानरतो भवेत्॥ संपूज्य च गणेशानं नांदीश्राद्धं विधाय च॥ ६॥ गोदानं च वृषोत्सर्गं कुर्याद्ब्राह्मणभोजनं॥ शातानां शांभवानां च शतं दशवरं शिवे॥ ७॥ नैरस्यनुज्ञामासाद्य स्वयं न क्राशानो भवेत्॥ सामान्यमेतत्कथितं व्रतस्यास्य सदाशिवे॥ ८॥ प्रतिमासं विशेषं च शिवपूजाविधिं शृणु॥ यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः॥ ९॥ पद्मरागोद्भवं चैत्रे पूजयेल्लिंग

मेश्वरं॥ वैशाखेवज्रलिंगंचज्येष्ठेमरकतोद्भवं॥ १०॥ आषाढेमौक्तिकंविद्यात् श्रावणेनील
निर्मितं॥ मासिभाद्रपदेगौरिगोमेदमणिकल्पितं॥ ११॥ आश्वियुज्यांचविधिपुष्पमणिकोद्भव
मुत्तमं॥ कार्तिक्यांवैद्रुमंलिंगंवैडूर्यंमार्गशीर्षके॥ १२॥ पुष्परागमयंपौषेमाघेसूर्यस्यकांतिजं
॥ फाल्गुनेचंद्रकांतोत्थंलिंगंसंपूज्यशैलजे॥ १३॥ समुच्चयमिदंस्तोत्रंशृणुवीतपरमेश्वर॥ सर्वमा
सेषुपूज्योपिबिल्वपत्रैःसदैवसां॥ १४॥ शिवंशिवकरंशांतंशिवात्मानंशिवोत्तमं॥ शिवमार्गप्रणे
तारंप्रणतोस्मिसदाशिवं॥ १५॥ शाश्वतंशोभनंशुभ्रंशाश्वद्द्रोयप्रमोचकं॥ विश्वंविश्वेश्वरंदेवं
शंकरंप्रणमाम्यहं॥ सर्वपापहरंनाथंसर्वरोगहरंशिवं॥ सर्वपापप्रशमनंनमाम्यार्तिकवारकं॥
॥१७॥ आस्थानस्थानसंस्थानंसंस्थितिनिस्थितिकारणं॥ स्थिरस्थानस्थयोगस्थंस्थाणुभीवां
नमाम्यहं॥ १८॥ ईशानंपुरुषंघोरंवामंसंघंमहेश्वरं॥ ईशानंसर्वभूतानांईश्वरंमंत्रनायकं॥ १९॥
इत्थंमासस्तुतिंदेवंस्तुत्वानत्वामहेश्वरं॥ २०॥ समुक्तःसर्वपापेभ्योमममलोकेभवेद्गणः॥ २०॥ मा
मार्चनसमोधर्मोनास्त्यन्योभुवनत्रये॥ २१॥ इतिविज्ञाययत्नेनपूजनीयोमहेश्वरः॥ येभक्ता
देवदेवेशिशिवंज्ञानमजंशुभं॥ २२॥ पूजयंतिसदाभक्त्यामद्भक्तानपरिस्थिताः॥ संपूज्यपशुभ
क्तारंविमुक्तेनांतरात्मना॥ २३॥ इहलोकेसुखंप्राप्यतेयांतिपरमंपदं॥ मासिमासार्चनेदेविना
मान्यन्यानिमेस्तदा॥ २४॥ प्रवक्ष्यामिसुरात्तुभ्यंहृष्टात्वमवधारय॥ सर्वेषांतेषुरत्नानामलाभेहे
ममेवच॥ २५॥ हेमानाभेराजतंवातांम्रजंशैलमेववा॥ मृन्मयंवाययात्याभंक्षणिकंवान्यदेव

प्रणमाम्यहं॥ १९ ईशानवरदं
देवंईश्यां पं९

वा॥२६॥ सर्वगंधमयंचापिलिंगंकुर्याद्यथारुचि॥ अनावसानसमयेसमाचरितनैत्यकः॥२७॥ कृत्वाचै
शेषकीपूजांहुत्वापायसमीश्वरि॥ रुद्रमंत्रैर्मासिमासिस्वयमाचार्यएववा॥२८॥ पंचामृताज्यमि
श्रणबिल्वानांसमिधःशुभाः॥ स्वस्वशाखोक्तमार्गेणप्रतिष्ठाप्यहुताशनं॥२९॥ पूर्वमाद्येरमाद्या
येपश्चादष्टशतंहुनेत्॥ भवायेत्यष्टनामादौस्विष्टांतेहोममाचरेत्॥३०॥ इद्या होमिथुनंदेविमा
सांतेशांभवायतु॥ व्रतमेतच्छिवंप्रीत्यैकुर्यन्मुक्तिमवाप्नुयात्॥३१॥ तरग्वनपश्चताश्रेष्ठःसरग्वचमहा
व्रती॥ सतेनसर्वृनःकश्चित्कृतकृत्योमुमुक्षुः॥३२॥ द्विवानश्चैशिवेनकंभुक्तामासार्चनाविधौ॥ मु
क्तएवभवेत्सत्यंब्रनंद्वादशमासिकं॥३३॥ पुराशर्णैद्वैश्वरूनंममप्रीत्यर्थमीश्वरि॥ मुनीश्वरैर्देवगणैः
ब्रह्मविष्ण्वीश्वरादिभिः॥३४॥ तेनैवस्वपदंप्राप्ताःशिवतुल्यबलाःशिवे॥ भस्मधारणसंपन्नाः
त्रिपुंड्रपरिचिन्हिताः॥३५॥ नोक्तपूर्वंमहेशानिमासार्चनमिदंशिवे॥ सयत्फलमवाप्नोतितदे
कागमनाःशृणु॥३६॥ कल्पकोटिशतंदिव्यंकल्पकोटिशतानिच॥ वसेच्छिवपुरेदेविशिवतु
ल्यबलोयुवा॥३७॥ रुद्राणांगणसाहस्रैर्वासोभरणभूषितैः॥ सविमानैर्महाभोगैर्वशाविणा
दिभिःसह॥३८॥ दुंदुभीनांचनिर्घोषैःनिर्जितोबुधिनिःस्वनैः॥ युगायुगशतंसाग्रंशिवलो
केमहीयते॥३९॥ तस्यांतेधर्मशेषेणत्रैलोक्याधिपतिर्भवेत्॥ त्वरगंतुतुरंगौघमातंगगणसंवृतः
॥४०॥ शतांगदारिनारगतिमंडलोच्चलितांडभूः॥ कोदंडरवोद्दितोद्दंडहुंडिनारातिमंडलः॥४१॥
विधिंवक्ष्येसमासेनमासार्चनविधौशिवे॥ चैत्रादिषुचमासेषुस्नात्वाप्रातःसमाहितः॥४२॥ कृतनि

त्यक्तियोमौनीप्रतिष्ठाप्यमहेश्वरं॥ उक्तलिंगविशेषेणशुद्धोदंस्नाप्यभक्तिनः॥५३॥ उपलिप्यशुभं देशंगोमयेनवांभसा॥ रंगवल्लिभिरापूर्यपमरचसितकाचिन्हितेः॥५५॥ मंटपंपुष्पमालाद्यंक लादर्पणचित्रितं॥ कुसुमैश्चसुगंधैश्चफलैश्चविविधैस्तथा॥५५॥ भक्ष्यभोज्यैरनेकैश्चघृतदीपै श्चसंयुतं॥ तस्यदक्षिणपार्श्वेतुविन्यसेदगरुं शिवे॥५६॥ दद्यात्पश्चिमपार्श्वेतुगोमयार्थमनः श्रीलः॥ उत्तरेचंदनंदद्यात्हविनालंसुपूजितं॥५७॥ पंचामृतैःफलरसैःपंचगव्यसुपात्रकैः॥ सामान्यर्घ्यविशेषार्घ्यैःप्राक्स्थाप्योपुष्पपूरितो॥५८॥ पाद्यार्घ्याचमनैःपात्रैःशोधितैर्नीरपूरि तैः॥ पाटलोत्पलकल्हारकरवीरउशीरकैः॥५९॥ संयुक्तैस्थापयेद्देविमंडपाग्रेशिवस्यहि॥ दूर्वा पामार्गदर्भाग्रपूरितैःकलशोदकैः॥ शंखैश्चदक्षिणावर्तैरत्नगर्भैर्महेश्वरि॥ सव्यावर्तैर्यथाजो यंशंखपात्रेपरिस्थितैः॥५१॥ सपुष्पगर्भैःकुंभैश्चपंचपल्लवचक्रकैः॥ क्षीरंपलशतंप्रोक्तंदधि तद्द्विगुणंभवेत्॥५२॥ घृतंतत्त्रिगुणंप्रोक्तंमधुतत्रचतुर्गुणं॥ शितापंचगुणातत्रप्रोक्तामासार्चना विधौ॥५३॥ सुस्वेतनारिकेलांबुघटेदेवसुपूरितैः॥ कदलीफलसाहस्रैफनसैःशतकोशकैः॥ ॥५४॥ पक्वाम्रजालसुरसैःजंबीरबरसमुद्भवैः॥ गंधोदकैश्चद्रभिश्रैःसकस्तूरिसमन्वितैः॥५५॥ कुशारलोदकैर्देविस्वर्णोदैःवासितैर्जलैः॥ भक्त्याविनानुसारेणफलमाद्यदरिद्रयोः॥५६॥ स्त तैःपावमानैश्चशातरुद्रैर्महेश्वरं॥ भूतशुद्धिंविधायादौधतभस्मत्रिपुंड्रवान्॥५७॥ रुद्राक्षमा लाभरणश्चंद्राभरणमीश्वरं॥ कुशाचेलाजिनेस्थित्वास्वाचांतः शिवभावनः॥५८॥ प्रागुदङ्मुखवए

नायमर्चकः शिवपूजने॥ संस्थितः सुस्थिरो मौनी जपेत्पंचाक्षरं मनुं॥५९॥ सहस्रमुत्तमं देवि शतान्योत्तरमध्यमं॥ अंगन्यासकरन्यासैर्न्यसेद्देहं स्वकं शिवे॥६०॥ शिवात्मकां तनुं कृत्वा भावं प्राकृतमुत्सृजेत्॥ तत्तन्मासेषु पुष्पाणि मासान्यपि महेशितुः॥६१॥ प्रवक्ष्यामि महादेवि सामान्यं बिल्वपल्लवं॥ पद्मानि करवीराणि उत्फुल्लानि महेश्वरि॥६२॥ उत्फुल्लानि च गन्धाढ्यानि तत्तन्मासोद्भवान्यपि॥ चरुं सघृतमेवेह प्रशस्तं सर्वमासिके॥६३॥ तत्तन्मासांतपौर्णिम्यां होमं कार्यो महेश्वरि॥ स्वस्वशाखोक्तमार्गेण प्रतिष्ठाप्य हुताशनं॥६४॥ परिस्तीर्य हुताशं तं माधाराद्यं तत्क्रमेण तु॥ पायसं सघृतं देवि जुहुयाद्द्विजः॥६५॥ स्वयं दशावरैर्विप्रैः शांभवैर्भस्मभूषितैः॥ भवाद्यष्टनामभिस्तत्र स्वाहांतैर्जुहुयात्तदा॥६६॥ शतमष्टोत्तरं तथा पंकैः शतं सघृतपायसं॥ ततः स्विष्टकृदंतो हि होमं कार्यो विजानतः॥६७॥ गावश्च दक्षिणा देया वर्षे कादशवत्सकाः॥ सवस्त्राः कांचनखुरा रौप्यशृंगो रुकाचयकाः॥६८॥ शांभवेभ्यो ब्राह्मणेभ्यो मंथं वाद्रोणमात्रकं॥ दद्याद्वित्तानुसारेण वाग्यतो भक्तितत्परः॥६९॥ विविधं तत्र मासांते स्तोत्रैः स्तुत्वा महेश्वरं॥ प्रसादयेत्सनक्ताशी हविष्यं लवणोज्झितं॥७०॥ नित्यं द्वादशमासं वै त्रिकालं स्नानतत्परः॥ धौतवासाः शुचिर्दीनो भस्मरुद्राक्षभूषणः॥७१॥ अग्निरित्यादिभिर्मंत्रैः शिवसात्कृतमानसः॥ मासार्चनव्रतं ह्येतत्कृत्वा च विधिपूर्वकं॥७२॥ शतावरं सहस्रान्वा मासांते ब्राह्मणार्चनं॥ द्वादशावरमेवेह भोजयेद्बहुभोजकैः॥७३॥ स्वस्तिवाच्य च तान्सर्वान्तांबूले दक्षिणादिभिः॥ स यत्फलमवाप्नोति तच्च नान्यमहामखैः॥७४॥ आद्यं नेयाद्द्विजाभोज्या मासांते वा महेश्वरि॥

विमानैः सूर्यसंकाशैः पतित्वाभोगर्वशालयं ॥ मानतः पितृतः श्रेष्ठवंशात् तं शाः समन्विताः ॥ स्कंद उवाच ॥
मासार्चनाग्न्नविधिः स्तवविस्तृतोयं पुण्यायुतार्जितगतिप्रदएषधर्मः ॥ ज्ञानप्रदोयममरुःशिवभ
क्तवर्यैःकार्योधुनागिरिसुतेशिवतुष्टिसिध्यै ॥ क्षेत्रेषु गिरिनदीवनपुण्यदेशेश्वशाश्वितोयमनु
जोद्विजएवमुख्यः ॥ मासेषु सर्वार्चनमेवमुख्यंसर्वेषु मंत्रसहितैर्विधिरेवसिद्धः ॥ ७६ ॥ ॥
इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेमासार्चनविधौत्रयोदशोध्यायः ॥ १३ ॥ महादेवायनमः
॥ ईश्वरउवाच ॥ ॥ चैत्रेत्रिनेत्रमभ्यर्च्यअग्निष्टोमायुतंलभेत् ॥ आवाह्यमंडपेतस्मिंल्लिंगंमाणि
क्यसंभवं ॥ १ ॥ पंचपल्लवसंयुक्तंकुंभत्रतयमुत्तमं ॥ विलिप्यगोमयेनक्ष्मांरंगवल्याद्यलंकृतां ॥ २ ॥
रंभास्तंभयुतंदिव्यंमणितोरणमंडितं ॥ गंधपुष्पाक्षतैर्युक्तं पंचगव्यंपवित्रितं ॥ ३ ॥ पंचामृतादिसं
भारंफलजालसंनिधौ ॥ कुशादर्भासनामिश्रैः पाद्यार्घ्याचमनांबुभिः ॥ ४ ॥ गंधचंदनपात्रैश्चदी
पस्तंभदृशोज्वलैः ॥ धूपैर्गुग्गुलमिश्रैश्चसघनैःसुमपात्रकैः ॥ ५ ॥ कल्पइत्वाथसंभारंअर्चकोब्राह्म
णैःसह ॥ शांभवैर्भस्मरुद्राक्षधारिभिःसंयुतोंबिके ॥ ६ ॥ अग्निरित्यादिभिर्मंत्रैःस्वयमुद्धूल
येत्ततनुं ॥ नद्यांवादेवखातादौवापीकूपोदकैःशुभैः ॥ ७ ॥ स्नास्यामीत्यथसंकल्प्यचेत्स्नानेननरः
करः ॥ प्रीयतामितिदेवेशित्रियायुषंत्रिपुंड्रकः ॥ ८ ॥ रुद्राक्षहारवलयकृतनित्यक्रियःशुचिः ॥
धौतवस्त्रधरःशांतःसपवित्रकरस्तथा ॥ ९ ॥ चैलाजिनास्तृतैर्वापिशिवकृत्रामयासने ॥ स्थित्वा
शिवार्चनस्थानेशिवैकगतमानसः ॥ १० ॥ आगमंवैदिकंवापिपूजाक्रमयुतःशिवे ॥ अंगन्यासादि

कंकृत्वाध्यायेद्देवमुमासखं॥११॥ उमासन्मुखमेवेशं त्रिनेत्रं चंद्रशेखरं॥ वरदाभयहस्तं च नील
कंठं पिनाकिनं॥१२॥ मृगटंकधरं सौम्यं वस्त्राभरणभूषितं॥ उमयासंयुतं ध्यात्वा जपेन्मंत्रं मुदा
युतः॥१३॥ पंचाक्षरसहस्रं च शतमष्टाधिकं शिवे॥ संकल्प्य मासपूजादौ पूजयेद्देवमनन्यधीः॥१४॥
अपनीयार्घ्यनिर्माल्यं (त्रिनेत्रं) लिंगमौलिगतं शिवे॥ संशोध्य च शुभैर्वस्त्रैर्लिंगमापीठमंबिके॥
॥१५॥ अद्भिः पूतेन तथा पीठं देवमावाह्य भक्तितः॥ दृष्ट्वा लिंगं तदा प्रोक्तमंत्रैः शांभवसत्तमः॥१६॥
पंचाक्षरेण तत्सर्वमुपचारं प्रकल्पयेत्॥ गायत्र्या चासमभ्यर्च्य शिवलोकमवाप्नुयात्॥१७॥
कल्पिते चासने स्थाप्य धर्मज्ञानमये शुभे॥ वैराग्यैश्वर्यसंपन्ने दारवे धातुजे यथा वा॥१८॥ ॐ
कारं मध्यपद्मे तु सोमसूर्याग्निसंभवे॥ पाद्यमाचमनार्घ्यं च दत्वा रुद्राय शंभवे॥१९॥ स्नापये
त्ततः शुद्धैः रंबुभिः स्वर्णमध्यगैः॥ शोधितैर्वासितैर्देवि पाटलागरुमिश्रितैः॥२१॥ गोमूत्रं गो
णाथ शरेव नवर्धन्यावाभिषेचयेत्॥ धारां प्रकल्पयेल्लिंगे अविछिन्नां गिरींद्रजे॥२२॥ धूपैश्च
धूपयेत्तत्र दीपानुद्बोधयेत्तत्र हि॥ ब्राह्मणैः शांभवैः सार्धं लिंगं तदभिषेचयेत्॥२३॥ एकवारं त्रि
वारं वा जप्यो रुद्रः सशांतिकः॥ एकादशगुणो रुद्रो जप्यश्चमकशांतिकः॥२४॥ तर्पयेद
भिषिक्तां नेभवाय त्वष्टनामभिः॥ उद्वर्तयेच्छुभैर्वस्त्रैः स्थाप्य पीठे महेश्वरं॥२५॥ चंदनेनोप
लिप्येशं वस्त्रयज्ञोपवीतकं॥ दद्यात्त्रिशाखबिल्वैश्च पूजयेन्मल्लिकाशुभैः॥२६॥ दमनैश्चागु

भैःपद्मैःपुंडरीकोत्पलादिभिः॥नीलोत्पलानांमालाभिःनंद्यावर्त्तैश्चामीभवैः॥२७॥चंपकैर्जा
तिपुष्पैश्चबकुलैःकरवीरकैः॥दत्वासौगंधिकंधूपंपायसंचनिवेदयेत्॥२८॥सशार्करंबुसं
मिश्रंएलाचूर्णविमिश्रितं॥पानकंदधिभक्तंचसोपदंशंनिवेदयेत्॥२९॥कृत्वाप्रदक्षिणंदेविन
मस्कारादिपंचकं॥शताष्टनामभिःपूजांकुर्याद्बिल्वैर्महेश्वरे॥३०॥नामभिःछांदसैर्देविपूजये
न्नस्तुवीनिच॥नानिनामानिवक्ष्यामिसमाहितमनाश्शृणु॥३१॥नमोस्तुतुभ्यंदेवायसुव्रतानंततेज
से॥नमःक्षत्राधिपतयेवाजिनेशूलिनेनमः॥३२॥हस्वायोर्ध्वायधूम्रायदंडिनेरुक्मवेतसे॥
नमोज्येष्ठायश्रेष्ठायबलप्रमथनायच॥३३॥नमोवन्यायपूज्यायसद्योजातायवेनमः॥गह्व
रायघनेशायहव्यवाहायवीरिणे॥३४॥भूतानामुद्भवायाथप्रभवेविभवेनमः॥देवायद्योत
मानायमानातीतायशांभवे॥३५॥वेदांगायप्रदानाययोगसांख्यविहारिणे॥ध्रुवाध्रुवायशां
तायविश्वायसुमहर्षये॥३६॥ग्रहायग्रहस्वरूपायग्रहस्थाययनात्मने॥अहोरात्रायमासायऋ
तवेऋतवेनमः॥३७॥संवत्सराधिपतयेयुगकालात्मनेनमः॥परार्धायप्रसन्नायशुक्लाय
हरितायच॥३८॥धर्मायधर्मस्वरूपायपरायविभवेनमः॥पुरांतकायभीमायवर्गायवर्तये
नमः॥३९॥मन्वंतरायकाव्यायविश्वाधायविधायिने॥विश्वसर्गायभर्गायज्योतिषेदिव्यचक्षुषे
॥४०॥कल्पोदयनिबंधायसूक्ष्मबुद्धायरंहसे॥ब्रह्मणेब्रह्मभूतायब्रह्माधिपतयेनमः॥४१॥विद्ये
शायादिदेवायविद्याधिपतयेनमः॥नमोव्रताधिपतयेमंत्राधिपतयेनमः॥४२॥पितृणांपत

यैचैवपशूनांपतयेनमः ॥शेषभूषायतुभ्यायपुष्पायचनमोनमः॥ ४३॥ वृषभायपुराणायपतीनांपत
येनमः॥प्रजापतीनांपतयेव्योमकेशायतेनमः॥ ४४॥सिद्धार्थरूढतेचैवघनघोषायतेनमः॥दैत्यदा
नवपूज्यायवायवेरक्षघातिने॥४५॥ यक्षायभिक्षुरूपायकक्षवासायतेनमः॥ पक्षिवाहप्रपूज्याय
गुह्यलिंगायतेनमः॥४६॥ पर्वायपर्वमध्यायशर्वेरीशविधारिणे॥भव्यायगव्यरूपायमखाध्यक्षाय
धातवे॥४७॥ भववैद्यायघोरायवामदेवायतेनमः॥सद्योजातायपुरुषायईशानायनमोनमः॥
४८॥एवंनामाष्टकेनेशंशतेनेचप्रपूजयेत्॥स्तुवीतैवंमहादेवंचैत्रेवैलिंगरूपिणं॥४९॥सद्यो
जातादिविधाप्रभवविधिकृतेशूलिनेगोप्रणेतोरखोकाधाजिनाजिनवाससेविविधिमहामुंडो
रूसहस्रसे॥ज्वालाकूलविशोषितारिवलमहाकालायफालोज्वलन्नीलालोलविषोरुकंठरभ
सेपूर्वायतुभ्यन्नमः॥५०॥ सामस्तोमनुतायवेदकलितेनास्तीमांतसंचारिणे वामार्धाकृतचेका
मांगनाशायते॥व्योमाकारशरीरधूमपटलीकेशायपाशावलापारावारविकारसंसृतिभवोत्ता
रायतुभ्यंनमः॥५१॥भस्मांगायभवायभाउरूहदेतुंगायगंगारयस्फाराघोरमहोतमांगविलसल्लिं
गायशर्वांगायते॥ कामाद्यंगविभंगकायसुमहादिव्यांगसंगस्फुरज्वालांगायकुरंगबालविलस
द्धस्तायतुभ्यंनमः॥५२॥ हंसारव्यनागरूतहंसकपादपद्मद्वराद्यदृश्यवरहंसरथैडिताय॥
हंसोरुनेत्रकलितोत्तमफालदेशशास्यज्जगद्धितरुनसुरहंसकाय॥५३॥ ईशायशाश्वतज
गत्स्थितिनाशयोगांबकाशशशिधामविभासिधाम्ने॥भूम्नेविधूतनमसेरभसेविशोकसौम्ने

भवायविभावायनमोनमस्ते॥५४॥ ॥सूतउवाच॥ ॥ स्तुत्वैवंदेवमीशानंपुनःसंपूज्यशंकरं॥ ई
शानंपुरुषंदेववामदेवमघोरकं॥५५॥ सद्योजातंचदेवेशिनामभिःसंस्तुवीतिच॥ ततोनीराज
नेदद्याद्वादित्राणांनिनादतः॥५६॥ शंखकाहलनिर्घोषैर्भेरीझांकारमर्दलैः॥ वेणुवीणामृ
दंगैश्चजयशब्दैःसुमंगलैः॥५७॥ पूजांसमाप्यनियतःकरतालसुनर्तनैः॥प्रसादयेन्महादेवंपू
जांतेशांभवैःसह॥५८॥ निवेदितैश्चतांबूलैःपूजयेद्दक्षिणादिभिः॥ एकवारंत्रिवारंवापूज
येद्गिरिजापतिं॥५९॥ छत्रैश्चचामरैर्दिव्यजनादर्शकैरपि॥ चैत्रेत्रिनेत्रपूजानःक्षिप्रंनश्यति
पातकं॥६०॥ चित्रायामथपौर्णम्यांहोमंकुर्याच्चशांभवैः॥ दद्याद्धेमिथुनंतत्रभक्तिभक्तिविशे
षतः॥६१॥ प्रसंगाच्चैवसंपूज्योभक्तिहीनैरपिद्विजैः॥ भावानुरूपफलदोभगवानगजापतिः॥
॥६२॥ उच्छिष्टःपूजयन्नीतिपैशाचंतुद्विजाधमः॥ संक्रुद्धोरक्षसांयोनिंअभक्ष्यःक्षयरोगवा
न्॥६३॥ गानशीलश्चगांधर्वेनृत्यशीलश्चपूरुषः॥ स्वधर्मव्यापकोयस्तुकूहकःप्रोच्यतेद्विजः
॥६४॥ तस्माच्छीलवताभाव्यमर्चनेनविशेषतः॥ विशेषयेत्तनुदेविनक्ताशीक्षार वर्जितः॥६५॥
एवंचैत्रादिमासस्यपूजनंनेप्रकीर्तितं॥ यत्कृत्वामनुजःसद्योलभेद्रुद्रगणत्वतां॥६६॥ पिता
महैःसहैवायंनरकस्थैरपिद्विजः॥ यातिशांभोर्वरंस्थानंविमानैःसार्वकामिकैः॥६७॥
स्कंदउवाच॥ ॥ चैत्रेत्रिनेत्रपदपंकजभित्रभावाच्चित्रैश्चपानकवरैःसहिमुक्तएव॥ सत्रा
निरात्रशतकावपिपुण्यभाक्स्यात्सुत्रादिभिःसुकलत्रयुतोभुविस्थः॥६८॥ ॥ इतिश्री

शिवरहस्येमहादेवाख्येएकादशांशेचैत्रमासार्चनंनामचतुर्दशोध्यायः॥१४॥महादेवायनमः॥ ॥
ईश्वरउवाच॥ ॥वैशाखार्चनजंदेविविधिंवक्ष्यामितेशृणु॥सरित्सरतटाकेषुदेवखातोदकू
पके॥ १॥स्नायान्नित्यंचतन्मासिशिवंहृदिसमर्च्यच॥ धौतवस्त्रधरः शांतोआचांतः कृतनैत्य
कः॥२॥ पूजास्थानंशुभंदेशंगोमयेनोपलिप्यच॥ त्रिशूलवस्त्रपद्मादिस्वस्तिकाद्यैरलंकृतं
॥३॥ रंगवल्लीकृतानेकमंडपंतोरणान्वितं॥ वितानपुष्पमालाभिः शोभितंकदलीदलैः॥४॥
तन्मध्येचमहापीठेस्थापयेल्लिंगमुत्तमं॥ वज्रजंहेमजंवापिमृन्मयंवामहेश्वरि॥ ५॥तद
ग्रेकुंभमव्यग्रः स्थापयेत्पल्लवैर्युतं॥नदीनदाहृतैस्तोयैःपूरितंशोधितैःशिवे॥६॥ सामान्या
र्घ्यविशेषार्घ्यौदेवाग्रेस्थापयेत्ततः॥ दर्भदूर्वागंधपुष्पाढ्येोकल्पनीयेविशेषतः॥७॥
पंचगव्यकपात्रंचपूरयेत्पंचगव्यकैः॥ तत्तन्मंत्रैर्मेलयित्वागंधपुष्पाद्यलंकृतं॥ ८॥
ततःपंचामृतंशुद्धंगव्यमेवप्रसाधयेत्॥फलानांचरसंदेविगंधरत्नोदकंततः॥ ९॥अक्ष
ताः धवलास्तत्रसाधयेत्तिलमिश्रिताः॥ सुदिनेशुभनक्षत्रेचंद्रताराबलान्विते॥१०॥गंधपुष्प
फलोपेतंधूपदीपैरलंकृतं॥पूजास्थानंसमाविश्यसंस्थितःप्राङ्मुखस्तदा॥ ११॥कुशचैलाजि
नेवापिशांभवैःसहसुव्रतः॥अग्निरित्यादिभिर्मंत्रैर्भस्मनोद्धूलयेत्तनुं॥१२॥त्रिधापुण्यत्रिपुंड्रां
कोदिव्यरुद्राक्षभूषणः॥शिवाभिषेकेवरयेत्संकल्प्यैवचतान्द्विजान्॥१३॥भस्मरुद्राक्षसंप
न्नान्त्रिपुंड्रपरिमंडितान्॥निर्माल्यमपनोद्यैवंशिवंपरमकारणं॥१४॥मंत्रंपंचाक्षरंधीमा

नजपेछ्वनसहस्रकं ।। ऐशान्यां चंडमाराध्य निर्माल्यं तत्प्रदापयेत् ।। १५ ।। कल्पयेदासनं पश्चादाधा
रादि यथाक्रमं ।। आधारशक्तिं तत्रत्यां श्यामां संपूज्य देशिकः ।। १६ ।। अनंतं धवलं नागं आसनाधः
प्रपूजयेत् ।। भूभृत्श्रुंगिं रुत्वैव श्वेतं तत्र प्रसारयेत ।। १७ ।। न भूमिलग्नं पात्रस्थं पुण्यांबुपरिपूरि
तं ।। धर्मज्ञानं च वैराग्यमधर्मादीन्स्ततो यजेत् ।। १८ ।। तस्योर्ध्वछदनं पद्ममासनं परिकल्पयेत् ।। अष्ट
पत्राणि तस्याहु रणिमादिगुणान्वितं ।। १९ ।। केसराणि च दिव्यानि रुद्रवामादि शक्तिभिः ।। बीजादि
शक्तिपर्यंतमासनोपरि पूजयेत् ।। २० ।। आवाहनं च स्थानं च सान्निरोधं निरीक्षणं ।। पाद्यमाचमनं
चार्घ्यं गंधपुष्पमनंतरं ।। २१ ।। धूपं दीपं च तांबूलं दत्वा संस्नापयेत्ततः ।। ध्यायेदीशानमव्यग्रः उग्रं
देवं पिनाकिनं ।। २२ ।। त्रिलोचनं नीलकंठं वरदाभयपाणिनं ।। उमासहायं विश्वेशं विश्वाधारं
सनातनं ।। २३ ।। सर्वाभरणशोभाढ्यं गंधवासाद्यलंकृतं ।। त्रिपुंड्रचंद्रार्धधरं भूतिभूषितविग्र
हं ।। २४ ।। मंदस्मितमुखांभोजसुंदराननपंकजं ।। ध्यायेद्देवं विरूपाक्षं निर्जित्याक्षाणि सुव्रतः
।। २५ ।। ततः संस्थापयेत् लिंगं पीठे वै स्नानकर्मणि ।। विशोध्य शुद्धोदकैः पंचगव्यैः प्रसेचयेत् ।। २६ ।।
मधुपर्कं ततो दद्यात्क्षीरमादौ प्रसेचयेत् ।। ।। पावमानेन रुद्रेण दध्ना चात्वारिनेन च ।। लिंगस्
क्तेन च घृतं मधुना स्थापयेच्छिवं ।। २७ ।। कद्रुद्रायेति गौरीर्शसितया स्थापयेच्छिवे ।। इमारुद्रे
ति मंत्रेण नारिकेलांबुनानतः ।। २८ ।। त्रियंबकेति देवेशं कदलीफलसारतः ।। यो वै रुद्रेति
मंत्रेण पनसे रीशामंत्रतः ।। २९ ।। रसालसारनीपीशं याः फलिनीति च मंत्रतः ।। जंबीरसारैः सुरसैः

लिंगसूक्तक्रमेणहि॥३०॥ संस्नाप्यलिप्यपिष्टेनस्नापयेदुष्णवारिणा॥तिलतैलेरपिशिवंसमभिषिच्य
विरूषयेत्॥३१॥ उद्वर्तनानरैस्नाप्यघर्षयेद्विल्वपत्रकैः॥ स्नापयेद्गंधतोयेनकुशरत्नहिरण्यजैः॥३२॥
तोयैः संस्नापयेदीशंनानावादित्रनिस्वनैः॥ असंभवेतुद्रव्याणांयथाविभवसंभवैः॥३३॥ केवलैर्मंत्र
तोयैर्वाभक्तिपूज्योमहेश्वरः॥ आढ्योवापिमहास्नानंकारयेन्मध्यमोपिवा॥३४॥ अभ्यंगंवामहा
देविद्रव्येरेतैर्यथाबलं॥कृत्वानिवेदयपश्चात्तुहविःकिंचिन्महेश्वरे॥३५॥गोशृंगेगैर्वातथाशं
खैः धारापात्रेणशोधयेत्॥ अविच्छिन्नांतत्रधारांलिंगमौलौप्रकल्पयेत्॥३६॥ अन्वारंभणकंसू
त्रंबध्वांगुष्ठेभिषेचयेत्॥ एकवारंत्रिवारंवारुद्रैकादशकंद्विजैः॥३७॥ सशांतिकंसचमकंजपे
द्दशाभवेर्द्विजैः॥भवायेतितथैवांते तर्पयेदष्टनामभिः॥३८॥ प्रक्षाल्यवासः संशोध्यपीठस्था
प्यमहेश्वरं॥ दद्यादाचमनंगंधमुपवीतंचसाक्षतं॥३९॥सुवस्त्राभरणंगौरिभस्मपांडरमुत्तमं॥
अगरूद्भवमेवेशादद्याद्दशारवमासिकं॥४०॥ धूपंधनोद्भवंदीपंहरिद्राकुसरंशिवे॥गुडखंडद
न्नंभक्ष्यंदध्यन्नंसोपदंशकं॥४१॥ बकुलैर्बिल्वपत्रैश्चत्रिशारैवेश्वप्रपूजयेत्॥ भवायेत्यष्टना
म्नैवनिधनेत्यादिमंत्रितः॥४२॥ तांबूलमुखवासांनंदद्याद्देवायशूलिने॥ नीराजनंततोलिंगं
शतवर्तिसुपूरितं॥४३॥ घृतैस्तैलैरपिवरैःरथाकारैःमनोहरैः॥ नीराजनमुपात्रैश्चवेणुवी
णादिनिस्वनैः॥४४॥ शंखकाहलभेरीणांजयशब्दैःश्रुतीरितैः॥ नीराज्यमाज्यधूपैश्चदीपैःकर्पू
रखंडकैः॥४५॥ छत्रंचचामरंदेविव्यजनंदर्पणंतथा॥ निवेदयेद्यथाजोषमुपचारंपृथक्पृथक्॥४६॥

वेशारेवनामभिर्दिवि पूजनीयोयथाबलं॥ प्रदक्षिणानमस्कारं नर्तनंस्तोत्रकल्पनं॥ ४७॥ नाम्नांचैते
प्रवक्ष्यामिशताष्टोत्तरमंख्यया॥ स्तोत्रंचैतद्विशालाक्षिवेशारेप्रीतिदायकं॥४८॥ यस्त्वेतंनामभि
र्दिवि वेशारेश्रीदिनेयजेत्॥ तस्यमुक्तिकरस्थैवभविष्यतिसुमध्यमे॥४९॥ ॐ भर्गायभूतभव्या
यभवरोगहरायच॥ शर्वायस्वर्णरूपायदूर्वापूज्यायशंभवे॥५०॥ गोकर्णायचशोभ्रेचशंकुकर्णा
यतेनमः॥ वराहमथनायैवरूक्षायहितदायच॥५१॥ नमोप्सराणांपतयेगणानांपतयेनमः॥ अहिं
सापतयेचैवओजसांपतयेनमः॥५२॥ नमोस्त्वपर्णापतयेहेमवर्णायवर्णिने॥ बलाबलसमूहाय
अक्षोभ्यक्षोभणायच॥५३॥ चंद्राभरणभूषायविमशेषाहिधारिणे॥ दीप्तभृंगैकशृंगायरबभायक
कुम्भिने॥५४॥ बिल्विनेबिल्वपूज्यायविशारवासुप्रियायच॥ उग्रायरुद्ररूपायधन्वनेधावने
नमः॥५५॥ ज्योतिर्गणानांपतयेमहाधारायतेनमः॥ अतीतायभविष्यायवर्तमानायतेनमः॥
॥५६॥ अजरायनमस्तुभ्यंतपसेवरदायच॥ सुवर्चसेसुवीर्यायस्मरगर्वहरायच॥५७॥ वरदा
यवरेण्यायस्वर्णवर्णायतेनमः॥ अर्णवांतनिवासायदीप्तशूलधरायच॥५८॥ पुरुषायाप्रमेयाय
अघोरायोर्ध्वकेशिने॥ ज्वालामालावृतांगायभुजंगाभरणायच॥५९॥ नमोबाह्यायगुह्यायस्वर्गा
यनरकायच॥ हरायपरमेशायस्कंदगोप्त्रेसुधन्विने॥६०॥ कनिष्ठायायज्येष्ठायगह्वरेष्ठायच
र्मिणे॥ मुंडायशितिकंठायजटिलायभगायच॥६१॥ व्योमकेशायभीमायवध्यायवरुणायच
॥ व्यापव्यापकरूपायकालगर्वहरायच॥६२॥ मुंजकेशायभाव्यायलिंगाध्यक्षायतेनमः॥ वंकवेनायक

णीयवालन्यंकुधरायच॥६३॥ भवायभजमानाययजमानायतेनमः॥ सूर्यायचंद्ररूपायवायवेसग्न
रायच॥६४॥ भूधरायादिमध्यायज्ञानज्ञेयागमायच॥ निगमानेकवेद्यायअभेद्यायवपुष्मते॥भ
द्रदायशरण्यायवरेण्यायनमोनमः॥ अरण्यानांचपतयेभूतानामधिपतयेनमः॥६६॥ यक्षाधि
पतयेचैववक्रक्षायायकपर्दिने॥ एवंनामाष्टशतकैः पूजयेद्बिल्वपल्लवैः॥६७॥ येशास्त्रेवेदवदे
वेशंस्तुवीतेवंमहेश्वरि॥ यत्नेरुद्रमहाधनुःशिशिभवाप्राक्दक्षिणांचोत्तराश्चतासुनमस्त्रि
यासुविहितावेदेषुनिष्ठावतां॥ विज्ञासाभगवन्भवेत्सुहिताइज्यायुतानांफलं दद्यात्याज्यम
पास्तवैरिसकलंराज्यंलभेतत्क्षणात्॥६८॥ शंभोभर्गभवेंदुशेखरवरमहागंगातरंगोज्वलश्री
लाभंगतरंगसुंदरजटाजूटोत्तमांगोज्वल॥ पाहिशाप्रमथाधिनाथगिरिजानाथावमांशंक
र॥ त्रस्तंमांवरकालहस्तसुमहापाशावबद्धेहर॥६९॥ इंद्राबरांतकहरप्रवरामरेशकाशी
शवासिनजगत्परमावकाश॥ चर्मांबरांतकहरत्रिपुरावमर्दमूर्धन्यपाहिभगवन्धवलांबरां
क॥७०॥ हेकालकालधतमूलवराहिमालफालोज्वलानलविशोषितविष्णुबाल॥ नीलाभ
कंठकलनानिलपापतूलदावाग्निजालभगवंनवमांनमस्ते॥७१॥ यक्षाधिपार्चितपदांबुज
त्रस्तदक्षविक्षाविनोदभगवन्सुमहोक्षवाह॥ वीक्षाविदग्धसुमचापवरेतरूकायरक्षाधुना
पशुपतेहरमांहिताक्ष॥७२॥ एवंसंस्तुत्यवेशास्त्रेदेवदेवंमहेश्वरि॥ एककालंत्रिकालंवापू
जयेल्लिंगमीश्वरं॥७३॥ दद्याद्गोमिथुनंदेविमासांतेशांभवेषुनत्॥ सदक्षिणंसवत्संचवस्त्रालंका

रभूषितं ॥७४॥ होमं कार्योत्र वैशाखं प्रागुक्तक्रमतः शिवे ॥ नक्ताशी भस्मनिस्थाय भवन्मासांत
मीश्वरि ॥७५॥ वैशाख्यामथ पौर्णिम्यां कुर्याच्च दधि कंबलं ॥ घनकंबलमानेन विधिः प्रोक्तः पु
रामया ॥७६॥ एतन्नेभिर्हितं गौरि वैशाखार्चनजं फलं ॥ स्नानपूजनमीशानि गंधपुष्पफलार्पणं
॥७७॥ पानीयं पानकं तस्मिन्मासि विप्रेभ्य उदापयेन्नु ॥ मम प्रीत्यर्थमर्वेशि तस्य पुण्यफलं शृणु ॥ कां
चनेन विमानेन वंशालक्षसमन्वितः ॥ याति शंभोः परं धाम सर्वभोगसमन्वितः ॥७९॥ ॥ ईश्व-
र उवाच ॥ ॥ त्रिशाखे वैशाखे वैशाखेश्वरि विशिखे नेत्रार्चनपरो मखानां सम्मानो फलसुखमवाप्योन्न
तमुखः ॥ विशाखार्क्षे ये मां भजन्ति वरदुःखोज्झितनरा वरांभ्यान्स्त्यं गिरिवरसुते मत्याभिमुखः ॥
॥८०॥ कृतान्तानन्कं पूजयेन्तोहदंतः वसंते पि संतोयसंत्ये वशांतः ॥ उमाकांतरामेवतेसंवदंतः
भवापारदुःखाभितां तानः कियंतः ॥८१॥ विशाखा वैशाख्यां यदि सकृतमाजोपि मनुजा द्विजा
यैशाखां तत्प्रथितपदपूजासुनिरताः ॥ परं कुर्वंत्यक्षा शिवनरमहध्यानकलनाः श्रिये दधः पु
ण्यं त्वघहरमहोकंबलमुमे मम प्रीत्यै मुक्त्यै मकटनरभक्त्यैव सुजनाः ॥८२॥ ॥ इति श्रीशिवर
हस्ये महादेवाख्ये एकादशांशे शिवगौरीसंवादे नाम वैशाखमासार्चनकथनं नाम पंचदशोध्या
यः ॥१५॥ ॥श्रीमहादेवायनमः॥ ॥ श्रीपरमेश्वर उवाच ॥ ॥ ज्येष्ठमासार्चनं वक्ष्ये मत
स्त्वं गिरिजे शृणु ॥ यत्कृत्वा मनुजः सद्यो मद्योजानप्रियो भवेत् ॥१॥ ज्येष्ठे ज्येष्ठे समभ्यर्च्य विधि
वो जायते शिवे ॥ स्नायात्सरसि नद्यां वा मासादौ मम शिवं स्मरन् ॥२॥ अरक्तवाससी बिभ्रन् संकल्प

विधिपूर्वकं॥ कृतनित्यक्रियोधीमान्भस्मधारणपूर्वकं॥३॥ अग्निरित्यादिभिर्मंत्रैस्त्रिपुंड्रपरिमंडितः॥ रुद्राक्षधारणंकुर्यात्सर्वांगेषुविधानतः॥४॥ पूजास्थानंशुभंदेविगोमयेनोपलेपितं॥ पिष्टचूर्णैःपंचवर्णैरंगवल्लीविराजितं॥५॥ मंडपंकारयेत्तत्रपुष्पगंधविचर्चितं॥ कदलीस्तंभविहितंवितानमणितोरणं॥६॥ तन्मध्येचशिवेपीठेपट्टवासप्रसाधिते॥ लिंगंमरकतंतत्रस्थापयेदन्यमेववा॥७॥ त्रासादिदोषरहितंयदितुंगंनदृश्यति॥ तदग्रेस्थापयेत्कुंभंहेमताम्रजमृण्मयं॥८॥ नदीतोयेनसंपूर्णंधौतंपल्लववक्त्रकं॥ तदग्रेस्थापयेदर्घ्यंगंधपुष्पांबुपूरितं॥९॥ पाद्यार्घ्याचमनंपात्रंकल्पयेच्चतदग्रतः॥ पंचगव्योज्वलंपात्रंशोधितंमंत्रसंयुतं॥१०॥ कपिलंवायथाजोषंगव्यंसंपाद्ययत्नतः॥ दधिक्षीराज्यकुंभाश्चक्षौद्रंचापिसुशर्करा॥११॥ फलानांचरसंदेवियथासंभवमुत्तमं॥ संपादयेच्चस्नानार्थंअभ्यंगंवापिकारयेत्॥१२॥ यवतंडुलजावापिसतिच्छाश्वासनाशिवे॥ गंधपुष्पफलैःपूर्णंधूपदीपाद्यलंकृतं॥१३॥ मनःप्रसादजनकंपूजास्थानंप्रविश्यच॥ सुदिनेशुभनक्षत्रेचंद्रताराबलान्विते॥१४॥ प्राङ्मुखोवाउदङ्मुखोवापिकुशचैलाजनेऽऽसने॥ आचम्यउपविश्येयवमेकल्प्यविधिपूर्वकं॥१५॥ मामनाम्नाशिवंस्मृत्वाशांभवान्भस्मभूषितान्॥ शिवाभिषेकेवरयेच्छिवमर्चनमंत्रतः॥१६॥ निर्माल्यमपनोद्यैवचंडायगिरिजेतदा॥ कल्पयेदासनंतत्रशिवायपरमंत्रतः॥१७॥ धर्माधर्मसुखैरारयअनंतासनमेवहि॥ आधारशक्तिसहितंभूतसृष्टिंविधायचा॥१८॥ उद्बोध्यप्रणवेनेशांविद्याहृत्पद्मकेस

रे॥ पंचकोशोपरिष्ठाच्चध्यायेदेवमुमासखं॥ १९॥ चारुचामीकरप्रख्यंनीलग्रीवंत्रिशूलिनं॥ बा
लेंदुमुकुटंसोमंसर्वाभरणभूषितं॥ २०॥ ध्यात्वैवंसजपेत्धीमान्मंत्रंवर्णेषडक्षरं॥ शतार्धंवा
सहस्रंवानान्यचित्तोद्भुतंशिवं॥ २१॥ आधारपात्रमध्यस्थंशंखंवै दक्षिणावर्तं॥ सव्यावर्तात्को
टिगुणंशिवार्चनविधौविदुः॥ २२॥ पूजयेच्चघटंतत्रशंखंपुष्पोदकावृतं॥ आवाहयेत्सहृदे
वंहृदयालिंगसंस्थितं॥ २३॥ प्रसादयेत्तनोलिंगेनिधीर्देतिमहेश्वरं॥ निरीक्षणंसंनिरोधंलक्षकु
र्याद्धिचक्षणः॥ २४॥ पीठेस्थाप्यशिवेलिंगंपुष्पछन्नेसुधूपिते॥ पाद्यार्घ्याचमनंतत्रदेयंदेवि
षडक्षरे॥ २५॥ विशोध्यलिंगंशुद्धोदैः तैलेनस्नापयेच्छिवे॥ गंधावसिक्तेनतदामधुपर्केनु
दापयेत्॥ २६॥ पंचगव्येस्ततस्नाप्यतत्पेः तस्मैश्च घर्षयेत्॥ क्षीरेणसेचयेल्लिंगंकुंभमानंयथारुचि
॥ २७॥ आवोराजेतिमंत्रेणदधिक्राण्णेतिवैदधि॥ घृतंमिमिक्षेतिघृतंमधुवातेतिवैमधु॥ २८॥
पंचाक्षरेणसितांयाःफलिनीतिफलोदकं॥ नारिकेलजलंपुण्यंकदलीफलमंडलं॥ २९॥ फन
सोरुमहाकाशांलथाम्रसम्भृतमं॥ जंबीरेसुभवंसारंकरयंत्रप्रपीडितं॥ ३०॥ गंधकर्पूरकस्तूरि
पाटीरागरूजंजलं॥ हेमरत्नजलंदेविदेयंलिंगस्यमूर्धनि॥ ३१॥ सकूर्चकेणदर्भाग्रैःभर्गसं
प्रोक्ष्यवारिणा॥ ब्रह्मकूर्चेहितंदेविस्नानंशतगुणाधिकं॥ ३२॥ उद्वर्तनांतरेस्नानंकारयेदुष्णवारि
णा॥ यथासंभवमेतेषांकार्यंस्नापयमीश्वरं॥ ३३॥ दीपान्प्रज्वालयेद्देवि घृतात्कान्धूपगंधिना
न॥ हविस्तत्रशिवेकिंचिन्निवेद्यप्रणवेनतु॥ ३४॥ धारापात्रस्यतोयेनकलशस्थेनसेचयेत्॥

रुद्रैरेकादशगुणैरेकद्वित्रिक्रमाद्द्विजैः॥३५॥ नानावादित्रघोषेण सेचयेल्लिंगमेश्वरं॥भवायेति
नैवेद्यं तेनतर्पयेदष्टनामभिः॥३६॥ विशोध्यवाससालिंगमतंगैश्चसुपीठके॥ वस्त्रोपवीतंगंधा
द्यंभस्मपांडरमुत्तमं॥३७॥ अक्षताभरणानीशेसमर्प्यपरमेश्वरे॥बिल्वमंदारकल्हारपुंडरीकैःप्र
पूजयेत्॥३८॥ कृष्णागरुद्भवंधूपंदेयंज्येष्ठेविशेषतः॥ घृतदीपाः ततोदेयाःसाज्वलास्तत्रशांक
री॥३९॥ त्रिशाखैर्वर्वरबिल्वैश्च भवायेत्यष्टनामभिः॥ निधनेत्यादिमंत्रैश्च पूजयेत्परमेश्वरं॥४०॥
क्षीरान्नंघृतसंयुक्तंगोधूमापूपसंयुतं॥ ज्येष्ठेदेयंविशेषेणज्येष्ठदेवायसादरं॥४१॥ शारेवाप
द्रुततांबूलमष्टकल्कसमन्वितं॥ जातीपत्रफलेलाद्यंमुष्टिक्रमुकखादिरं॥४२॥ नागवल्ली
दलोपेतंमुद्धचूर्णंचसाष्टकं॥ नीराजयेत्ततोलिंगंशतदीपैर्मनोहरैः॥४३॥ वेणुवीणादि
निनदैः दुंदुभीकाहलोहीदिभिः॥ कर्पूरखंडजैर्दीपैः नीराज्यपरमेश्वरं॥४४॥ छत्रंचचा
मरंदेवि व्यजनंदर्पणंतथा॥उपचारमशेषंचकृत्वाचैवप्रदक्षिणाः॥४५॥ नमस्कारादि
दशाकंनर्तनंस्तुतिपूर्वकं॥ नामभिः पूजयेदेवं देवदेवमुमापतिं॥४६॥ स्तुत्यानयास्तुवीतेशं
ज्येष्ठेश्रेष्ठगुणान्विते॥ नमोज्येष्ठायहृष्टाय शिपिविष्टाय धातवे॥४७॥नमःपुष्टिप्रसादाय
गोरक्षायकपर्दिने॥अभ्युदीर्णायदीप्तायवज्रहस्तायशाक्त्रिणे॥४८॥ नमआशावसानायस
हमानायहेतवे॥ ध्वजिनेदंडिनेचैववंवरायप्रसादिने॥४९॥ उग्रायाप्युग्रकायायचब्रभवेऽभ्रमतेनमः॥
नमस्त्विष्टायपूर्णायहृताय प्रहृतायच॥५०॥ तव्यायचसमुद्रायायसभायाःपतयेनमः॥ अहिंसायाप्यलो

लोभायपंचास्यायसुधन्विने॥ ५१॥ त्रिनेत्रायसुपार्श्वायतुष्टायपंडरायच। शिवायशांतरूपायशा
न्तावर्तायतेनमः॥५२॥ अन्तासन्नपालायआलमालायतेनमः॥ नमोभवायरुद्रायकद्रुद्रायप्रचे
तसे॥५३॥ नमस्तेंद्रियहीनायलेलिहानायस्त्रक्षिणे॥ विश्वायविश्वरूपायविश्वतः शिरसेनमः॥
॥५४॥ सर्वतःपाणिपादायसर्वेंद्रियविहारिणे॥ रुद्रायप्रतिरूपायखंडचंद्रधरायच॥५५॥ वि
श्वोत्पत्तिविनाशायषडूर्मिरहितायच॥ नमः सिद्धायसाध्यायध्यायमानायतेनमः॥५६॥ भयो
६ शंभवेच भुवेचविभवेविभवेप्रभवेनमः॥ ढुंढुभ्याय हन्तव्यायशंगायायप्रमायच॥ सुवीरायसुघोरायअक्षो
भ्यक्षोभणायच॥ सुप्रजायसुमेध्याय सुधाम्नेनंतचक्षुषे॥५७॥ नमोबुक्षायश्रुक्षायवक्षमोक्षाय
तेनमः॥ नमस्तेभूतभव्यायवर्तमानायतेहंगते॥५८॥ नमोभवायभद्रायघनघोषायतेनमः॥ प्रपन्न
जनरक्षायभक्तपापहरायच॥६०॥ साकेतवासगोप्याययमगर्वहरायच॥ भद्रायरुद्ररूपायतं
द्रायचनमोनमः॥ ६१॥ नमस्थूलायसूक्ष्मायदृश्यादृश्यायगोप्त्रणे॥ वर्धनेज्वलनेचैवग्रस
नेक्षमतेनमः॥६२॥ नमःसुचारुकेशायउरुवक्षशिखायच॥ नमोनमःसुवर्णायतपनीयनिभाय
च॥६३॥ विरूपायप्रसन्नायसर्वरूपायतेनमः॥ देविनामसहस्रेण पूजयेज्येष्ठमासिके॥६४॥
स्तुवितेवंमहादेवंस्तवेनानेनसर्वदा॥ तस्याहंपरमप्रीतः दिशामिपरमांगतिं॥६५॥ शंभोभूमि
शातांगसंगशरहनींगांगफालानलज्वालापांगवतंगचन्द्रनमहानेत्रेशतांधप्रभो॥ भस्मा
भ्यंगकुरंगसंगसुकरस्फारस्फुरगोगांगसल्लीलालोलमहोत्तमांगभगवान्छंगांवमां सर्वदा।

॥६६॥ विश्वेशानदयानिधानभगवन्याहीशपंचाननस्वामिन्रूपेतककाननंसचरंप्रियवसन्या
घाघाजिनाळंकृतं॥दीनानामवनायकालकलनाहीनायदानाधिका दानायास्तुवनेस्तुते हशिवस
दाकारुण्यवारान्निधिः॥६७॥मयस्करसुनरकरप्रवरपाहि विश्वेश्वरप्रसीदपरमेश्वरत्रिपुरमा
रदेहहरकर॥जलंधरगरंधरमथमदेवशंभोहरप्रसीद दययाधुनाशिवदपाहिगंगाधर॥६८
सर्वसर्वदसुपर्वपूजितपर्वनेत्रातनयाप्रियप्रभो॥कालगर्वहरखर्वविष्णुहृत्पंकजवासभग
वन्प्रसीदमां॥६९॥भवभवभयहरभीमभवांतकभावहृदंनरसुंदरविग्रह॥पाहिशिवाव्ययदे
वदयाकरशंकरसुखकरशंकुरुमे॥७०॥स्तवेनानेन देवेशि स्तुवीतपरमेश्वरं॥ज्येष्ठेमासिवि
शेषेणन क्रंभक्तोयहव्यभुक्॥७१॥एकवारंद्विवारंवात्रिवारं वायजेद्ध्रुवं॥ज्येष्ठायामथपौ
र्णम्यांहोमकार्योयथाविधि॥७२॥दद्याद्गोमिथुनंतेभ्योसवत्संचसदक्षिणं॥दीनानाथानभो
जयित्वास्वयंभुंजीतबंधुभिः॥७३॥ज्येष्ठमासार्चनं देवि कथितंते समासतः॥यत्कृत्वाम
नुजः सद्योलभेत्फलमनुत्तमं॥७४॥शिवालयेलिंगमौलौश्रीश्वेरद्याद्गलंतिकां॥मासद्व
यंसुशीतेनगंधितेनजलेनच॥७५॥सच्छिद्रंकारयेत्कुंभंधारयेत्लदहर्निशं॥कृत्वेवंयाति
सदनंमदनांतस्यमेशिवे॥७६॥वंशासाहस्रसहितोविमानेनार्करोचिषा॥ ॥ईश्वर
उवाच॥ ॥सदाकालकालंहृदाभावयंतः कृतांताभयंसंत्यजंत्येवसंतः॥सुदाबिल्वपत्रैः
शिवंपूजयंतः भिदानेवपश्यंतिलोकंप्रशांताः॥७७॥ज्येष्ठेविशिष्टशिपिविष्टसदेष्टलिं

गसंपूज्यकोष्ठाकनिवल्लभस्यात्॥ दुःखःकनि येपिचकुक्षितोगोरूप श्वभ द्रुकनरोगविशेषः॥७९॥
॥ ॥ इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेराज्येपष्ठमासार्चनंषोडशोध्यायः॥१६॥ ॥
श्रीमहादेवायनमः॥ ॥श्रीईश्वरउवाच॥ ॥आषाढार्चनमापाढेप्रवक्ष्यामिशृणुयत्नत्॥ यत्कृ
त्वामनुजःसद्योममैवगणपोभवेत्॥१॥ गणपैश्चपुराचीर्णंव्रतमाषाढमासिकं॥ स्नात्वानद्यांव
हिर्देवेसरस्यापिचपावने॥२॥ हृदिध्यात्वामहादेवमामीशमुमयान्वया॥ प्राणानायम्यसंकल्प
भैरवाननुमान्यच॥३॥ अप्सुसंस्थात्रिधाविरुद्रानमनुज्ञाप्यमद्दंततः॥ तटेसंस्थाप्यसंस्नायेत्रि
राचम्यशिवंस्मरन्॥४॥ अप्लिंगैर्वारुणैर्मंत्रैःसपवित्रकरःशुचिः॥ बिभ्रयाधौतवसनेपादौप्र
क्षालयेनततः॥५॥ अग्निरित्यादिभिर्मंत्रैःविमृज्यांगानिभस्मधृक्॥ त्रियायुषेणमंत्रेणत्रिपुंड्र
परिशोभितः॥६॥ त्रियंबकेनमंत्रेणरुद्राक्षांधारयेत्तनोः॥ शिरोललाटेहृदयेकंठबाह्वोश्च
कर्णयोः॥७॥ द्वात्रिंशत्कंठमूलेचचत्वारिंशतिमस्तके॥ भ्रुवोरेकंशिखायांचकर्णयोःषट्प्रकीर्तिता
ताः॥८॥ बाह्वोःषोडशादेवेशिहस्तयोर्द्वादशैवहि॥ पुण्याःमलकमानेनमालांवक्षसिधारयेत्॥
॥९॥ शतायष्टकलितांभवत्यानदूर्ध्वंचप्रशस्यते॥ जपमालांतथाकुर्यात्समास्यांलक्षणैर्युतां॥१०॥
स्वर्णेनराजितेनापिसूत्राक्षग्रथितांशुभां॥ अष्टोत्तरशतंकुर्याच्चतुःपंचाशदेववा॥११॥ पं
चविंशतिमानावातनोहीनाधमास्मृता॥ मोक्षार्थीपंचविंशत्याधनार्थीविंशतांजपेत्॥
१२॥ पुष्ट्यर्थीपंचविंशत्यांपंचदश्याभिचारके॥ सप्तविंशतिरुद्राक्षमालायास्त्रीवशंकरं॥१३॥

एवंकुर्यात्सदा मालामास्यमास्थेनयोजयेत्॥ एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति॥ १४॥
अवध्यंनंप्रतिस्रोतंवन्हिस्तंभंकरोति च॥ द्विवक्त्रो हरगौरीस्यात्स्वर्णगोवधमापहृत्॥१५॥ त्रिवक्त्रो ह्यग्निजन्माय पापराशिंविनाशयेत्॥ चतुर्वक्त्रः स्वयंब्रह्मानरहत्यां व्यपोहति॥ पंचवक्त्रस्तु कालाग्निरगम्याभक्ष्यपापनुत्॥ षट्‌वक्त्रस्तु गुहोज्ञेयः भ्रूणहत्यादि नाशयेत्॥१७॥ सप्तवक्त्रस्त्वनंतः स्यात्स्वर्णस्तेयादिपापहृत्॥ विनायकोष्टवक्त्रस्यात्सर्वान्नतविनाशकृत्॥१८॥ भैरवोनववक्त्रस्तु शिवसायुज्यकारकः॥ दशवक्त्रः स्मृतोविष्णुर्भूतप्रेतभयापहः॥ १९॥ एकादशमुखोरुद्रः नानायज्ञफलप्रदः॥ द्वादशास्यो द्वादशार्कैदैवकोनिंदकापहृत्॥२०॥ त्रयोदशास्यः श्रीकंठोशीघ्रंसंकटयेदघं॥ चतुर्दशास्योलोकात्मालोकदानफलप्रदः॥ २१॥ एवंज्ञात्वा स्यमहात्म्यंधारयेद्भुविमानवाः॥ विनामंत्रेणयोधत्तेरुद्राक्षंभुविमानवः॥२२॥ सयातिनरकंघोरंयावदिंद्राश्चतुर्दश॥ रुद्राक्षमलदेहेनयत्कृतंपुण्यसंचयं॥२३॥ तद्भवेत्कोटिगुणितंपापंचेन्नस्यतिक्षणात्॥ योददातिद्विजेभ्यश्चरुद्राक्षंभुविसन्मुखं॥२४॥ तस्यप्रीतोभवेद्रुद्रः स्वपदं संप्रयच्छति॥ इत्थंधार्यं चरुद्राक्षानरुतनित्यक्रियोद्विजः॥ क्षत्रियोवाथवैश्योवाधनाढ्योभक्तितत्परः॥ पूजास्थानंततोगत्वाउपलिप्तंविचित्रितं॥२६॥ रंगवल्लिविलासाढ्यंपञ्चस्वस्तिकचित्रितं॥ मंडपंपुष्पमालाढ्यमारचय्यसपीठकं॥ वितानशोभितंतंचकदलीस्तंभशोभितं॥ २७॥ तोरणेनसुविस्तीर्णेधूपदीपविराजितं॥ आषाढेमौक्तिकंलिंगंपूजयेदन्यदेववा॥

॥२८॥ हेमरौप्यंताम्रजंवापितैलंमार्त्तिकंशिवे।कुंभसंस्थापयेद्देवंनदीतोयैःप्रपूरितं॥२९॥
पाद्यार्घ्याचमनंपात्रंपुष्पांबुपरिपूरितं॥ दापयेदर्घ्यपात्रंचशिवस्याग्रेमहेश्वरि॥३०॥ पंचगव्यन
थातैलंदधिक्षीरघृतंमधु॥ क्षीनाचैवेक्षवीपुण्यापलसारंविधानतः॥३१॥ गंधपुष्पाणिदि
व्यानिसंपाद्योत्पलपाटलं॥ बिल्वपत्राणिदिव्यानिसंस्थाप्यानिविशेषतः॥३२॥ नारिकेलजलंचै
कदलीफलमंडकं॥पनसंचाम्रसुरसंसुजंबीरंसंशिवे॥३३॥गंधचंदनतोयंचरत्नस्वर्णकुशोद
कं॥कूर्चोदकंतथादेविपात्रेषुस्थापयेत्पृथक्॥३४॥संकल्पशांभवैःसार्द्धंमासादौशिवपूजनं॥द
शावरंशताथंवासहस्रंवाजपेत्सुधीः॥३५॥पंचाक्षरंपरंमंत्रंप्रणवेनषडक्षरं॥ समाधाश्चाक्षना
ग्राह्याःतस्मिन्मासिविशेषतः॥३६॥आधारपीठपूजांतेकृत्वासंस्थाप्यपीठके॥स्नापयेद्देव
देवेशंत्रिनेत्रंनीलसंगलं॥३७॥चारुचंद्रकलामौलिंसोमंध्यात्वामहेश्वरं॥स्थाप्यप्रोक्ष्या
वगुंठ्यैवसन्निरोधनिरीक्षणैः॥३८॥पाद्यार्घ्याचमनंदत्वामधुपर्कंचनिर्मलं॥पंचगव्यैःत
तस्नाप्यस्नानंपंचामृतेनतः॥३९॥गव्यमेवप्रयुंजीतमासिमासिशिवेशुभं॥स्नानाशक्तस्त
थाभंगमेतेषांदेविकारयेत्॥४०॥स्नानंपलशतंज्ञेयमभ्यंगःपंचविंशतिः॥पलानांद्विसहस्रे
तुमहास्नानंप्रकीर्त्तितं॥४१॥शिवस्यसर्पिषास्नानंप्रोक्तंपापक्षयंकरं॥तावतामधुनाद
ध्नाक्षीरेणसितयापिच॥४२॥स्नानेफलानांश्रमिनःसहस्रंपरमंशिवे॥अभ्यंगेषुशतान्येव
फलानिअभिषेचने॥४३॥नानावादित्रघोषैश्चस्नापयेत्परमेश्वरं॥ततन्मंत्रैश्चरुद्रेणश्रीम

त्पंचासरेणवा॥४४॥ उद्दर्तनंनांतरस्नानंकारयेद्घर्षयेत्तणैः॥ सुवाससानतः छन्नेपीठेस्थाप्यमहेश्व
रं॥४५॥ धूपंदीपंततोद लानैवेद्यहविरेवहि॥ सत्ताकैराघतंदेविसतांबूलसुमापतेः॥४६॥
ब्राह्मणैः सेचयेल्लिंगमविछिन्नांबुधारया॥ शंखैः शृंगैस्तथाकूर्मैर्वर्धन्यावाथयासुखं॥४७॥
शतरुद्रावृत्तिपरः एकद्वित्रिसशांतिकं॥ एकादशगुणंवापिसशांतिचमकान्वितं॥४८॥रु
द्रस्यांतेचनैवेद्यंपुनःपुनरतंद्रितः॥ भवायेत्यष्टनामभिर्शानपयेतमहेश्वरं॥४९॥ विशोध्यवा
ससालिंगंपीठेसंस्थाप्यपूजयेत्॥ उपवीतंततोभस्मवासोगंधंचसाक्षतं॥५०॥ दत्वाभरणपुष्पा
णांमालिकाबिल्वनिर्मितः॥ बिल्वपाटलकल्हारैः कुसुमैःपूजयेछिवं॥५१॥ निधनेतिभवा
येतिनामभिःपूजयेछिवं॥ दीपमालाविशेषेणदेयादेवघनान्विता॥५२॥ देवदारुद्भवोदी
पःदेयस्तस्मिन्विशेषतः॥ आढकान्नंघनाक्तंचसगुडंविनिवेदयेत्॥५३॥ माषापूपाःप्रदेया
वैतांबूलंचततःपरं॥ नीराजयेत्ततोलिंगंत्रिवारंघ्रतदीपकैः॥५४॥ कर्पूरखंडजैर्दीपैर्दीपालु
दुक्षयेछिवे॥ वेणुवीणामृदंगादीन्शंखदुंदुभिकादिभिः॥५५॥ हंसाभचामरेचैवछत्रंशशि
निभंशिवे॥ पताकाव्यजनादर्शौदेयंदेवायशूलिने॥५६॥ प्रदक्षिणात्रयंकुर्यान्नमस्कारादि
पंचकं॥ पूजयेन्नामभिर्देवंबिल्वपाटलपंकजैः॥५७॥ स्तुवीतैवंमहादेवमाषाढेश्रणुपार्व
ति॥ नमईज्यायपूज्यायउपजीव्यायतेनमः॥५८॥ नमःक्षेत्रायवरदायवत्सलायनमोनमः॥
नमोभूतायभव्यायसत्यायसत्यायवज्रवे॥५९॥ नमोवेपद्मवर्णायमृत्युघ्नायचमृत्यवे॥ नमोगौ

रशरीरायश्यामायलोहितायच॥ ६०॥ महासंध्याभ्रवर्णायचारुरूपायदीक्षते॥ नमः कमलहस्ता
यविश्वग्रासायमेदिने॥ ६१॥ प्रमाणायसुरेशायअवध्यायामरायच॥ नमोरूपायरूप्यायशाश्व
तायासनायच॥ ६२॥ बृहतेमहतेचैवविभ्रांतायकुशायच॥ दुर्गमायमहेशायरोधायकपिला
यच॥ ६३॥ अप्रतर्क्यशरीरायबिल्विनेरमसायच॥ सिकत्यायप्रवाह्यायरेष्मायचनमोनमः
॥ ६४॥ प्रसन्नायपुराणायवामदेवायदंडिने॥ सुमेधसेकुलालायनमस्तेस्तुशिखंडिने॥ ६५॥
चित्रायचित्रवर्मायत्रिनेत्रायत्रिशूलिने॥ चेकितायानरूष्णायसुहितायहितायच॥ ६६॥ नमः
क्षीतायदीनायवज्रसंहननायच॥ रक्षोघ्नायविषघ्नायसितिकंठायमन्यवे॥ ६७॥ नमः सोमा
यरूद्रायसुताम्रायारूणायच॥ भर्गायोग्रायभीमायनिग्रमायुधधरायच॥ ६८॥ सुप्रमोदाय
प्रमोदायमधुप्रीतायतेनमः॥ प्राणायप्रणवेशायसुहस्तायसुवाससे॥ ६९॥ भिषजेमहतेचै
वदुर्गाध्यक्षायलिंगिने॥ नक्तंचराययुक्तायभक्तपापहरायच॥ ७०॥ अनामयायशर्वायमहाका
लायधन्वने॥ पंचाक्षरप्रियायायमृगाजिनधरायच॥ ७१॥ अघोरायविराधायदूतायप्र
हितायच॥ नमोघ्नायहिमघ्नायक्रतवेक्रतवेनमः॥ ७२॥ ज्योत्स्नाजालायफालायविशाला
यनमोनमः॥ उर्ध्वरोम्णेमहारोम्णेकृत्तिवासायतेनमः॥ ७३॥ मृगव्याधायदक्षायदशशिक्षा
यतेन्नमः॥ ॥ इत्येतन्नामभिःपूज्योज्येष्ठेदेवोमहेश्वरः॥ स्तवेनानेनदेवेशभाषाढसंस्तवीन
मां॥ स्वामिसोमशाकलाममलमौलेसोमहेममयादिव्यधुभोगं॥ व्योमकेशजनकाममहेशपाहिसांम-

खिलदुःखसमूहान्॥७५॥ वामदेववरसामजचर्मस्फारशोभिकुसुमांगमहेश॥धूमवाहवहनो
नमशोभोव्योमधामभगवन्नवर्मात्वं॥७६॥ शंभोबालमृगांकशेखरमहासर्पांगमालोज्वल
त्कंदर्पांतकशर्वसर्वविभोदूर्वादलार्च्योघ्रिकं॥ वेदावाखिलपालगरघन्यूतांगसंगात्तुलेलीला
गांगसुतुंगभंगपरमानंगांगसंगावर्म॥७७॥ विश्वोत्पत्तिविनाशसंस्थितिजगत्कार्यंतत्कारणंजी
वेशाश्रयभेदभानमखिलंयन्नामरूपात्मकं॥ कालानल्पविकल्पशिल्पसुमहासंकल्पकल्पांतकं
त्वयानंदपयोनिधांबुलहरीविधानतेकेवलं॥७८॥ विष्णुब्रह्मसुरानरवराः येभासुराभुसुराः
संजातस्थितिनाशमध्यपतिनाभ्रांताश्वसंसारिणः॥ विश्वाधीश्वरशंकरत्रिभुनापाशात्दुःखार्ति
हं कालातीतमहेश्वरावभगवन्विश्वंचविश्वाधिकं॥७९॥ इतिस्तुत्वात्रिकालंवापूजांतेवाम
हेश्वरं॥आषाढ्यामथपौर्णिम्यांहोमंकार्योद्विजैः सह॥८०॥ दत्वागोमिथुनंदेविसवत्सांच
सदक्षिणां॥ नतस्तानोभवेन्मासंब्राह्मणैः पारणांततः॥८१॥ एवमाषाढपूजांगोआषाढःश्री
तिमान्भवेत्॥ चंद्रार्भयाने र्यान्यंतेमम लोकंसनातनं॥८२॥ ॥ईश्वरउवाच॥ आषाढंआषा
ढपरेर्च्यलिंगेमह्दढयोभिभवेद्दिपुंसः॥ परिहृढोवैभवनेगणोघगण्यातत्पुण्यसुभसुवाढं॥
॥८३॥ ॥ इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेआषाढार्चनेसप्तदशोध्यायः॥
॥१७॥ ॥श्रीमहादेवायनमः॥ ॥श्रीईश्वरउवाच॥ ॥ श्रावणार्चनमीशानिश्रणुश्रावण
पारगं॥ यस्मिन्संपूजितोदेविभगवानिंदुभूषणः॥१॥ ददातिकामान्विपुलानतद्विधिंश्रु

णुसादरं॥ ब्रह्मविष्ण्वादयो देवाः श्रावणे र्च्यम हेश्वरं॥ २॥ लेभिरे परमां सिद्धिं मुनयो गणपाम
म॥ पुण्यं पुण्योदयं मासः गण पुण्योम हेश्वरि॥ ३॥ मासादौ श्रावणे देवि नद्यां सरसि वाशिवे॥
ध्यात्वामां प्रतेयेः स्नात्वा त्रिराचम्य शुचिस्स्वयं॥ ४॥ सपवित्रकरः शांतो संकल्प्य विधिपूर्वकं॥
पट्टं शुक्लपरिधाने भस्मरुद्राक्षभूषणः॥ ५॥ कृतनित्यक्रियो देवि प्रातर्हुतहुताशनः॥ येतानं
वातयागर्ध्रंविलाना लंकृतं शुभं॥ ६॥ वरिवस्या गृहं शंभो उपलिप्तं सुशोभनं॥ पंचवर्णैः पद्मदले
स्वस्तिकादिर्विचित्रितं॥ ७॥ पुष्पगंधाधिवसितं तोरणाद्यैरलंकृतं॥ तन्मध्ये संस्थिते पीठे लिंग
नीलविनिर्मितं॥ ८॥ हेमरौप्योद्भवं देवि स्फाटिकं वा यथा रुचि॥ न क्षीतोयेन संपूर्णं धौतं कुंभं
निवेशयेत्॥ ९॥ पाद्यार्घ्याचमनीयानि पात्राण्यग्रे निधाय च॥ सपुष्पांबुनि देवेशि पंचगव्या
मिसादरं॥ १०॥ पंचामृतानि सर्वाणि संपाद्य च यथा बलं॥ गंधपुष्पफलादीनि धूपदीपानि शं
करि॥ ११॥ बिल्वद्रोणार्कमंदारकुटजानि प्रसादयेत्॥ वरयेच्छांभवान्नत्र भस्मरुद्राक्षभूषणा
न्॥ १२॥ श्रावणे शिवपूजार्थे स्वयमाचम्य वाग्यतः॥ प्राङ्मुखो वोदङ्मुखो वापि चेलाजिनकु
शासने॥ १३॥ पंचाक्षरं जपेत्तत्र शतार्धं च सहस्रकं॥ ध्यायेद्देवं विरूपाक्षं नीलकंठमुमासखं॥
॥ १४॥ वरदाभयहस्तं च मृगटंकधरं शिवं॥ त्रिपुंड्रं विलसत्फालं चंद्ररेखाविराजितं॥ १५॥
अंगादिन्यासमारभ्य पीठपूजां प्रकारयेत्॥ भूतशुद्धिं विधायादौ पात्राण्यभ्यर्चयेत्क्रमात्॥ १६॥
कुंभं सपल्लवं सुरवंद्रां खचलदनंतरं॥ पुष्पांबुपूरितं देवि मातृकाक्षरविद्यया॥ गंधपुष्पफलादि

नांदोषप्यदोषनिवारणे॥भस्मत्रियंबकेनेशोदेयंपात्रेषुशोधनं॥१८॥क्रिमिकेशादिदुष्टानां दृष्ट्वा
हतान्क्रियच्छिवे॥आवाहयेत्ततोलिंगेदेवंवैमूलमंत्रतः॥१९॥गायत्र्यावामदेवास्यस्थाप्यपीठे
समंत्रकं॥निरोधंचैवसांनिध्यंप्रसादननिरीक्षणं॥२०॥कुर्याल्लिंगेततोदेयंपाद्यार्घ्याचमनंक्र
मात्॥मधुपर्कंततोदेविपंचगव्यंततः परं॥२१॥ क्षीरेणस्नापयेद्देवंदध्नाचाज्येनवैशिवे॥
मधुनासितयावापिद्रोणमानेनसेचयेत्॥२२॥ नारिकेलजलैश्चैववरंभाफनससंभवैः॥इ
क्षुजंबीरसारेणहिरण्यकुशतोयतः॥२३॥पुष्पांबुभिर्गंधतोयैःकुर्चादिप्रणवेनच॥ स्नापये
द्देवदेवेशंनानावादित्रनिस्वनैः॥२४॥धूपश्चागरुसारोत्थोदेयस्तस्मिन्महेश्वरे॥ घृतदीपान्त
तोदद्यात्हविःकिंचिन्निवेदयेत्॥२५॥ तांबूलंचततोदत्वास्नानेथैधानिधायच॥ स्तर्शानिचम
कोपनेजप्यारुद्रैर्द्विजैःसह॥२६॥ शिवाभिषेकेदेवेशिशाभवेब्राह्मणैःसह॥एकादशाव
रेरुद्रैरेकद्वित्रिवरोथवा॥२७॥ भवायेत्यष्टनाम्नाने तर्पणंस्यात्सकूर्चकं॥धिमज्यवा
ससालिंगंपीठसंस्थाप्यमंत्रकं॥२८॥अभ्यन्यमस्तकेलिंगंकुर्यात्पुष्पेनुसंक्षिपेत्॥उप
नीतंतथावासोगंधभस्मचसाक्षतः॥२९॥ यवगोधूममिश्रंयातंडुलारवंडसंभवाः॥ देया
स्ततोमहादेविरत्नाभरणमुत्तमं॥३०॥ स्वर्णबिल्वदलान्यथोदेयानिविशेषतः॥नप
र्युषितदोषोवैस्वर्णरत्नसुमेषुवै॥३१॥पुनःप्रक्षाल्यसुजनैग्राह्याणिवरबिल्वजं॥बि
ल्वमंदारकुसुमैःकुटजैःश्चार्वर्णचयेत्॥३२॥अगरुश्चततोधूपोदेयोदीपोघृताप्लुतः॥

तिलानां कृसरं देयं अपूपं घनपाचितं॥ ३३॥ गुडखंडं च सघृतं सोपदंशं निवेदयेत्॥ तांबूलं फलजालं च निवेद्य सुस्वखंडकं॥ ३४॥ दीपानामावलिं कुर्यात्सहस्रं शतमेव वा॥ नीराजयेत्ततो लिंगं दीपैः कर्पूरखंडनैः॥ ३५॥ प्रदक्षिणात्रयं कृत्वा नमस्कारांश्च पंचकं॥ कुर्याद्भक्तिप्रवणधीः शिवाय विधिपूर्वकं॥ ३६॥ पौराणैर्वैदिकैः स्तोत्रैः स्तुवीतेवं महेश्वरं॥ नाम्नां शताष्टकेनेशं पूजयेत्संस्तुवीत च॥ ३७॥ छत्रं च चामरं दिव्यं व्यजनादर्शकं शिवे॥ दत्वा देवाय बिल्वाद्यैः पूजयेल्लिंगमीश्वरं॥ ३८॥ विश्वेश्वराय विश्वाय हराय प्रमथाय च॥ पूष्णो दंतविनाशाय भगनेत्रांतकाय च॥ ३९॥ सुरथाय सुपथ्याय मन्मथांतकराय च॥ महिमानाय तीक्ष्णाय आर्द्रचर्मधराय च॥ ४०॥ श्मशानरतिनित्याय नमस्ते लुकधारिणे॥ बर्हिर्वर्हाय मानाय घनाय बहुगर्जिने॥ ४१॥ काव्यपूज्याय दृप्ताय सुप्ताय च पिनाकिने॥ परावराय नित्याय सत्यधर्माय ते नमः॥ ४२॥ महोमहाध्वरेशाय तंडुनृत्तप्रियाय च॥ विभीषणाय भीमाय भगप्रमथनाय च॥ ४३॥ सिद्धसंघायगीताय महाशेषांगदाय च॥ नमो मुक्ताट्टहासाय क्ष्वेलितास्फोटिताय च॥ ४४॥ नर्दते कुर्दते चैव नमः प्रमुदितात्मने॥ नमो मडाय श्वसते धावते विष्ठिताय च॥ ४५॥ ध्यायते जृंभते चैव रुवते द्रवते नमः॥ वल्गने क्रीडते चैव लंबोदरशरीरिणे॥ ४६॥ पिशंगश्मश्रुकेशाय अरुणाक्षाय अक्षयाय च॥ नमो विकृतवेषाय मुंडमालाधराय च॥ ४७॥ नमः उन्मत्तवेषाय किंकिणीकटये नमः॥ अमर्षणाय क्रूराय विष्णु

बाणधरायच॥४८॥नसिंहांत्रवमानायक्रोडदंष्ट्राविदारिणे॥गजरंनगदायायगोजिनांबरवा
सिने॥४९॥ नरूण्यपञ्चारपयायअरण्यपलयेनमः॥ अप्रमेयाय दीप्तायनिर्गुणायगुणायच॥५०॥
वाद्यप्रियायवाद्यायचूडामणिधरायच॥ नमस्तोकायचिंत्यायचोगिध्येयायशंभवे॥५१॥ नमोवेद्यां
तवेद्यायभववेद्यायभूतये॥ ओजसे तेजसेचैवभ्राजनेग्रसनेनमः॥ ६॥५२॥ एवंवैश्रावणेपू
ज्योबिल्वैर्नामभिरष्टकैः॥स्तवंपापहरंस्तुत्यामासिदंवंप्रसादयेत्॥५३॥गंगाधरांधकहरत्रि
पुरावमर्द वैदोघवेद्यभगवन्भवरोगवैद्य॥आद्यस्त्वमेवशशिमौलिविशालशीर्षे पूर्णोज्वलद्दह
विनाशनपाहिहीन॥५४॥ विघ्नाधिकप्रमथनाथउमासनाथमन्नायमन्मथहरांनककालक्रा
ला॥श्वूलप्रभोज्वलशरावरकार्मुकज्य।पाणिभगाक्षिमथनावपिनाकपाण्य॥५५॥गौरीपते
शशिकलामलचारुमौलेवंदारुवृंदमुकुटार्चितपादपद्म॥पद्माक्षपूजितपदांबुजकालमू
लनिर्वापणांधकहरावमदेवमांत्वं॥५६॥ शेषाहिभूषवरयोयकृतार्धकाययोगाखिलामलज
गम्युतिमायशंभो॥ वषायनेकिलजगत्कलनाविशेषोकाषायवस्त्रपरिधाननमोनमस्ते॥५७॥
अलिंगस्त्वमात्मकथंलिंगगर्भस्थः स्फुलिंगोपमंत्वतएवप्रसूतं॥जगन्नश्वरंशम्भुदेवैर्विचि
त्रं प्रसीदप्रसीदप्रभोचंद्रचूड॥एवंवैश्रावणेमासिपूज्यस्तुत्वामहेश्वरं॥ दद्याद्वैमिथुनंश्वेतंसव
त्संसदक्षिणान्वितं॥ ५९॥शांभवेभ्योद्विजेभ्योमंपौर्णम्यांभोजयेद्द्विजान्॥ स्वयंभुंजीतविभवंस्वपापू
पैर्मनोहरैः॥६०॥ प्रसाद्यदेवमीशानंमासांतेन्नभोजनं॥ एवंयःश्रावणेमासंपापयेत्पूज्ययामम॥

॥६१॥ सकिंकिणीयुतैर्यानैः पुष्पगंधसुशोभितैः॥ रुद्राणीरुद्रगणपैर्गीतवादित्रनिस्वनैः॥६२॥
यानि वंशसहस्रेण देहांते शंकरालयं॥ नित्यं नक्तशनो भक्तो कुर्याद्यस्मिन्विशेषतः॥६३॥ सोमवा
रेषु वा शक्तो कुर्यान्मल्लिंगपूजनं॥ स्वयं वा शांभवैः सार्धं भस्मरुद्राक्षधारिभिः॥६४॥ कृते रत्नमयं लिं
गं त्रेतायां हेमसंभवं॥ द्वापरे पारदं श्रेष्ठं पार्थिवं तु कलौ युगे॥६५॥ नित्यं पार्थिवलिंगार्चा विधिना [illegible]
वेदाकामदा॥ किं पुनः श्रावणे मासि सोमवारे शुभे पुनः॥६६॥ तत्रापि पार्थिवं देवि क्षिप्रसिद्धिप्रदा
यकं॥ पार्थिवेन तु लिंगेन बहवः सिद्धिमागताः॥ चतुरंगुलमानेन कार्यं लिंगं महेश्वरि॥ मृदाहरण
संघट्टप्रतिष्ठार्चा विसर्जनं॥६८॥ क्रमोयं पार्थिवे देवि भवाद्यैः पंचनामभिः॥ शांभवैरेव तत्कार्यं
भस्मरुद्राक्षधारिभिः॥६९॥ पंचाक्षरजपासक्तैः विप्रैर्वेदविदांवरैः॥ नान्यपुंड्रधरो देवि पूजनं
चेत्कृतं मम॥७०॥ कर्ता कारयिता वापि न फलं सम्यगाप्नुयात्॥ विना भस्मत्रिपुंड्रेण विना रुद्राक्ष
मालया॥७१॥ पूजितोपि महादेवः प्रसादं न करिष्यति॥ तस्माल्लिंगार्चनं देवि वैदिकैरेव कारये
त्॥७२॥ मल्लिंगं पार्थिवं लक्षं भुक्तिमुक्तिकरं परं॥ लिंगानामयुतं देवि महाराजभयं हरेत्॥
॥७३॥ विद्यार्थी लिंगसाहस्रं धनार्थी चैव तद्दर्धकं॥ पुत्रार्थी सार्धसाहस्रं कन्यकार्थी शतं च
यं॥७४॥ विद्वान् लिंगायुतं कुर्यात्सर्वपापहरं शिवे॥ राज्यार्थी च तथार्थी च कारयेदयुतत्रयं॥
॥७५॥ कांतार्थी पंचसाहस्रं द्रव्यार्थी तदर्धकं॥ मोक्षार्थी कोटिसंख्याकं विना ज्ञानेन तल्लभेत्॥
॥७६॥ भूमिकामः सहस्राणि रूपार्थी त्रिसहस्रकं॥ सुहृत्कामस्त्रिसाहस्रं वस्त्रार्थी शतपंचकं॥

॥७७॥ मारणार्थी चवान्त्रूणां सप्त सा हस्रमुत्तमं॥ नीलपुष्पैर्यजेल्लिंगं पुष्पैर्नैर्भीः समवाप्नुयात्॥७८॥
सर्वकामेनुरक्तानि बंधुकादीनि पूजयेत्॥ वशाकर्षणयिद्धेषे सहस्रेक्रमतोर्चयेत्॥ देशकालबले
ज्ञात्वा कुर्यान्मल्लिंगपूजनं॥ श्रावणेनुमहादेवि क्षिप्रं सिद्धिप्रदायकं॥८०॥ निष्कनिष्कार्धमेवे
शिदधा ब्राह्मणदक्षिणां॥ दरिद्रोपि तथा देयो यथा चोदेधात्सवत्सकां॥८१॥ तत्तन्मानानुसारे
णतर्पणं होमभोजनं॥ ब्राह्मणानां विशेषेण एष प्रोक्तो विधिः शिवे॥८२॥ पवित्रारोपणं कुर्या
च्छ्रावण्यां कार्तिकेपि वा॥ हेमरौप्य तथा क्षौमैः कर्पासैः ग्रंथितैः॥८३॥ पवित्राणि त्रिरावृत्या
कर्तितानि महेश्वरि॥ उत्तमं तु शतग्रंथिमध्यमं दशग्रंथिकं॥ त्रिग्रंथिर्वान्यूनमतो नदेयं न्यूनकराय
तु॥ प्रलंबतो जानुमात्रं कुर्याल्लिंगे शिवे तदा॥८५॥ संपूज्य च पवित्राणि रोपयेच्छ्रावणे शिवे॥
पवित्राणि शिवे देयो पवित्रा जायते भुवि॥८६॥ त्रिनेत्रप्रियरावस्याच्छ्रावण्यां शंकरार्चनात्॥ ॥
श्रीस्कंद उवाच॥ ॥ यः श्रावणे तिलसुपारणभूषणस्य लिंगानि पार्थिवमयानि च सोमवारे॥
व्यक्षेरक्षण प्रथित दोषहरे पिमासि नत्वा सनो यदि भवेत्स पापमुक्तः॥८७॥ विचित्राणि
चित्राणि दत्वा त्रिनेत्रे बिल्वविचित्राणि पापानि नाशं प्रयान्ति॥ सपुत्रैः कलत्रैर्युतः सर्वसत्रैः फलं य
च्च तस्याश्रुते दीर्घसत्वे॥८८॥ यः श्रावणे शशिशिवभूषणतुंगलिंगं त्यक्तेषणोर्च तिनरो धिय
णोपमानः॥ स्नात्वा शिवे त्रिषु च वर्णानि शिसोमवारे तन्मासि शंकरगणो भविता ग्रगण्यः॥
॥८९॥ ॥ इति श्रीशिवरहस्ये महादेवास्कंद रकादशांशेश्रावणार्चननामाष्टादशोऽध्यायः॥१८॥

॥श्रीमहादेव उवाच॥ ॥रुद्रं भाद्रपदे पूज्य भद्राणि लभते शिवे॥ नदरिद्रो भवेज्जंतुः विभवे सन्ति सर्वकर्चित्॥१॥ मासादौ देवि संकल्प्य स्नायात्तीर्थे बहिर्जले॥ नदी नद तटाकेषु वापी कूपासु वा शिवे॥२॥ त्रिराचम्य शुचिः शांतो उमाकांतं हृदि स्मरन्॥ सपवित्रकरो मौनी प्राणानायम्य वाग्यतः॥३॥ अग्निरित्यादिभिर्मंत्रैः भस्मोद्धूलनतत्परः॥ त्रिपुंड्रं रचयेद्भक्त्या शिरो बाहु ललाटके॥४॥ रुद्राक्षान्धारयेद्भक्त्या कंठे कर्णगले उरसि॥ नित्यकर्म विधायादौ संकल्प्यानियमव्रती॥५॥ मासार्चनार्थं वरयेद्ब्राह्मणान्छंभवान्शिवे॥ वेदतत्त्वपुराणज्ञान्शांतान्दांतान्जितेन्द्रियः॥६॥ भस्मरुद्राक्षमालाढ्यान् वरयेद्वेदपारगान्॥ नेः साकंमंडपं शंभोः कुर्यात्पुष्पविराजितं॥७॥ भूमौ चैवोपलिप्तायां रंगवल्यायुतेन तथा॥ कदलीस्तंभयुक्तेन रम्यादर्शविचित्रितं॥८॥ नदग्नं स्थापयेत्कुंभं सौवर्णं यमन्मयं तु वा॥ ताम्रं वापे तत्संदेवि आम्रपल्लवपत्रकं॥९॥ नदीनदाहृतेन तोयैः पूरितं शोधितं नवं॥ सामान्यार्घ्यविशेषार्घ्योपलपुष्पांबु पूरितो॥ १०॥ पाद्यार्घ्याचमने पात्रे कल्पयेच्च न दग्नतः॥ पुष्पांबु रितान्यत्र गंधयुक्तानि तान्यपि॥११॥ पंचगव्यं च गंधोदं मधुपर्कं तथैव च॥ पिधानपात्रसहितं पंचगव्यानि सादरं॥१२॥ क्षीरं दधि घृतं सुद्धं क्षौद्रं शर्करयान्वितं॥ नारिकेलांबु रंभादि फलं फान समेव च॥१३॥ इक्षुजं क्षीरसाराणि कल्पयेच्च पृथक् पृथक्॥ कुशारंनोद हेमोदं गंधकर्पूरजं जलं॥१४॥ पाटलोत्पलभित्रांबु पूरितं कलशं शिवे॥ कुर्यात्त्विवाभिषेकार्थे शोधितं गंधवासितं॥१५॥ ब्रह्मकूर्चोदकं ग्रा

संशंखवमध्यांबुधींकरि।। गोमेदसंभवंलिंगंस्थापयेदन्यदेववत्।। १६।। मंडपेस्थाप्यतल्लिंगं
प्राणायामेनशोधयेत्।। स्वदेहंचततोमंत्रंजपित्वाथषडक्षरं।। १७।। शतंसहस्रंदेवेशिध्याये
देवंमहेश्वरं।। चारुचंद्रोज्वलत्कांतंजटामुकुटशोभितं।। १८।। गंगाचंद्रकलामौलिंत्रिनेत्रंनी
लकंधरं।। सोमस्कंधधरंध्यायेद्देवदेवंमहेश्वरं।। १९।। पश्चाद्द्वारपीठंनकृत्वार्चनमुमेतदा
भूशुद्धिंभूतशुद्धिंचकृत्वास्वात्मतनुंशिवे।। २०।। शैवीमेवततोध्यायेत्षड्ऊर्मिरहितंतदा
।। हृत्पद्मकोशादुत्थायज्ञाननालेनशंकरं।। २१।। सव्यनासापुटेनैवनिःसृत्यांबुकरेणहि।।
लिंगमौलौन्यसेत्पुष्पंप्रणवेनैवकेवलं।। २२।। अवगुंठ्यावसर्पान्यस्तंनिरीक्षणपूर्वकं।।
पीठेस्नानमयेलिंगंस्थाप्यपंचाक्षरेणहि।। २३।। अथाष्टदेवंपंचार्घ्यंदापयेन्मधुपर्ककं।। पा
द्यमाचमनंचार्घ्यंआवाहननिरीक्षणं।। २४।। एतत्पंचार्घ्यमित्याहुश्चंदनागरुभादितं।। मधुपर्कं
ततोदद्यात्पंचगव्यमनंतरं।। २५।। क्षीराभिषेकंचततोगंधोदककुशोदकैः।। स्वर्णरत्नोदके
देविसितयाचततःपरं।। २६।। नारिकेलांबुसलिलैः कदलीफलमंडलैः।। पनसैश्चमहाको
शैः रसालरसकैस्तनः।। २७।। जंबीररसैश्चततोगंधोदककुशोदकैः।। स्वर्णरत्नोदकैर्दे
वीततःलिंगेश्चमंत्रकैः।। २८।। ततःशुद्धोदकंदेविसेचयेद्रुद्रसंख्यया।। मध्येनिवेद्यह
विषाधूपदीपंप्रदापयेत्।। २९।। सशांतिकःसचमकोजप्योरुद्रात्र्यसंख्यया।। एकाद
त्यात्रिरावृत्त्याद्विरावृत्त्यापिशंकरी।। ३०।। ब्राह्मणैःशांभवैःसार्धंस्वयंभक्त्यामहेश्वरं।।

घृतदीपानसमुद्बोध्यधूपधूममनोहरं॥३१॥ नानावादित्रनिर्घोषैः गीतवीणारवैः शिवे॥भ
वायेत्स्यपचनाम्नां त्येनर्पयेत्सकुशांततः॥३२॥ उद्वर्तयेत्सुपक्वेण पीठस्थाप्यमहेश्वरं॥य
ज्ञोपवीतनंगंधंच पांडुरंभस्मकेवलं॥३३॥ तंडुलैश्चर्णकैर्घुष्ठंतस्मिन्मास्यर्चयेच्छिवं॥व
स्त्राभरणजालानि प्रणवेनैवदापयेत्॥३४॥ बिल्वपत्रंपद्मपुष्पंकरवीराणिपूजये
त्॥ कनकंचकदंबंचपूजयेन्निधनारव्यया॥३५॥भवायेतिमहादेवि धूपंदद्यान्मनःशि
ली॥ घृताक्तंचततोदीपंदद्यान्मंत्रेणकेवलं॥३६॥आढ्यकाल्नंचसघृतंसशर्करमुमा
पतेः॥अपूपान्यपि देयानि पाचितानि घृतेनतु॥३७॥ गुडखंडयुतानीशेशंसोपदंशायुतं
शिवे॥तांबूलंचततोदद्यान्मुखवासंततः परं॥३८॥ नीराजयेत्ततोलिंगंवेदघोषपुरः
सरं॥ येकार्त्तिकयादिपुरुषगजवाजिवृषाकृति॥३९॥रथाकृतिघृतैर्दीपैः नीराज्यघ
टदीपतः॥ ब्रह्मासीति मंत्रेणरक्षाबंधंविधायच॥ पंचार्तिकंचत्रस्त्रार्तिं कृत्वाकर्पूरखं
डतां॥पश्चाच्छत्रंचामरंचव्यजनाऽदर्शकंशिवे॥४१॥देयंगीतवाद्यवादित्रनिनदंशंख
काहलं॥ दुंदुभीवेणुवीणाद्यं स्त्रीणांनाट्यंततःपरं॥४२॥ प्रदक्षिणाप्रणामादिनतस्त
वननर्तनं॥ एवंकुर्यात्सदादेविमुग्धटागमचोदितं॥४३॥ वक्ष्याभिनामाष्टशतंतेनैवार्च्यो
महेश्वरः॥पुण्येभाद्रपदेमासिस्तवंचापिवदामिते॥४४॥ ॥ ॐरुद्रायभद्ररूपायरुद्
द्रायप्रचेतसे॥हिरण्यायशरण्यायअरण्यायनमोनमः॥४५॥ वरेण्यायादिमध्यांतर

हितायगणायच॥प्रभासायसुभासायगंधर्वाभीयभूतये॥४७॥लोकधात्रेविधात्रेचपात्रेनेत्रोपवित्रिणे॥कुंडलीशफणारत्नकुंडलायनमोनमः॥४८॥चंडतांडवरूपायखंडाखंडायमुंडिने॥दंडिनेखंडिनेचैवखड्गमांसाशनायच॥४९॥भूपारायद्योमूर्ध्नेसिद्धरूपायशूलिने॥भस्माभक्तायभद्रायभीमायभवहेतवे॥वेशांतायचशांतायशमीपुष्पप्रियायच॥नमःकास्यायनीपायकृष्णायपरमात्मने॥५१॥नक्तंचरायकुल्यायकुलालपतयेनमः॥संग्रहीत्रेप्रमादायपद्मासनाधरायच॥५२॥अधिष्ठानायज्येष्ठायनिष्ठायप्रथर्द्युम्ने॥पुराणायपराणायकरुणायनमोनमः॥५३॥तारानाथधरायाथगजकृत्तिधरायते॥पादुकापद्मपादायनागहंसकधारिणे॥५४॥गिरीशायगिरीशायमहाकैलासवासिने॥प्रवसतेप्रसतेचैवधावतेवसतेनमः॥५५॥नमोदंष्ट्राकरालायकरवालकरायच॥व्यक्ताव्यक्तायमुक्तायभक्तिमुक्तिप्रदायिने॥॥५६॥पशूनांपतयेचैवविविधलायबलायच॥बलप्रमथनायेववालपालायशूलिने॥५७॥कायायकाव्यरूपायभावाभावरतायच॥एवंनामाशताष्टेनपूज्योभाद्रपदेशिवः॥५८॥बिल्वपत्रैःकोकनदैःपुंडरीकविशेषतः॥स्तवमेनंप्रयुंजीतभावेभक्तियुतोभवेत्॥५९॥सुपर्वगंधर्वसुपूजितायनिसर्गसर्गादिविधानकारिणे॥भर्गायभ्राव्यायचसर्वगायनमोनमस्तेंतकगर्वहारिणे॥६०॥गुरुवहभोजनमौलिमणिप्रियशंकरपुरहरशंकुरुमे॥तुंगवृषाधिपलिंगासदोज्वलभवभवभयहारकुरुकरुणां॥६१॥कालकालमुनमालकंटजज्वा

लकीलगरलाशनशंभो॥ व्यासमालसुकंकपालपाणये कोलदं नुहरणायनमस्ते॥६२॥
कालनेत्रसुपवित्रवरांगोक्षारपात्रधनगांगपत्र॥ पद्ममित्रकृतनेत्रकलत्रार्धार्धगात्रप
रिपाहिगिरित्र॥६३॥ अंडखंडविधिमुंडधरांडोड्डांड चंडविधिमुंडकरंड॥ कुंडलीशाकुन
कुंडलगंड खंडकोशाफलिनाखिलपाल॥६४॥ एवंस्तवन्भाद्रपदेभद्राणिलभतेनरः॥ दत्वा
शांभववर्याणांरूप्यांगोमिथुनंशिवे॥६५॥ दक्षिणंसचनंचकृत्वाहोमविधानतः॥ मासंन
क्षाशानेभ्यात्भवभक्तोजितेंद्रियः॥६६॥ मासांनेभाद्रपौर्णम्यामेवंपूज्यमहेश्वरं॥ स्वयंभु
जीनसहितोबांधवैर्बंधमुक्त्ये॥६७॥ एवंभाद्रपदेमासिसंपूज्यपरमेश्वरं॥ मासांतेवंशा
साहस्रैर्वंशेर्याने र्मनोहरैः॥६८॥ गीतवादित्रनिनदैः विरजोंबरवाससा॥ गंधचंदनमाल्या
द्दिव्यस्त्रग्गानुलेपनः॥६९॥ दोधूयमानचमरैः विजितो व्यजिनादिभिः॥ विहार्थे यंयदा
धूर्येयानिम्नत्सदनंशिवे॥७०॥ तत्रमेगणपैःसार्धमोदतेकालमक्षयं॥ ॥स्कंदउवाच॥
येभद्रपदेभाद्रपदेसमर्च्यरुद्रंदरिद्रोनसजातुभूयात॥ सुवीरभद्रादिसमर्चितःस्यातभद्रा
णिसर्वाणिलभेदतंद्रः॥७१॥ उमाकांतंशांतोभवतिभजतांतोऽद्दिजगणोकृतांतादाभी
तः स्फतनिशिरसिभातंयमधनः॥ वसंतेहेमंतेकुसुमततिशावंदितांतेर्च्यतिशिवंअहोवर्षा
स्त्विषंभजतिवरभाग्येश्वनिपुणः॥७२॥ ॥इतिश्रीशिवरहस्येमहादेवाख्येएकादशां
शेभाद्रपदार्चनंनामएकोनविंशोध्यायः॥१९॥ ॥श्रीमहादेवायनमः॥ ॥ईश्वरउवाच॥ ॥

 शिवेश्वाम्धीजमासस्य वक्ष्ये पूजाविधिं शृणु॥ यत्कृत्वा मनुजः सिद्धिं गाणपत्यं समृद्धिं दति॥१॥

शिवस्नानविधिं वक्ष्ये ब्राह्मणानां हितायवै॥ सर्वपापहरं साक्षान्मयैव कथितं पुरा॥ अनेन
विधिना स्नात्वा यः सकृत्पूज्य शंकरं॥३॥ कुश कूर्चं च पीत्वा तु सर्व पापैः प्रमुच्यते॥ त्रिधा स्नानं स
माख्यातं स्मृतिभिः श्रुतिभिः सह॥४॥ हितायशंभवानां च तथैवाश्रमिणां शिवे॥ वारुणं पुरतः
कृत्वा नदीनद तटाकके॥५॥ अथ लिंगे वारुणैर्मंत्रैः रौद्रैर्वा शिव तत्परः॥ अग्निरित्यादिना दे
हं परिमृज्य शुभ भस्मना॥६॥ तदाग्नेयं समाख्यातं सर्वपाप विशोधकं॥ धृत त्रिपुंड्रं रुद्राक्षः तत्त
न्मंत्रेण मंत्रवित्॥७॥ मासनाम च संकल्प्य सकुशांजलिरीश्वरं॥ भावयुक्तो भवेत्स्नात्वा सर्वपा
पैः प्रमुच्यते॥८॥ स्नात्वापि भावदुष्टश्चेन्नसशुध्यति सर्वदा॥ भावशुद्धश्चेत्सर्वेषु सर्वे नित्यं च का
मिकं॥९॥ नृणां हि चित्तकमलाम प्रबुद्धं भवेद्यदा॥ प्रसुप्तं तमसा ज्ञानं भानो भासात्तदा शुचिः
मृत्कृतिलपुष्पं च स्नानार्थं भसितं सितं॥ आनीय तीरे निक्षिप्य स्नानतीर्थे कुशांस्तथा॥ प्रक्षाल्य
हस्तपादौ च त्रिराचम्य शुचिर्द्विजः॥ पंचगव्ये स्ततस्नात्वा कूर्चोदेनाभिषिंचं करि॥१२॥ उद्धृता
सीतिमंत्रेण पुनर्देहं विशोधयेत्॥ गंधद्वारेति मंत्रेण कपिला गोमयं शुभं॥१३॥ लेपयेत्सर्व
गात्रेषु अंगादंगेन चाशिवे॥ पुनराचम्य विधिवद्दभिमंत्र्य नदीजलं॥१४॥ तीर्थपालांस्ततो
रुद्रानानुज्ञाप्याघमर्षणः॥ यतीर्थानीति मंत्रेण स्नातः पूतो भवे[illegible]वे॥१५॥ एवं स्नात्वा यथा
न्यायं कृतनित्यक्रियो द्विजः॥ भस्म धृत्वा च जप्त्वा च हुत्वा देवान्पितॄंस्तथा॥१६॥ तर्पयित्वाभ्यर्चि

धूपनः ॥ हेमं डपमुत्तमं ॥ कारयेत्पुष्पमालाद्यैर्भूषयेन्नूपुरःसरं ॥ १७ ॥ रंगवल्लीविचित्राढ्यं पञ्चसा
रेह णमंडितं ॥ ब्राह्मणान्वरयेद्विद्वान्भवान्वेदपारगान् ॥ १८ ॥ प्राणायाममन्नयं कृत्वाध्यायेदेवं त्रि
यंबकं ॥ पंचवक्त्रं दशभुजं शुद्धस्फटिकसंनिभं ॥ १९ ॥ सर्वाभरणसंयुक्तं चित्रांबरविभूषितं ॥ सोमं
सोमायतं सं च त्रिनेत्रं नीलकंधरं ॥ २० ॥ शिवसारूप्यमाप्याथ दहनाप्लावनादिभिः ॥ शोधीतनूं म
मास्थाय पूजयेल्लिंगमैश्वरं ॥ देहशुद्धिं च कृत्वैवं कलान्यासं न्यसेत्क्रमात् ॥ सर्वाद्यं प्रणवं मंत्रं शिव
रूपप्रकाशकं ॥ २२ ॥ तेनाद्येन शिवायेति जपो मंत्रः षडक्षरं ॥ सहस्रपरमोनित्यं शतनाथ कृतं सं
ख्यया ॥ २३ ॥ पंचविंशद्यथाशक्ति कृत्वा मालाजपे वशा ॥ जप्त्वा मंत्रीयथान्यायं ध्यात्वा देवं महेश्व
रं ॥ २४ ॥ सेचयेदर्चनस्थानं गंधचंदनवारिणा ॥ द्रव्याणि साधयेत्पश्चात्क्षालनप्रोक्षणादिभिः
॥ २५ ॥ स्थापयेद्विधिनाधीमान् अवगुंठ्य यथाविधि ॥ शृंगशंखानि शातवानि पर्णपुष्पपुटानि
च ॥ २६ ॥ हेमरूप्यादितांम्राणि कांश्यपैललकान्यपि ॥ प्रशस्तानि शिवार्चादीक्षालितान्यथ
कल्पतः ॥ २७ ॥ दर्भैराच्छादिताभुवि स्थाप्य पात्राणि सर्वतः ॥ क्षालनं प्रोक्षणं चैव प्रणवेन वि
धीयते ॥ २८ ॥ प्रोक्षणीं चार्घ्यपात्रं च पाद्यपात्रमनुक्रमात् ॥ तथार्घ्याचमनार्थाय पात्रमेकं प्रसाधयेत्
तेषु तेष्वथ सर्वेषु क्षिपेत्तोयं सपुष्पकं ॥ प्रणवेन क्षिपेत्तेषु द्रव्यमालोक्य बुद्धिमान् ॥ ३० ॥ उशीरं
चंदनं चैव पाद्ये तु परिकल्पयेत् ॥ जातीनक्कोलकर्पूरफलमूलनमालकाः ॥ ३१ ॥ चूर्णयित्वाथ सं शो
ध्य क्षिपेदाचमनीयके ॥ एवं सर्वेषु पात्रेषु शंखे चापि विशेषतः ॥ ३२ ॥ सकुंकुमं च कर्पूरं पाटलोत्प

लकानि च॥ अभिषेचनीके कुंभे दापयेत शोधिते जले॥ ३३॥ कुशाग्राण्यक्षतांश्चैव यवव्रीहितिला
निच॥ आज्यसिध्धार्थपुष्पाद्यः अर्घ्यों वांगंप्रकीर्तितः॥ ३४॥ गंधपुष्पाक्षतादीनि नवान्यैव प्रसाध
येत॥ सर्व पात्रेषु भस्मितं दापयेत्प्रणवेन तु॥ ३५॥ पंचगव्यमयं पात्रं शोधयेत्पंचमंत्रकैः॥ संध्यादि
भिः समभ्यर्च्य कुंभं पूज्य सशांखकं॥ ३६॥ मधुपर्कै कपात्रं च सेचये द्दधिक्षौद्रतः॥ पिधानमर्थं चो
धत्पदे यल्लिंगे विशेषतः॥ ३७॥ आश्वयुज्यां शिवे लिंगं माणिक्यं हेमसंभवं॥ तत्पीठस्थाप्य विधि
वत्पीठपूजाक्रमेण तु॥ ३८॥ पाद्यमाचमनीयांश्च दत्वाचैव यथाक्रमं॥ मधुपर्कं पंचगव्यं गायत्र्या
प्रतिपादयेत॥ ३९॥ क्षीरेण दध्ना चाज्येन मधुना सितया तथा॥ नारिकेलांबुभिश्चैव कदलीफल
सेक्षुजैः॥ ४०॥ जंबीरनीरैर्गंधैश्च हेमरत्नजलैस्तथा॥ सद्योजातादिमंत्रैश्च सहगायत्रिनापि
वा॥ ४१॥ रुद्राध्यायेन ततोधूपं दीपं नैवेद्यमुत्तमं॥ रुद्रसूक्तैर्वारुणमंत्रैस्तथार्यो राजसामभिः॥ वो
स्नापयेद्गुरुः संख्यातः त्रिरावर्त्यापि वा द्विजैः॥ तूर्यघोषैर्वेदघोषैः रुद्रैस्नाप्य जलादिभिः॥ ४३॥
भवायेत्यष्टनाम्ना वै तर्पयेच्च सकूर्चकैः॥ वाससा परिमज्ये शं पीठे स्थाप्य महेश्वरं॥ ४४॥ उपवीतं च
गंधं च दद्याद्दुकूलास्तं नवं॥ वस्त्राभरणमुख्यानि पुष्पाणि सुरभीणि च॥ ४५॥ सुश्वेतपुंडरीकानि वि
ल्वपत्राणि पूजयेत॥ सौगंधीकानि देयानि मरायनिधनेत्यपि॥ ४६॥ देवदारुमयं धूपं दद्यात्स
घृतमीश्वरी॥ दीपावलीं ततो दद्यात् क्रोधनाक्षसुशोभनां॥ ४७॥ गोधूमान्नं पायसं च सापूपं
विनिवेदयेत॥ मयार्केंरघ्ना लाक्षं च नामैरेतैः प्रपूजयेत॥ ४८॥ नीराजयेत्ततो लिंगं सुचंद्र घरखंड

श्रीशिव

कैः॥ छत्रंच चामरं देवि व्यजना दर्शकं ततः ॥४९॥ प्रदक्षिणा प्रणामादि कारयेत्स्तवमीश्वरि॥
नामानि ते प्रवक्ष्यामि दत्वा तांबूलमुत्तमं ॥५०॥ पूजयेद्बिल्वकुसुमैस्तवमेतमुदीरयेत्॥ ॥
ॐ त्र्यंबकायांबिकाभर्त्रे शंकराय त्रिपुरारयेच॥५१॥ नमो वेद्याय वेद्यायमान्यायचनमोनमः॥
५१॥ नमो भवाय भव्याय भावनायोद्भवायच॥ अनंतबलवीर्याय भूतानांपतयेनमः॥५२॥ संहर्त्रे य
शर्वाय अव्ययायाव्ययायच॥ गंगासलिलधाराय आधाराय गुणात्मने॥५३॥ कंदर्पदर्पघाता
य भावनायोद्भवायच॥ अनंतबलवीर्याय भूतानांपतयेनमः॥५४॥ क्रतुपूज्याय इज्याय सज्य
मानायतेनमः॥ शंकराय चक्षांका गणानांपतयेनमः॥५५॥ दंडहस्ताय कालाय पाशहस्तायते
नमः॥ सहमानाय शांताय शांकप्रहरणायच॥५६॥ त्रयीमयाय सत्राय समुहोत्राय कपर्दिने॥
वेदतंत्रप्रधानाय ज्ञानजिह्वाय वेधसे॥५७॥ गानप्रियाय नुष्टाय रेणुलाय प्रभावते॥ धरा
धराय पाराय सुपाराय रणायच॥५८॥ जंजपूकाय धर्माय दंष्ट्रिने घोषिणे नमः॥ विचारा
य हराय पायघोराय पशुपायच॥५९॥ उरगाभरणायाथ दूरापास्मरायच॥ करंधमाय धोम्या
य ग्रामिवर्मिकरायच॥६०॥ गव्हरेष्टाय शिष्टाय विशिष्टायाक्षयायच॥ उरुगायाय भाग्याय कु
बेर्याय गरायच॥६१॥ स्तवाय स्तवमानाय स्तवशीलाय तेनमः॥ ज्योतिर्वेशास्त्रपालाय बं
धोग्रमरतायच॥६२॥ वर्णिने गृहसंस्थाय वन्यसंन्यासिनेनमः॥ भेददूराय शूराय क्षयद्वी
रायतेनमः॥६३॥ भर्गाय भजमानाय जयमानात्मनेनमः॥ सोमाय सोमचूडाय सोमास्कंदाय

नेनमः ॥ ६४ ॥ भूतये स्वस्त ये चैव परस्तात्प्रभवे नमः ॥ ६५ ॥ शताष्टनाम्नामेतेन पूजयेद्यश्चिने
शिवे ॥ स्तवमेतं प्रभुंजीत परिच्छित्तिं विधिमात्मनः ॥ ६६ ॥ जय जय त्रिविजि वारिसंघभृन्मेश्रुति सी
म्नः तक हरिपाद धाम्न ॥ जय जय करवीर पुष्पमाला कलिना कंधर दिव्य देह जन्म ॥ ६७ ॥
जय जय नुरगारि वाहनांश जय जय उरगारि वाहपूज्यपाद ॥ जय जय त्रिपुरास्ये हराय धनसो
माय वशाय नेनमस्तु ॥ ६८ ॥ हर हर पुर हन पिनाकपाणे गरधर धांकर चारु देह मूर्ते ॥ पुरहर भ
व हर शिव नर सुरवकर पुर शंभो हर गंगाधर सांब रुद्र पाहि ॥ शम्भव प्रसीद परमेश्वर पंचवक्त्र
रुद्र त्रिनेत्र शशिखंड कलाललाम ॥ विश्वाधिकांधकहर प्रमथेश शंभो पाहि प्रपन्नजननंतासु
नतां महेश ॥ असमकुसुमबाण नाशबाणपाणे हर भीमामरपूज्यपादपद्म ॥ ७० ॥ श्रुति वाजि
वरांग हे यशीन कीर्ति प्रसभ भंगाकर पाहि मां दयाद्यया ॥ एवं स्तुवं प्रभुंजीत तस्मिन्मासि महेश्व
रि ॥ ७१ ॥ ब्राह्मणं दापयेत्तोरं सवत्सं गो द्वयं शिवे ॥ दक्षिणादिभिरभ्यर्च्य मासांते भेरकुमर्हे
त्ति ॥ ७२ ॥ नित्यं नक्ताशनो भक्तो मुक्त एवं भवेद्ध्रुवं ॥ अश्वयुज्यां च पौर्णिमास्यां होमः कार्यो विशे
षतः ॥ ७३ ॥ दीनानाथं भोजयित्वा स्वयं भुंजीत बंधुभिः ॥ अश्वयुज्यां पौर्णिमायां अश्विन्यमन्त्र
राशिभिः ॥ ७४ ॥ सायमभ्यर्च्य यल्लिंगं स्थिरं वा चरमेव वा ॥ यवत्सिक्तमानेन शिवलोके महीयते
॥ ७५ ॥ एवं यः कुरुते मासि साश्वमेधायुतं लभेत् ॥ सात्यकिरा राजिनवीमाननेन स वंशकैः पालि
मत्सदने देवि गणेन्द्रैरनुमोदितः ॥ पूजितो ब्रह्मविष्णवाद्यैः शक्राद्यैर्मुनिभिः शिवे ॥ ७७ ॥ मासे

श्रीशिव

चाश्वयुजि प्रसन्नहृदयो यो मां समभ्यर्चयेत् दूरात्सो लभते मदीयमगजे लोकं मध्यं ज्यादरात्॥
सज्यावान् भविता जनेषु सुमहाद्द्रिज्यायुतानां फलं भुञ्ज्याः तस्य भवेत्निभूमिपतयः प्राज्यं सराज्यं
लभेत्॥ ७६॥ ॥इति श्रीपरहस्ये महादेवास्थ्येरकादशांशे अश्विनार्चनं नाम विंशोध्यायः॥
॥२०॥ ॥ श्रीमहादेवाय नमः॥ ॥महादेव उवाच॥ ॥ ईश्वर उवाच॥ ॥कार्तिके चनमी
रास्य श्रणु वक्ष्ये गिरींद्रजे॥ शिवार्चनविशेषं कार्तिके कीर्तिविनाशकः॥१॥ ऊर्जे गंर्जेति
पापानि स्नानदानार्चनादिभिः॥ पूयंते मनुजाः सर्वे इति तर्जेति ते भटाः॥२॥ याम्याय मस्य
सदने मदनांतकरार्चकं॥ दृष्ट्वापि प्रपलायंते सिंहं दृष्ट्वा मृगा यथा॥३॥ कार्तिके आश्विनसंक्रमे
स्नानं कुर्याद्बहिर्जले॥ नदीतटाकवापीषु कूपे वाभिरुचिर्यथा॥४॥ संकल्पनियमोपेतो दूर्वा
मृद्घृतांभसा॥ त्रिराचम्य शुचिः स्नात्वा दर्भपाणिः शिवं स्मरन्॥ ५॥ प्रविश्याप्सु स्वमंत्रेण वा
रुणेन विमज्य च॥ देवानृषीन्पितॄन्देवी संतर्प्य विधिपूर्वकं॥ ६॥ तीरवासे प्रगृह्यैव क्षालितां
घ्रिः त्रिराचमेत्॥ धौतवासः परीधाय भस्म धृत्वा यथाविधिः॥७॥ त्रिपुंड्रं रुद्राक्षधरो कृतनित्य
कर्मा द्विजः॥ नवं सुपूरितं कुंभं शोधितं च नदीजलैः॥ सुपल्लवं सुरत्नं देवि गृहीत्वा पाहि मां विभो॥
स्वकरानीतपुष्पांबुसाक्षाद्गृह्णाति शंकरः॥९॥ करानीतं परानीतं शुद्रेणापि नाहृतं॥ क्रयक्री
तं भूमिलग्नेन प्रशस्तं मम मार्चनं॥ १०॥ तस्मात्स्वयं वै कुसुममाहरेच्च जलं कुशं॥ पूजास्थानं प्र
विश्याथ गोमयेनोपलेपयेत्॥ ११॥ पंचवर्णांकपिष्टेन पद्मस्वस्तिकचिह्नितं॥ कुर्याच्च पुष्पमालां

स्तंभमंडपं फलकैर्युतं॥ १२॥ वितानमच्छदपटैरलंकुर्याद्यथाबलं॥ वरयेद्ब्राह्मणान्देवि कोविदानभिषेचने॥१३॥ शांभवानेकमस्मांकान्वंद्राकं पदपूजकान्॥ पात्राणिक्षालितानीशे संस्थाप्य क्रमयोगतः॥१४॥ प्रोक्षणीं जलकुंभं च शंखं धारात्रपात्रकं॥ पाद्याचमनार्घ्यादि पात्रं च मधुपर्कजं॥१५॥ कुशोच्चासादये देवि धान्यनि च महेश्वरि॥ गंधपुष्पोपपूर्णानि कृत्वा भस्माभियोगतः॥ पंचगव्यं घृतं क्षीरं दधि क्षौद्रं सितामपि॥ फलसाराणि सर्वाणि यथाज्ञो संप्रकल्पयेत्॥१७॥ यथालब्धानि कालेन पुष्पाण्यपि महेश्वरि॥ धूपश्चागरुसारोत्थः कल्पनीयो घनान्वितः॥१८॥ दीपमाला कल्पनीया घनाच्छादितोत्तरा॥ स्वयमाचम्य विधिवत्प्राणानायम्य मंत्रवित्॥ ॥१९॥ देशकालादि संकीर्त्य विप्रेरुक्तैर्विशेषतः॥ प्रयुनेन्नियुनोधीमान् पूर्वांगं परिकल्पयेत्॥२०॥ गणेशमादौ संपूज्य तत्पार्श्वे नंदिनं यजेत्॥ चंडं च भैरवं चैव निर्माल्यमपनोद्य च॥ ॥२१॥ कल्पयेदासनं पश्चादधारादीयथाक्रमं॥ अनंतं धर्मं वैराग्यं ज्ञानं पार्श्वात्रिशूलकं॥२२॥ पार्श्विकेवेद्रुमं वापि हेमराजतसंभवं॥ गृहीत्वा स्थापयेत्पीठे लिंगं संशोध्य चांबुभिः॥२३॥ लिंगमूर्ध्नि न्यसेत्पुष्पं प्रणवेनैव शांकरी॥ पश्चात्पंचाक्षरं मंत्रं जपेच्छतसहस्रकं॥ ध्यात्वे वंदे वमीशानं नीलकंठं त्रियंबकं॥ सोमस्कंदं चंद्रचूडं दिव्यस्रक्कुसुमभूषितं॥२५॥ व्याघ्रचर्मपरीधानं नागाभरणभूषितं॥ भस्मांगरागसुभगं मंदस्मितमुखांबुजं॥२६॥ ध्यात्वाऽवाहयेत्ततो लिंगे हृत्प

यप्रणवेनहि॥ स्नानवेद्यांततःपाद्यमाचमनंचार्घ्यमेवच॥२७॥ दद्याच्चमधुपर्कंचपंचगव्यंत
तःपरं॥क्षीराज्यदधिसंक्षौद्रंसितयानारिकेलांबुभिः॥२८॥अन्यैःफलरसैर्देविस्नापयेच्छिव
मंबिके॥स्नाप्यमंगलघोषेणवादित्ररवयोगतः॥२९॥उद्वर्तनांतरेस्नाप्यगंधरत्नकुशोदकैः॥
शांतकुंभांबुभिर्देविधूपदीपंनिवेदनं॥३०॥दत्वापीठेन्यकेस्थाप्यरुद्राद्यत्याभिषेचयेत्॥
एकादशानुवाकेनसूक्तरुद्रचमकेनच॥३१॥एकद्वित्रिवरंवापिपंचवांसांतिमेशिवे॥प्रयायेत्व
वनाम्नांतेतर्पयेत्सकुशोदकैः॥३२॥शंखोदकेनाभिषिच्यप्रविमज्यचवाससा॥पीठेसंस्था
प्यवस्त्रंचउपवीतासनादिभिः॥३३॥ यवगोधूमसहितामक्षता कार्तिकेशिवे॥गंधचंद
नयक्षोत्थंदेयंशार्वीयमक्षयुक्॥३४॥बिल्वपत्रंचंपकंचनंद्यावर्तांबुजैःशिवे॥ देयंतंनिधने
त्यादिपूजयेनभवादिभिः॥ ३५॥बिल्वत्वक्घृतसंयुक्तंधूपंदद्याच्चकार्तिके॥ घृतदीपाःप्रदात
व्याः दीपमालासमुज्वला॥३६॥सस्तुक्तातिलसंपूर्णंकृसरंघृतशर्करं॥धारिकापूपसहितंद
द्यान्नैवेद्यमीशितुः॥तांबूलंचततोदद्यात्क्षीरंतत्रनिवेदयेत्॥३७॥नीराजयेत्ततोलिंगंतोर्य
त्रिकरवान्वितं॥३८॥शालामलकसंपूर्णंकृसरंघृतशर्करं॥कुर्यात्कर्पूरजंपश्चाच्छत्रव्यजनमाच
रेत्॥३९॥आदर्शवेणुवीणादिशंखकाहलदुंदुभीन्॥ प्रदक्षिणाप्रणामादीन्नर्तनंचमहेश्व
रे॥४०॥कुर्याच्चनामभिर्देविपूजयीतस्तुवीतच॥ तत्रनाम्नांप्रवक्ष्यामिसंख्यामात्रशतादिकां॥४१॥
स्तुतिंचतेप्रवक्ष्यामिसमाहितमनाःशृणु॥ ॥ॐशिवश्चाधिकायवेद्यायवेदांतनिरयाच॥पराव

रायवार्षीयसर्वदायपिनाकिने॥ जानूकर्णायसोमायभर्गायभवहेतवे॥ उग्रायघोररूपायवाम
देवायमुंडिने॥२॥ खंगमायाशमायाथवनवाहायवर्चसे॥ पंचाननायपतयेपतयेवीतरागिणे॥
३॥ चामरायशरण्यायवसामांसप्रियायच॥ पन्नगाभरणायाथसन्निधोर्ध्वनिवासिने॥४॥ आ
सन्नजनपालायनीलग्रीवायवेधसे॥ अमोघबलवीर्यायशानावर्तायशागिणे॥ हिरण्यवरवीर्या
यरसेंदुवरवीजिने॥ ध्वजिनेगर्जमानायहुंकारायोरुतेजसे॥ ६॥ तिग्मायुधाययोधायर
थाधिपतयेनमः॥ बिल्मिनेबिल्वपूज्यायप्रसन्नायकपालिने॥७॥ भिक्षवेयक्षपूज्यायत्र्यक्षा
यप्रथमायच॥ उष्णीषिणेभ्रुकुटिनेगदाहस्तायवज्रिणे॥ ८॥ खड्गखेटकरायाथभिक्षवर्याय
तेनमः॥ ९॥ भर्गायसहमानाययुगावर्तायभाविने॥९॥ ज्वलज्वालायतुष्टायपुष्टहृष्टायधन्वा
वे॥१०॥ गणप्रियायगाधायपर्णाशायघायवैधुने॥१०॥ वामदेवायजातायसद्योजातायपाविने॥
वर्षतेगमतेचैवअवर्षायावटायच॥ ११॥ काष्ठायचप्रपथ्यायवाहनुपाण्यगाराद्दने॥ बल
प्रमथनायाथसर्वभूतदमायच॥ १२॥ कालनाशायदेवायकालज्वालायदंतिने॥ हन्ता[illegible] हन्ता
यपुष्पायपुण्यवासायतेनमः॥१३॥ पुरुषायपुराणायऋषयेवेदमूर्तये॥ अन्नाधिपतयेचै
वसर्वेषांपतयेनमः॥ १४॥ वीतिहोत्रायपात्रायसुत्राम्णोभूधरायच॥ परमेशायभिद्यायअविद्याय
सुरायच॥ १५॥ ब्रह्मकंधरमालायवामनांगधरायच॥ विष्णुरक्तप्रपानायनरसिंहहरायच॥१६॥
इत्येतद्दिविनाम्नामेशतान्येतनप्रपूजयेत्॥ बिल्वपत्रैश्चकुसुमैः कार्तिकेर्तिविनाशकृत्॥ स्तवेन

स्तवेदीशांतस्मिन्मासि श्रृणु च मे ।। पुण्येनायुष्य देवेशि पुत्रेणापरमेश्वरं ।। विवासनजनावनाय
सितभूधरोमापतेधिवासनिगमांतिमग्रंथिमधामसीमायते ।। अहीनमरवभूषणप्रियवरायवा
यीपतेहरायपुरभेदिनेगजहरायतुभ्यंनमः ।। ६० ।। गवामधिपत्रांकरत्रियनयनावपाहीश्वरप्रसी
दपरमेश्वरप्रथमसोमांकधक ।। शशधरकनाद्धिमक्षरिशानोरूगर्वोल्लनत्रिपुरस्थितपुराव
रमकटहारिनेत्रोज्वलः ।। ६१ ।। मृगाजिनधरांधकासुरनिर्बर्हणाग्रावसत्समीरुतसुसारणप्र
सरणोरुवीर्यायते ।। भवार्णवनिवासिनोग्रनकरावरूंधायतेरथांगयरचारिणेवसनचीरिणे
तेनमः ।। समीरणसुपारणप्रचरधारिणोवीरिणेधराधिपसुताभिलप्रकटसामिसद्वर्ष्मणे ।। ६२ ।।
गुणातिगगणाननप्रथमसामगध्यायतेशरण्यपदपंकजानतसुपर्वशर्वायते ।। उगणः त्वं
भगणाधिपोरूमौलिः गणनाथोरुगुरुः पितासि शंभो ।। ६३ ।। शरणागतपालको महात्मा
वरूणार्च्योभवहापुत्रयारिः ।। पतिरीशोभुवनस्यविश्वपतिः त्वंमयि दृष्टिवितराद्यससुंखी
नां ।। अधुनामधुनाधिकामहेशविधिनावारुहगाधुतोनुपापं ।। इतिस्तवेनमांस्तुत्वान
त्वदेवंमहेश्वरं ।। कार्तिक्यां पौर्णिमायां तु होमः कार्यो द्विजोत्तमैः ।। ६५ ।। कपिलागोद्वयं दे
यं सवत्सं च सदक्षिणां ।। मासेन कामनो भूयः सोमवारे उपोषितः ।। ६६ ।। कार्तिके सोमवारेषु
पूजयेत्परमेश्वरं ।। चतुर्ष्वपि समासेषु पायसं च निवेदयेत् ।। ६७ ।। द्रोणधत्तूरबिल्वैश्च पूजये
त्सोमवासरे ।। एकं वापि च धत्तूरं मयि दत्वाधिलीयते ।। ६८ ।। सर्वेष्वपिचमासेषु सोमवारो वरो

पर०॥ तत्रापिश्रावणे पुण्यः कार्त्तिकः तच्छ्रेष्ठोत्तरः॥ ६९॥ तस्मिन्नुपोषणं पूजाप्रशस्ता सोमवासरे॥ रात्रेनोपोषणं कार्यमन्यथा निशिभोजनं॥ ७०॥ धात्रीमूले विशेषेण नक्तं पूज्य महेश्वरं॥ शंभवान्भोजयेन्देवि धात्रीफलमश्नुते॥ ७१॥ ब्राह्मणैरेव कर्तव्यं न वारव्रतमेव मे॥ सदाप्रियकरं देवि सोमवारं शिवे सदा॥ ७२॥ श्रुत्या विधीयते यस्मात्तत्त्यागी पतितो भवेत्॥ ये सोमवारे स्वच्छंदादिवा कुर्वन्ति भोजनं॥ ७३॥ ते विष्ठाभोजिनो देवि भविष्यन्ति परे तकाः॥ सोमार्द्रा पातयुक्तश्चेच्छिवयोगः सरग्रह॥ ७४॥ विशेषात्कार्त्तिके मासि तस्मिन्पूजा मनोरमा॥ सोमार्द्रा पातयुक्तो यः सोमवारः शिवे सदा॥ ७५॥ सहस्रार्कग्रहैस्तुल्यः सर्वपापप्रणाशकृत्॥ तस्मिन्नभ्यर्चनं पुण्यं प्रशस्तं प्रीतिकृन्मम॥ ७६॥ ॥ ईश्वर उवाच॥ ॥ एवं यः कार्त्तिकं मासं पूजयेद्बहुपायेन॥ तस्य पुण्यफलं वक्तुं नालं वेदाः सुरासुराः॥ ७७॥ कांचनेन विमानेन वंशाकोटिसमन्वितः॥ याति सत्सदनं देवि कैलासं देवदुर्लभं॥ ७८॥ आरार्त्तिकं कार्त्तिके यस्तु कुर्यादार्तिघ्नं तत्कीर्तिदं तत्त्रिलोके॥ वर्त्तिघृतान्कामभिन्नः प्रदीप्तं सप्राचैर्वै लिंगमूर्तिं महेशं॥ ७९॥ दृष्ट्वा चेष्ट्वा यत्फलं सर्वरात्रे तल्लब्धावे याति शंभोः पदं मे॥ ॐ जैस्पूर्जे धूर्जटेर्लिंगमीक्ष्य सायं प्रेमे वासरे पापसंघं॥ गर्जेत्येवं त्यर्जितासौ रिदूरा वर्जेत्येनं तेन रास्त्यर्जिता हि॥ ८०॥ पर्वण्युमे सर्वमरवर्चपुण्यदं दूर्वाभिरेवार्च्य सुपर्वबंधः॥ ओर्वानलेब्धा विवपापनिरशेषमवेत्स्वर्वेतराजपुत्री॥ धात्रीपत्रैः पूजयंत्यूर्जमासे तेषां धात्री प्रीतिधातुः फलं हि॥ ते सावित्रीजापिनां सं

संलभंते सवित्रीत्वं गुह्यमेन कृणुष्व ॥ ९२ ॥ ॥ इति श्रीशिवरहस्ये महादेवाख्ये एकादशां
शे कार्त्तिकमासार्चनं नाम एकविंशोध्यायः ॥ २१ ॥ ॥ श्रीमहादेवायनमः ॥ ईश्वरउवाच ॥ ॥
मार्गशीर्षे च यद्दैवं विशेषेणां नरात्मना ॥ मासानां परमो मासः मार्गशीर्षो गिरींद्रजे ॥ १ ॥ अस्मिन्न
भ्यर्चनं पुंसां विशिष्टफलदायकं ॥ मासादौ प्रथमं स्नायान्नदीनदतटाकके ॥ २ ॥ समंत्रं सकुशं देवि
कृतशौचो बहिर्जले ॥ संकल्प्य मासनामैश्च अब्लिंगैर्वारुणैरपि ॥ ३ ॥ परिधाय नतो वासो द्वि
राचम्य च भस्मधृक् ॥ अग्निरित्यादिनादेयि त्रिपुंड्रपरिभूषितः ॥ ४ ॥ रुद्राक्षधारणं कृत्वा प्रातः
संध्यामुपास्य च ॥ हुत्वा च विधिवद्वह्निं कुंभमंभः प्रपूरितं ॥ ५ ॥ फलपल्लवपुष्पादि संपाद्य विधिव
त्तदा ॥ गोचर्ममात्रमालिप्य मंडले गोमयेन तु ॥ ६ ॥ चतुरस्रं विधानेन चाद्भिरभ्युक्ष्य मंत्रवित् ॥ पंचा
शद्दलसंयुक्तमालिखेत्पद्ममुत्तमं ॥ ७ ॥ ततद्दूर्वैस्तु तथापूर्णैः श्वेतचूर्णैरथापि वा ॥ एकहस्तप्रमा
णेन कृत्वा पद्मं सुदर्शनं ॥ ८ ॥ कर्णिकायां न्यसेत्पीठं तदूर्ध्वे मंडपोज्ज्वले ॥ अलंकृत्य वितानाद्यैः पु
ष्पमालावलंबितं ॥ ९ ॥ पंचाशद्दीपमालाभिः धूपैर्दीपैः समुज्वलं ॥ सितैर्विकसितैः पद्मैर्वि
ल्वनीलोत्पलैः सुभैः ॥ १० ॥ समंतोपारजातैश्च कुसुमैरन्वितं शिवे ॥ कल्कशोधितपात्राणि द
र्भादिकुन्यसेत्क्रमात् ॥ ११ ॥ कुंभं स्थाप्यांबुसंपूर्णं पल्लवाढ्यं तदग्रतः ॥ पात्राण्यभ्युक्ष्य पुष्पांबु
पूरितानि विधाय च ॥ १२ ॥ संकल्प्य शांभवीं रत्नत्रयरयेत्पूर्ववद्द्विजान् ॥ तेरनुज्ञामवाप्याथ मा
ससंकल्प्य पूजनं ॥ १३ ॥ पंचामृतं पंचगव्यं सुक्षीराज्ये दधी मधु ॥ सीताफलरसानीशे संपाद्य स

कुशोदकं॥१४॥ जपेत्पंचाक्षरं विद्वान् समाहितमनाः शुचिः॥ आपः पुनाम वल्येव वस्त्रपूतास्समुद्धृ
ताः॥ अद्भिः कार्याणि कुर्वीत पूताभिः सर्वसिद्धये॥ सहस्रं वा यथाशक्ति वा जपेन्मंत्रं षडक्षरं॥१६॥
ध्यायेद्देवं विरूपाक्षं नीलकंठमुमायुतं॥ मृगांकशेखरं शांतं सर्वाभरणभूषितं॥१७॥ ध्यात्वा देवं
च हृत्पद्मे पीठपूजां विधाय च॥ भूतशुद्धिं च भस्मशुद्धिं मासनार्चनमाचरेत्॥१८॥ कलशं शंखमा
श्राद्य सोमामृतसुधारया॥ दर्व्ये हृताप्लावनो धेनु कृत्वा देहं सुधामयं॥१९॥ निर्माल्यमपनोद्येशं
लिंगं पीठे निवेशयेत्॥ वैडूर्यसंभवं हैमं पंचसूत्रसमुज्वलं॥२०॥ पाद्यमाचमनं चार्घ्यं सपुष्पं
विनिवेदयेत्॥ पंचगव्ययुतं देवि मधुपर्कं निवेदयेत्॥२१॥ पंचामृतं तथा क्षीरं दध्याज्यक्षौद्रसे
चनं॥ शर्करा नारिकेलांबु रंभाभिर्गंधवारिभिः॥२२॥ कुशोदकं हिरण्योदकं कूर्चांबु विनियोज
येत्॥ हविर्नैवेद्य देवाय दत्वा दीपं च धूपकं॥२३॥ स्नानवेलांततो लिंगं स्थाप्य संसेचयेच्छि
वे॥ सहस्रधाराकलशैः शतधारैरपीश्वरं॥२४॥ नानावादित्रघोषैश्च पुण्यैरुद्रांबुसेचनैः॥ स
शांतिकः सचमकोरुद्रो एकादशावृतः॥२५॥ जप्यो वेशांभवैः सार्धं एकद्वित्रिक्रमादपि॥ धूप
येद्दीपयेद्देवं तत्रैवाभ्युक्षणे शिवे॥२६॥ भवाय तिलतोयं तेच तर्पयेच्च कुशांबुभिः॥ उद्धर्तयेत्सू
क्ष्मवस्त्रैः पीठे स्थाप्य शिवं शिवे॥२७॥ वास्त्रोपवीतं गंधं च भसितं च तथाक्षतैः॥ अखंडतंडु
लाधोनास समुद्राः क्षालिताः शिवे॥२८॥ दद्याल्लिंगे ततो भव्यभव्यपर्णैर्हैमरत्नजैः॥ शताष्ट
बिल्वमालां च हैमीं वा कारयेच्छिवे॥२९॥ राजनीवा यथा जोषं बिल्वपत्रेण केवला॥ कुट्जं

चंपकंपद्मंसौवर्णंनिपारिजातकं॥३०॥कुसुमंपूजयेद्देवि अपामार्गंतुमार्गके॥ हविर्निवेदयेत्ता
पूपंभवायेतिचपूजनं॥३१॥निधानेत्यादिभिर्देवि बिल्वपत्रैश्चशालितैः॥ उत्तराग्रैःपूजयेत्तं
द्विवर्मोलोमहेश्वरि॥३२॥ सांम्राणिधूपेमन्त्रैर्वंधूपयेद्दीपयेच्छिवं॥ ताम्बूलंचततोदद्यात्
मुखवासंफलानिच॥निवेदयित्वानीराज्यग्रामाद्यवरदीपतः॥ चंद्रखंडेनचततोचंद्रचूड
शिखामणिं॥भेरीमर्दलवीणादिशंखकाहलनिस्वनैः॥ऋक्सामयजुषाथर्वपौराणस्तुतिभिः
शिवे॥३५॥ छत्रंचचामरंशुभ्रंव्यजनादर्शकध्वजं॥ निवेदयेनदेवायप्रणामप्रक्रमंततः॥३६॥
नर्तनंचप्रसादंचनतोनाम्नार्चनंमम॥मार्गशीर्षविशेषेरा॥मुक्तिमार्गप्रदायिनी॥३७॥स्तवंच
तत्रवक्ष्यामिसमाहितमनाशिवे॥विश्वेशःखंडपरशुःशिवःसीतांशुभूषणः॥३८॥अखंड
नगकोदंडः चंडिकेशप्रियोहरः॥ गंभीरोगगनांतस्थोस्थाणुःशार्वरशिखरगः॥३९॥ऊर्ध्व
रेतामहावीर्योगणनाथोंबिकाप्रियः॥जटाधरोंधकहरःत्रिशूलीनीललोहितः॥४०॥गरा
दनोविरूपाक्षःभवसंसाररोगहृत्॥वसनार्द्रीभगाक्षिघ्नोवामनोमन्मथांतकः॥४१॥भवाम
यहरोयोगीकर्तासर्वस्वतंत्रवान्॥अणोरणीयान्वरदोमहतोपिमहत्तरः॥४२॥संवर्तुकारकोध
न्वीकंजजातांतमागधक्॥विष्णुनेत्रप्रपूज्यांघ्रिः मधुसूदनसूदनः॥४३॥विचाररहितोमा
निमनस्वीकालनाशनः॥सोमसूर्याग्निनयनोभीमोभव्ययुगांतकृत्॥४४॥सरस्याधूम्रकेशांगोव
ल्भुशोभयहारकः॥वातात्मानधरोगत्रींकेलाशनिलयःस्वराट्॥४५॥तुराषाट्पूजितपदो

वेदवाजिप्रियोयुवा॥ सनातनो दीनदयो वृषसुषेणः प्रसादकृत्॥४६॥ स्तुतिप्रियोवा स्तुपोथोह
यकृयभुगीश्वरः॥ व्योमकेशो वामदेवोकृत्तिवासाः प्रभेदनः॥४७॥ पशूनांपतिरानन्दो वीघसां
क्षीमखांतकः॥आषाढः पार्वतीनाथो घोरोरुद्रोमहेश्वरः॥४८॥ कपालपाणिर्मृगधृक् पादुकाप
दपद्मधृक्॥वेनोवन्द्यो वेधुतात्मागनिदेशुक्तिदायकः॥४९॥ विषाभरणभूषाढ्योमण्डोपरि
वदोंतकः॥ पाशविच्छेदको देवो वेदगीतः पुरांतकः॥५०॥ विरागोधिकटोसुंडः तंडुमीनोभया
वहः॥विशालवक्षाभूषाढ्योत्रिपुंड्रललितालकः॥५१॥ चक्षुश्रवमहाहारोरुद्राक्षवलयोज्व
लः॥ गणाधिपोगव्हरेष्ठः शतधन्वा सहस्रधृक्॥५२॥ एभिर्नामभिर्देवनित्रामासिविल्वैः प्रपू
जनं॥ स्तवं चतेप्रवक्ष्यामि पुण्यंप्रियकरं मम॥५३॥ शंभोमयस्कर हरामरधीरवीरगंगाधरप्र
मथनाथसनातनेश॥ विश्वेशविश्वमदनांतकविश्वमूर्तेविश्वाक्षविश्वमुखपाहिनमोनम
स्ते॥ ५४॥ नमामिशशिशेखरंपुरहरंचगंगाधरंविभूतिधरमीश्वरंगरधरं चविश्वेश्वरं॥ हराम
रवरंशिवं हरिशरावसत्कंकरं जलंधरयमांतकं सुरवरंनतोस्मीश्वरं॥५५॥ शंभोः सोमकला
वतंसगिरिजादक्षायनेत्र्यक्षायोक्षवहायदक्षमखहृत्कक्षायरक्षोगधृक्॥पक्षींद्रप्रियवा
हपूजितसुराध्यक्षायमोक्षप्रदानंगंधाक्षविस्तारिणेमयिदयाल्वंपक्षपातादवा॥५६॥ नवको
दंडसुचंडदीधितिवरस्फाराररुनेत्रज्वलच्चामुंडाजनकोनमांगकलितागंगाधरयोल्लासि
तसोमोत्तंसमरीचिभिर्विकसिताला लोलोत्पलस्रग्विणे॥पारावारभवोरसागरमहाकल्लोल

लग्नं विभो कामयितानिनाजं निजरानाशांबु मानं सदा मामाश्रु हरदेहि कंशंकर करं मज्ञाव ते किंकरं ॥ ५७ ॥ दीनावन प्रार्थितचारु दशा महेश श्री ओमकेश कुशकाश समर्चितांघ्रे ॥ काशावकाश महिमन्परत्रोभभूपयोबाधकाय मामाशु धीसयुसुधीक्ष्य कामवर्गं ॥ ५८ ॥ स्तवेनानेन देवेशिस्तुवीन परमेश्वरं ॥ पौर्णम्यां शांभवैः सार्धं होमं कार्यो विधानतः ॥ चित्रगो मिथुने देयं सवत्सं च सदक्षिणं ॥ ५९ ॥ स्वयं भुंजीत नरयानेवां धर्येः शांभवैः सह ॥ मासं न काशानो भूयाद्रुवभक्तो जितेंद्रियः ॥ ६० ॥ स च यत्या लभ्यान्ते तिन देकागमनाश्मणु ॥ गीतवादित्र बहुले रप्सरोगणनर्तनैः ॥ ६१ ॥ गंधस्रगानुलिप्तांगो दिव्याभरणभूषितः ॥ कांचनेन विमानेन याति शंभोर्वरालये ॥ ६२ ॥ चापस्थिते दिवानाथे तस्मिन्नुष्यसि पूजनं ॥ कार्यं देवि प्रियकरं महालिंगार्चनं मम ॥ ६३ ॥ ममुद्रान्नं घृतान्तं च निवेद्य परमेश्वरं ॥ यावन्मासं विशेषेण पूजनं तत्प्रशस्यते ॥ ६४ ॥ ग्रातवर्षासु या पूजा मासेनत्रुष्यसि ध्रुवं ॥ तत्फलं लभते गौरि तस्मिन्मासे विशेषतः ॥ ६५ ॥ चापेरो दृक्षके देवि पौर्णम्यां शशिशेखरं ॥ नतमानत्र यीने त्रे कृशानुवरहस्तकं ॥ ६६ ॥ त्वयायुक्तं विशेषेण भूषणं परमेश्वरं ॥ संपूज्य स्नापयेद्देवमभिषेचन कर्मभिः ॥ ६७ ॥ गंधैः सुगंधमाल्यैश्च धूपदीपनुभैः शिवे ॥ नैवेद्यैः फलमूलैश्च हविषापूपसंयुतं ॥ ६८ ॥ दृष्ट्वा प्रमुच्यते पापैः बुद्धिपूर्वकृतैरपि ॥ पुंडरीकपुरे वापि पश्येन्नत्यंत मीश्वरं ॥ ६९ ॥ गौर्दृक्षे चापसंयुक्ते मास्यस्मिन्पौर्णिमा तिथौ ॥ स्नात्वा यः शिवगंगायां पश्येद्देवं पिनाकिनं ॥ ७० ॥ ब्रह्महत्यादिभिर्मुक्तो भुक्तिं मुक्तिं च विंदति ॥

॥ईश्वर उवाच॥ ॥यो मार्गशीर्षे विधिशीर्षमालाचलंल्लक्षणमार्द्रकर्क्षे॥ संपूज्य तन्मासि मुदा
ममेशिनं तं च सवीक्ष्य विमुक्तिमेति॥ ७१॥ यो मार्गशीर्षविधिपूजनकृद्भवानि विमुक्तिमार्गंल
भते मनुष्यः॥ पुष्पैरपामार्गदलैर्मुदायुतो न दुर्गमां याति गतिं मदाश्रयः॥ ७२॥ ॥इति श्रीशि
वरहस्ये महादेवाख्ये एकादशांशे मार्गशीर्षार्चनं नाम द्वाविंशोध्यायः॥ २२॥ ॥श्रीमहादेवाय
नमः॥ ॥ईश्वर उवाच॥ ॥पौषेपि शृणु मे मासि पूजनं सर्वकामदं॥ पुष्ये चोषसि उत्थाय ध्या
त्वा देवं त्रियंबकं॥ १॥ प्राङ्मुखो दङ्मुखो वापि बहिर्गच्छेन्नदीतटे॥ सकलमंडलहस्तोथसो
दकं प्रावृतं शिरः॥ २॥ कुर्याच्चतुष्पथे नद्यां गोष्ठे कूपेपि वा भुवि॥ गुरुदेवद्विजाग्नीनां स्त्रीणां चै
व तु सन्निधौ॥ ३॥ नाप्सु मूत्रपुरीषे वा कुर्याद्दंदूषधावनं॥ स्वगृहाद्दक्षिणे देशे तृणप्रच्छा
दिते भुवि॥ कुर्यान्मूत्रपुरीषाणि ततः शौचं यथारुचि॥ गंधलेपक्षयं वापि मनः पूतमथापि
वा॥ ५॥ सक्षीरवृक्षकाष्ठैश्च दंतशोधनमाचरेत्॥ नदीह्रदनदे कूपे देवखाते तटाकके॥ ६॥
स्नायात्समंत्रं सकुशं साक्षतं वारुणं जपेत्॥ त्रिवारमप्सु निष्णातो ह्यघमर्षणकृद्भवेत्॥ ७॥
जपेद्रौद्राणि सूक्तानि अंभोलिंगानि वा शिवे॥ त्रिराचम्य शुचिर्देवानृषीन् पितृगणांस्
तथा॥ ८॥ संतर्प्य तीरमागत्य धौतवस्त्रधरस्तदा॥ भस्मनांगानि संमृज्य अग्निरित्यादिमंत्र
तः॥ ९॥ त्रियायुषेण मंत्रेण त्रिपुंड्रं परिधारणं॥ शिरो वक्षो ललाटे च बाह्वोरथ च पिंडि
के॥ १०॥ रेखासंख्याविरहितं कुर्वन्पापैः प्रमुच्यते॥ रुद्राक्षधारणं कुर्यात्ततः संध्यामुपास्य च॥

११॥ कृत्वानले च वैशाने स्मार्तो वापि यथाबलं॥ नदीनदाह्रदैः तोयैः स्वयं कुंभं प्रपूरितैः॥ वस्त्र पूतैः स्नपादेवि कुर्यात्संमार्चनं भुवि॥ मार्जन्यासुक्ष्मयादेवि लेपयेद्गोमयांभसा॥ १३॥ गंधचंदन तोयेन पूजास्थानं प्रसेचयेत्॥ पद्मस्वस्तिकगोपद्मैः कुर्याच्चूर्णैः कमंडलुं॥ १४॥ पुष्पमालादि रचितै वितानाद्यैरलंकृतं॥ मंडपं रचयेत्तत्र धूपदीपविराजितं॥ १५॥ तस्मिन्पीठे पुष्परागलिंगस्था प्य हेमजं॥ यथाभिमतमीशानं नदगे कलशैर्नवं॥ १६॥ नदीतोयेन संपूर्णं धौतं पल्लवशोभि तं॥ संस्थाप्य तत्र पात्राणि क्षालितानि प्रसेचयेत्॥ १७॥ गंधपुष्पांबुभिर्देवि पंचगव्यादिकं तं तः॥ सामान्यार्घ्य विशेषार्घ्यौ शांखं पुष्पांबुपूरितं॥ १८॥ मधुपर्कं समपीधानं क्षीराज्यदधिचा र्करां॥ क्षौद्रं फलोदकानीत्रो गंधहेमकुशोदकं॥ १९॥ स्थाप्य पात्रे षु पुष्पाणि गंधधूपादिसा धनं॥ स्वयं कुशासने स्थित्वा देवस्याग्रे महेश्वरि॥ २०॥ वरयेद्ब्राह्मणांस्तत्र संकल्प्य शिवपू जनं॥ भासनामच गौरीशां शिवं ध्यात्वा हृदंबुजे॥ २१॥ चंद्रांगाधरं सोम्यं सोमकुंदघुतिं शिवं॥ त्रिलोचनं नीलकंठं वरदाभयपाणिनं॥ २२॥ त्रिपुंड्रं विलसत्फालं रुद्राक्षालंकार भूषितं॥ ब्रह्मविष्ण्वादिदेवाद्यैर्नरूणं प्रियदर्शनं॥ २३॥ ध्यात्वा हृत्पद्मनिलयं देवदेवं पिनाकिनं॥ पंचाक्षरं न्यसेद्देहे कृत्वाग्नौ वीं तनुं शिवां॥ २४॥ स्मरेत्पूर्वमविं छंदो देवतां वी जमेव च॥ शक्तिं च परमात्मानं रुद्रं त्वां च वरानने॥ २५॥ मंत्रेण पाणी संस्पर्श तलयोः प्रणवं न्यसे त्॥ ॐकारसंपुटीकृत्य सर्वांगेषु च विन्यसेत्॥ २६॥ करयोरुभयोश्चैव दद्यात्सांगुलिषु क्रमात्॥

॥ अंगुलीनां च सर्वासां तथा चाद्यंतपर्वसु ॥ २७ ॥ सबिंदुकानि बीजानि पंचमध्यानि पर्वसु ॥ उ
त्पत्यादि षु भेदेन न्यसेदाश्रमतः क्रमात् ॥ २८ ॥ उभाभ्यामथ पाणिभ्यां आपादतलमस्तकं ॥
मंत्रेण संस्पृशेद्देहं प्रणवेनैव संपुटं ॥ मूर्ध्नि वक्त्रे च गुह्ये च हृदये हस्तपादयोः ॥ २९ ॥ कंठे चैव
न्यसेद्देवं प्रणवादित्रिभेदतः ॥ कृत्वांगन्यासमेवं हि मुखानि परिकल्पयेत् ॥ ३० ॥ पूर्वादि चोर्ध्व
पर्यंतं नकारादि यथाक्रमं ॥ षडंगानि न्यसेत्पश्चाद्यथास्थानं च भेदतः ॥ ३१ ॥ प्रणवं हृदयं विद्या
न्नकारः शिव उच्यते ॥ शिखा मकार आख्यातः शिकारं कवचं विदुः ॥ ३२ ॥ नकारो नेत्रमस्त्रं तु
यकारः परिकीर्तितः ॥ इत्थमंगानि विन्यस्य ततो वै बंधयेद्दिशः ॥ ३३ ॥ विघ्नेशो मातरो दुर्गा क्षेत्र
ज्ञो देवता दिशः ॥ आग्नेयादिषु कोणेषु चतुर्ष्वपि यथाक्रमं ॥ ३४ ॥ अंगुष्ठतर्जन्यग्राभ्यां सं
स्थाप्य सुमुखं शुभे ॥ एवं न्यासं परं प्रोक्तं सर्वपापहरं परं ॥ ३५ ॥ सर्वसिद्धिकरं देवि सर्वरक्षा
करं शिवं ॥ न्यासमात्रेण देहस्थं शंकरप्रतिमो भवेत् ॥ ३६ ॥ नतं स्पृशंति पापानि न्यासादीशे
विधानतः ॥ जपेत्पंचाक्षरं मंत्रं लब्ध्वाचार्यप्रसादतः ॥ ३७ ॥ आज्ञाप्रदक्षिणाहीनं श्रद्धाहीनं
मनात्मकं ॥ आज्ञाहीनं क्रियाहीनं मंत्रजप्तानि ष्फलं ॥ ३८ ॥ पंचाक्षरस्य मंत्रस्य प्राणायाम
उदाहृतः ॥ प्राणायामा भवेत्क्षिप्रं सर्वपापपरिक्षया ॥ ३९ ॥ इंद्रियाणां वशित्वाच तस्मात्प्रा
णाश्च संयमेत् ॥ गृहे जपे समं विद्यात्गोष्ठे शतगुणं भवेत् ॥ ४० ॥ नद्यां शतसहस्रं तु अनंतं
शिवसंनिधौ ॥ अंगुलीजपसंख्यानमेकमेकं शुभानने ॥ ४१ ॥ रेखाभिर्द्विगुणं जाप्यं पुत्रजी

वेदशोत्तरं ॥ शतं वै शंखमणिभिः प्रवालैश्च सहस्रकं ॥ ४२ ॥ स्फाटिके दशसाहस्रं मौक्तिके ल-
क्षउच्यते ॥ पद्माक्षे दशलक्षंतु सुवर्णैः कोटिरुच्यते ॥ ४३ ॥ कुशग्रंथ्या च रुद्राक्षैरनंतगुणितं भ
वेत् ॥ पंचविंशतिर्मोक्षार्थी सप्तविंशतिपौष्टिकं ॥ त्रिंशता धनसंपत्तिः पंचदश्याभिचारके ॥ त-
त्पूर्वाभिमुखं वश्यं दक्षिणं चाभिचारकं ॥ ४५ ॥ पश्चिमं धनदं विद्यादौत्तरं शांतिकं भवेत् ॥ अंगु
ष्ठं मोक्षदं विद्यात्तर्जनी शत्रुनाशिनी ॥ ४६ ॥ मध्यमा धनदा शांतिं करोत्येषा ह्यनामिका ॥ कनि
ष्ठा रक्षणी प्रोक्ता जपकर्मणि शोभना ॥ ४७ ॥ यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः ॥ मंत्र
मुच्चारयेद्वाचा जपयज्ञः सवाचिकः ॥ हिंसेभ्यः सर्वयज्ञेभ्यो जपयज्ञो ह्यहिंसकः ॥ सर्वं तेजप
यज्ञस्य कलां नार्हंति षोडशीं ॥ ४९ ॥ उपगम्य गुरुं शांतं मंत्रतत्त्वार्थकोविदं ॥ नो वंचयेत्तं प्रयत्ने
न भावेन च धनेन च ॥ ५० ॥ आददीत गुरोर्मंत्रं पुण्ये हनि शुभक्षणे ॥ वित्तशाठ्यं न कुर्वीत यदिच्छे
त्सिद्धिमानवः ॥ ५१ ॥ पश्चान्निवेदयेद्देवि आत्मानं संपरिच्छदं ॥ एवं तु योयसगुरुः शिष्यं संव
त्सरोषितं ॥ ५२ ॥ परीक्ष्य दद्यान्मंत्रं च गुरुर्मंत्ररहस्यवित् ॥ जपेन नित्यं संकल्प्य पुरश्चरणमि
ष्यते ॥ ५३ ॥ यावज्जीवं जपेन्नित्यं अष्टोत्तरसहस्रकं ॥ जपेदक्षरलक्षं वै चतुर्गुणितमादरात् ॥
५४ ॥ तद्दशांशं तर्पणं च होमं ब्राह्मणभोजनं ॥ एवं षडक्षरं जप्त्वा तस्मिन्मासि शिवार्चकः ॥ ५५ ॥
योगुरुः सशिवः साक्षात्तं तुष्टात्कदाचन ॥ पीठे लिंगे प्रतिष्ठाप्य स्नानं वै धां शिवं जपेत् ॥ ५६ ॥
पाद्यमाचमनं चार्घ्यं दद्यात्पंचाक्षरेण तु ॥ मधुपर्कं पंचगव्यं मधुक्षीराज्यसदधि ॥ ५७ ॥ फलंगा

राग्निदेयानिगंधरत्नोदहेमजं।।कूर्चोदकंततोदद्याद्गंधकर्पूरवासितं।।५८।। हविर्निवेद्यदेवायधूपंदीपंचभावतः।। रुद्रैकादशकंजप्त्वाअभिषिंचेन्महेश्वरी।।५९।। शांभवैः श्रुसूक्तैरेणधारापात्रेणशांकरी।।भवायेत्यष्टभिर्देवितर्पयेच्चकुशांबुना।। ६०।। वस्त्रेणावेष्ट्यसंपीठंकृत्वालिंगंच सासनं।।गंधंचंदनमिश्रंतुपुष्पाण्याभरणानिच।। ६१।। दत्वाधूपंचदीपंचनैवेद्यंचमहेश्वरि।। तांबूलंफलजालानितर्पयेत्कुशांबुना।।६२।। वस्त्रेणावेष्ट्यपीठस्थंकृत्वालिंगंचसासनं।।गंधंचंद्रेणमिश्रंतुपुष्पाण्याभरणानिच।। ६३।। दत्वाधूपंचदीपंचनैवेद्यंचमहेश्वरी।। तांबूलंफलजालानिबिल्वपत्रैरथार्चयेत्।। ६४।। नीराजयेत्ततोलिंगंचंद्रंदद्यान्मनःशिलां।।छत्रंचचामरंदेविव्यजनादर्शकंतथा।।६५।। भेरीमर्द्दलशंखानिकाहलादिविधायच।। नाट्यंचनर्तनारीणांदर्शयेत्स्वरूपकं।। ६६।। नामभिः पूजयेद्देवंबिल्वपत्रैश्चचंपकैः।। ओंपंचाशच्छक्तिरूपायपंचाच्छक्तिमूर्त्तये।।आत्मतत्ववरिष्ठायविद्यातत्वायतेनमः।।१।। शिवायशिवतत्वायअघोरायनमोनमः।।अघोराय्याय तत्वायद्वादशात्मस्वरूपिणे।।२।। षट्प्रकारकतत्वायस्वशक्तिविहितात्मने।।अनिर्देश्यायतत्वायविश्वरूपायविरूपिणे।।३।। विष्णुदुःखदूरूपायस्थिरायानंतरूपिणे।। अनिवर्णायदेवायअर्द्धकार्धशरीरिणे।। ४।।श्यामायश्यामरूपायशक्तिदायमरायच।।ज्येष्ठायरुद्ररूपायकामायवरदायच।।५।।त्रिमात्रायमिताक्षायअकारायनमोनमः।। द्वाविंशतत्वरूपायउकारायनमोनमः।।६।। षोडशात्मस्वरूपायउकारायनमोनमः।।अथ

श्रीशिव

धायस्वरूपाय एकातपनमोनमः॥ ७॥ ओंकाराय नमस्तुभ्यं चतुर्धासंस्थिताय च॥ गगनेशा
यदेवाय स्वर्गेशाय नमोनमः॥ ८॥ मर्त्यलोकाय पातालनरकेशाय ते नमः॥ अष्टक्षेत्राष्टरूपाय
परापररताय च॥ ९॥ सहस्रशिरसे तुभ्यं सहस्राक्षाय ते नमः॥ सहस्रपादयुक्ताय शर्वाय परमे
ष्ठिने॥ १०॥ नवात्मशक्तिरूपाय त्रिवर्णाय नमो नमः॥ पुनरष्टप्रकाराय तथाष्टकमूर्त
ये॥ ११॥ चतुःषष्ट्यात्मतत्त्वाय पुनरष्टविधात्मने॥ गुणाष्टकप्रदानाय गुणिने निर्गुणाय च॥
॥ १२॥ मूलस्थाय नमस्तुभ्यं शाश्वतस्थानवासिने॥ नाभिमंडलसंस्थाय हृदि निस्वनकारिणे॥
॥ १३॥ कंठदेशस्थिताये व तालुपष्टस्थिताय च॥ भ्रूमध्ये संस्थिताये व नादमध्ये स्थिताय च॥
॥ १४॥ चंद्रबिंबस्थिताये व शिवाय शिववेदिने॥ वन्हिसोमार्करूपाय षट्त्रिंशच्छक्तिस्वरूपिणे
॥ त्रिमात्रप्रणवायाय त्रिधामस्थिताय नमः॥ १५॥ सदाशिवाय शांताय महेशाय पिनाकि
ने॥ सर्वज्ञाय शरण्याय सद्योजाताय ते नमः॥ १६॥ अघोराय नमस्तुभ्यं वामदेवाय ते नमः॥
तत्पुरुषाय नमस्तुभ्यमीशानाय नमो नमः॥ १७॥ अनंतेशाय सूक्ष्माय उत्तमाय नमो नमः॥ ए
काक्षाय नमस्तुभ्यं एकरुद्राय ते नमः॥ १८॥ नमस्त्रिमूर्तये तुभ्यं श्रीकंठाय शिखंडिने॥ अनं
तासनसंस्थाय सर्वदाय योगदायिने॥ १९॥ विमलाय विशालाय विमलांगाय ते नमः॥ वेदाग
मार्थरूपाय योगसंचरणाय च॥ २०॥ योगसंस्थाय दिव्याय योगिने योगदायिने॥ नमस्त्व
शोकसंहर्त्रे दुःखपापीतनेजसे॥ २१॥ प्रत्याहाराय शुद्धाय यमाय नियमाय च॥ ध्यानध्येयाय

रागिदेयानिगंधरनोदहेमजं॥कूर्चोदकंततोदद्यादुंधकर्पूरवासितं॥५८॥हविर्निवेद्यदेवायधूपंदीपंचभावतः॥रुद्रैकादशकंजप्त्वाअभिषिंचेन्महेश्वरी॥५९॥शांभवैःश्रुस्नीरेणधारापात्रेणशांकरि॥भवायेत्यष्टभिर्देवितर्पयेत्तकुशांबुना॥६०॥वस्त्रेणावेष्ट्यसंपीठंकृत्वालिंगंचसासतं॥गंधंचंदनमिश्रंतुपुष्पाण्याभरणानिच॥६१॥दत्वाधूपंचदीपंचनैवेद्यंचमहेश्वरि॥तांबूलंफलजालानितर्पयेत्तकुशांबुना॥६२॥वस्त्रेणावेष्ट्यपीठस्थंकृत्वालिंगंचसासतं॥गंधंचंद्रेणमिश्रंतुपुष्पाण्याभरणान्यपिच॥६३॥दत्वाधूपंचदीपंचनैवेद्यंचमहेश्वरी॥तांबूलंफलजालानिबिल्वैपर्यैरथार्चयेत॥६४॥नीराजयेत्ततोलिंगंचद्दद्यात्मनःशिलां॥छत्रंचचामरंदेविव्यजनादर्शकंतथा॥६५॥भेरीमर्द्दलशंखानिकाहलादिविधायच॥नाट्यंचनरनारीणांदर्शयेत्तमुरूपकं॥६६॥नामभिःपूजयेद्देवंबिल्वपत्रैश्चचंपकैः॥ ओंपंचाशच्छक्तिरूपायपंचाच्छक्तिमूर्तये॥आत्मतत्त्वधरिष्ठायविद्यातत्त्वायतेनमः॥१॥शिवायशिवतत्त्वायअघोरायनमोनमः॥अघोराद्यष्टतत्त्वायद्वादशात्मस्वरूपिणे॥२॥षट्प्रकारकतत्त्वायस्वशक्तिविहितात्मने॥अनिर्देश्यादितत्त्वायविगुलयविरूपिणे॥३॥विष्णुदुन्दुष्टरूपायस्थिरायानंतरूपिणे॥ अनिवर्णायदेवायअर्धकार्धशरीरिणे॥४॥श्यामायश्यामरूपायशांतिदायमरायच॥ज्येष्ठायरुद्ररूपायकामायवरदायच॥५॥त्रिमात्रायमितालायअकारायनमोनमः॥द्वाविंशतत्त्वरूपायउकारायनमोनमः॥६॥षोडशात्मस्वरूपायउकारायनमोनमः॥अष्ट

धायस्वरूपायएकारायनमोनमः॥७॥ ओंकारायनमस्तुभ्यंचतुर्धासंस्थितायच॥ गगनेशा
यदेवायखगेशायनमोनमः॥८॥ मर्त्यलोकायपातालनरकेशायतेनमः॥ अष्टक्षेत्राष्टरूपाय
परात्परतरायच॥९॥ सहस्रशिरसेतुभ्यंसहस्राक्षायतेनमः॥ सहस्रपादयुक्तायशर्वायपरमे
ष्ठिने॥१०॥ नवात्मशक्तिरूपायत्रिवर्णायनमोनमः॥ पुनरष्टप्रकारायतथाष्टकमूर्त
ये॥११॥ चतुःपञ्चात्मतत्त्वायपुनरष्टविधात्मने॥ गुणाष्टकप्रदानायगुणिनेनिर्गुणायच॥
॥१२॥ मूलस्थायनमस्तुभ्यंशाश्वतस्थानवासिने॥ नाभिमंडलसंस्थायहृदिनिस्वनकारिणे॥
॥१३॥ कंठदेशस्थितायेवतालुपदस्थितायच॥ भ्रूमध्येसंस्थितायेवनादमध्येस्थितायच॥
॥१४॥ चंद्रबिंदुस्थितायेवशिवायशिववेदिने॥ वन्हिसोमार्करूपायत्रिंशच्छक्तिस्वरूपिणे
॥[illegible]॥ त्रिमात्रप्रणवायायत्रिधामस्थितयेनमः॥१५॥ सदाशिवायशांतायमहेशायपिनाकि
ने॥ सर्वज्ञायशरण्यायसद्योजातायतेनमः॥१६॥ अघोरायनमस्तुभ्यंवामदेवायतेनमः॥
अनंतेशायसूक्ष्मायउत्तमायनमोनमः॥ ए
तत्पुरुषायनमस्तुभ्यमीशानायनमोनमः॥१७॥ अनंतेशायसूक्ष्मायउत्तमायनमोनमः॥ ए
कनेत्रायनमस्तुभ्यंएकरुद्रायतेनमः॥१८॥ नमस्त्रिमूर्तयेतुभ्यंश्रीकंठायशिखंडिने॥ अनं
तासनसंस्थायसर्वदायगदाभृते॥१९॥ विमलायविशालायविमलांगायतेनमः॥ वेदाग
मार्थरूपाययोगसंचरतायच॥२०॥ योगसंस्थायदिव्याययोगिनेयोगदायिने॥ समस्त
लोकसंहर्त्रेहृदयपापीतनेजसे॥२१॥ प्रत्याहारायशुद्धाययमायनियमायच॥ ध्यानध्येयाय

दूरायानिर्व्यापारायतेनमः ॥२२॥ ओंकारलिंगिनेचलिंगायलिंगस्छानायनेनमः ॥ एवंनाम भिरेवशिपोयसंपूजयेच्छिवं ॥२३॥ स्तवंचतेप्रवक्ष्यामिपुण्यंपापनिवारकं ॥ दुर्वारदुःखशमना यभवौषधायसंसारवारांनिधिनारकाय ॥ सर्वेश्वरायेवदयामयायवेदांतवेद्यायनमःशिवाय ॥ जाग्रत्सुषुप्त्याधविदूरकायसुस्वप्नदुस्वप्नफलप्रदाय ॥ वेदांतवेद्यायबलाबलायवर्ण्याय रेष्मानमःशिवाय ॥ उग्रायभीमायसनातनायरुद्रायदेवायसदाशिवाय ॥२७॥ शिवायशा र्वायहरायशंभोश्रीनीलकंठायनमःशिवाय ॥ व्यालोरुमालायपिनाकपाणयेत्रिशूल हस्तायकपालमालिने ॥२८॥ भवायभव्यायदयापमायभक्तानुरक्षायनमःशिवाय ॥ सद्या यवामायअघोरमूर्तयेतत्पूर्वरूपायचईशमूर्तये ॥२९॥ सर्वानुभावायजगत्स्वरूपिणेहि तायमेध्यायनमःशिवाय ॥ ततश्चिनतत्प्रयुंजीतपोषपुष्पिप्रदंशिवे ॥ दद्याद्दोभिक्षुनंरक्तंस वत्संदक्षिणादिकं ॥ शांभवेभ्यस्तथाहोमंकुर्यात्पर्वणिभोजनं ॥ ब्राह्मणेर्बांधवैर्देवि भुंजी तैवंसनातनं ॥३१॥ तजनेनविमानेनयात्यंतेममसंनिधौ ॥ यस्त्वेतच्छृणुयान्नित्यंसोपित त्फलमाप्नुयात् ॥३२॥ स्कंदउवाच ॥ ॥पुष्यविशिष्यशिवलिंगसमार्चनेननित्योभवंतिभय मुमेनलभेन्मनुष्यः ॥ आयुष्यमेतिशतकुंभविवांभुनामधुष्यस्नायानिसदनेमदनांतकारे ॥३३॥ ९९॥ ॥ इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेपुष्यमासार्चनंनामत्रयोविं शोध्यायः ॥२३॥ ॥ श्रीमहादेवायनमः ॥ ॥ श्रीईश्वरउवाच ॥ ॥माघमासार्चनंवक्ष्येअ

घ हारि महेश्वरि॥ तस्मिन्मासि शिवं पूज्य गाणापत्यमवाप्नुयात्॥ १॥ स्नानदानार्चनादेर्विशि
ष्टफलदायकः॥ अघहा माघमासोयं विद्यमासी भवेन्निशि॥ २॥ माघकृष्णचतुर्दश्यामादिदे
वो महेश्वरी॥ शिवलिंगतयोद्भूतः पूजनान्मुक्तिदो नृणां॥ ३॥ तदाप्रभृति देवेशि माघकृष्ण
चतुर्दशी॥ शिवरात्रिः समाख्याता प्रियेयं त्रिपुरद्विषः॥ ४॥ तत्सार्चनं प्रवक्ष्यामि तत्रादौ सविशेष
कः॥ प्रातः स्नात्वा बहिर्देशं नद्यां वा देवखातके॥ ५॥ माघे गर्जन्ति पापानि स्नानदानार्चनादि
षु॥ विधाय स्नानं प्रकुर्वीत संतर्प्य च सुरान् पितॄन्॥ ६॥ अग्निरित्यादि मंत्रैश्च भस्मस्थत्वा यथा
बलं॥ त्रिपुंड्रधारणं कुर्यात्ततो रुद्राक्षधारणं॥ ७॥ पुष्पाणि बिल्वपत्राणि नदीजलसुपूरि
तं॥ पल्लवाभिमुखं कुंभं स्वयमेव समाहरेत्॥ ८॥ कृतनित्यक्रियो धीमान् पूजास्थानं प्रवि
श्य च॥ गोमयेनोपलिप्याथ कृत्वा मंडलवर्णकं॥ ९॥ अष्टपत्रं कर्णिकाढ्यं पंचवर्णैरलंकृते॥
वितानतोरणोपेते मंडपे पुष्पमंडिते॥ १०॥ कदलीस्तंभविहितं कुर्यात्तत्र सपीठकं॥ शालिना
नि च पात्राणि स्थाप्यान्यत्र शिवस्य तु॥ ११॥ पुष्पांबुपूरितान्येव कुंभं शंखं च यत्नेच्छिवां॥ पा
द्याचमनं अर्घ्यं च पंचगव्यसुपात्रकं॥ १२॥ मधुपर्ककृते पात्रं पुष्पपंचामृतानि च॥ क्षीरा
ज्यदधिक्षौद्रसुक्षौद्रशर्कराफलसारकं॥ १३॥ नारिकेलाम्रफनसस्तजंबीरकदलीफलं॥ स्ना
नानुगुणमीशानि कल्पयेद्गंधपुष्पकं॥ १४॥ कुशरत्नोदहेमांबु कुचौदं साधयेत्ततः॥ शांभवा
न्वरयेत्तत्र मासं संकल्प्य पूजने॥ १५॥ सर्वकामोद्भवं लिंगं स्थाप्य पीठे सवरत्नकं॥ पंचाक्षरं ज

पेध्धीमानसहस्रेशानमेवच॥ १६॥ ध्यायेद्देवंच चंद्रार्कसोमाख्यं त्रिचनं॥ सर्वाभरणसंपन्नं
मगटंकधरंशिवं॥ धूपदीपादिकं तत्र रचयेत्सेचयेच्छिवे॥पाद्याचमनमर्घ्यं चमधुपर्कं ततःपरं
१८॥ पंचामृतैःफलरसैःगंधपुष्पांबुभिःशिवं॥ अभिषिच्यविधानेननैवेद्यं हविरुत्तमं॥ द
त्वा दीपंचधूपंचतांबूलंशंभवेशिवे॥ स्नानंचैर्ध्यामहालिंगंसंस्थाप्यनीरसधारया॥ २०॥ शंभु
वेःसेचयेत्तत्र तौर्यत्रिकसुवादनैः॥ मशांतिकःसचमकोरुद्रस्त्वेकादशावृत्तः॥ २१॥ जप्यो
महान्यासयुतोरकादितृत्रिक्रमेःशिवे॥ भवायेतिचतत्रांतेतर्प्पयेत्सुकुशांबुभिः॥ २२॥ प
रिमृज्यततोवस्त्रैःपीठेसंस्थाप्यशंकरं॥ यज्ञोपवीतंवस्त्रंचभस्मगंधाक्षतैर्यजेत्॥ २३॥
रत्नाभरणहेमादिबिल्वमालांचशोलकं॥ दद्यात्संपूजयेद्बिल्वैर्मंदारैःकर्णिकारकैः॥ २४॥
धूपंदद्यात्सुगंधाढ्यं घृतदीपान्यथाविधिः॥ हविर्निवेद्यशर्वायसापूपंसोपदंशकं॥
२५॥ तांबूलंफलजातंचदद्यान्नीराजनंशिवे॥ कर्पूरखंडदीपंच छत्रव्यजनंचामरे॥ २६
पताकंचतथादर्शंगीतंनाट्यंस्तुतिर्नतिः॥ प्रदक्षिणानन्नंनंचकृत्वानामभिरीश्वरं॥ २७॥
पूजयेद्बिल्वपत्राद्यैरेभिर्नामभिरेवहि॥ तानिनामानितेवच्मिस्तुतिंचैवमहेश्वरि॥ २८॥
ॐनमःशिवायशर्वायशंकरांयार्तिहारिणे॥ नमस्कार्यायविश्वायविष्णवेब्रह्मरूपिणे॥
॥२९॥ हिरण्यबाहवेसाक्षाद्धिरण्यपतयेनमः॥ शर्वायसर्वरूपायपुरुषायनमोनमः॥ ३०॥
रुद्रायनीलरूपायकद्रुद्रायप्रचेतसे॥ कालायकालरुद्रायतथाकालांगहारिणे॥ ३१॥ मीढु

षमायदेवायशिपिविष्टायतेनमः॥शंभवेधान्वेचेवमन्यवेरुद्रमूर्तये॥नमःकपर्दिनेतु
भ्यंनीलकंठायतेनमः॥श्रीकंठायमहेशायभर्गायचनमोनमः॥३३॥नमस्त्रिशूलहस्तायउ
ग्रायचनमोनमः॥भीमायचसमग्रैंद्रायभीमरूपायबांधवे॥३४॥भस्मादिग्धशरीरायदंडी
मुंडीश्वरायच॥नमोह्रस्वायदीर्घायवामनायोरूमेधसे॥३५॥उग्रवधायदेवायनमोदूरे
वधायच॥धन्विनेशूलिनेतुभ्यंगदिनेहलिनेनमः॥३६॥चक्रिणेवर्मिणेतुभ्यंदैत्यदानवभे
दिने॥सद्यायहृद्यरूपायपणिज्ञाढ्यायतेनमः॥३७॥सद्योजातायवामायअघोरायनमो
नमः॥पुरुषायपुरीशायपुरुषार्थप्रदायच॥३८॥गव्हरेष्टायशिष्टायगिरिशायनमोन
मः॥परमेष्ठिनेनिरूपायविश्वरूपायतेनमः॥३९॥महाग्रासायधीरायत्रिशूलायसुवे
द्युते॥ईशानायनमस्तुभ्यंमीश्वरायसुरायच॥४०॥ब्रह्मण्यायनमस्तेस्तुब्रह्मण्यस्य
रायच॥ब्रह्मणेब्रह्मरूपायब्राह्मणायचपिरायच॥४१॥विश्वाधिकायसूक्ष्मायपरमा
लाधरायच॥श्वेतायहरिकेशायनीलग्रीवायहेतवे॥४२॥निषंगवरपच्छायशरहेति
धरायच॥महादंष्ट्रायकालायश्मश्रुवेजटिलायच॥४३॥लालायलयमध्यायमहाडम
रुवादिने॥गरुडध्वजपूज्यायईज्याध्यक्षायभानिते॥४४॥विष्णुरक्तप्रपानायमत्स्यमं
डुधरायच॥कूर्मकोडस्थिमालायनरसिंहाबजिनायते॥४५॥एभिर्नामभिरीशानीपूज
येतयथाविधि॥शार्वस्तवंप्रवक्ष्यामितस्मिन्मासिमहेश्वरि॥४६॥स्तुत्वानेनस्तवेनेशंरुद्र

सारूप्यमाप्नुयात्॥ वेदार्थाय महेश्वराय विधये सर्वाय सर्वेश्वरायाधाराय गदाभनेत्रसुधन्वने व्योमा
यसामायते॥ सोमायाध्वरसंभवे नवरूपापूर्णाय तूर्णप्रभोपर्णा हृत्कमलांतरायमहसे देवाय तुभ्यं
नमः॥४७॥ विश्वाय स्तुतये भवाय भवते भावैकभव्याय ते भार्याधीकृतये भवाब्धिवडवाज्वालाय
कालायते॥ मल्लायमथिनाय सोमशकलालंकारमस्तायते॥ विश्वस्ताश्वसनाय घोरभवहृत्कां
तायत्रांनायते वेदांतमथिताय ते घमहसे घोरांतकारायते॥४८॥ आरमणसायकारूणाय
निप्रसन्ने क्षणक्षपापनिकलाधरक्षपितपापतापाय ते॥ विविधश्च जनरक्षणेक्षणविधि
घतुष्टायते सुकष्टमिदमघमेभवजदुष्टकष्टेहर॥४९॥ भवानभयदोशिहाहरशरण्यमाण्या
नमोस्त्रिगुण्यमपि भाविभो तव शरण्यपादे रतं॥५०॥ सदाकरुणयान्ययाशमनजातभीतिं हृ
रहराय्यविभवाधिकं कुरु महेश्यामामर्भकं॥५१॥ ॥श्रीस्कंद उवाच॥ ॥इत्थं स्तुत्वाथ मां
माघे पौर्णमास्यां हाममर्चयेत्॥ पूर्वोक्तक्रमयोगेन शंभवेः सहसादरं॥५२॥ दद्यादेमिथु
नं देवि कपिलं च सवत्सकां॥ पौर्णमास्यां च य कुर्वीत महेशो घनकंबलं॥५३॥ लिंगं त्रिवेदिप
र्यंतं गव्येन सुघृतेन च॥ सम्मोरे विधिः प्रोक्तो महेशो घनकंबलं॥५४॥ विधिनानेन कुर्वीत म
हेशो घनकंबलं॥ सर्वपापविनिर्मुक्तः शिवसायुज्यमाप्नुयात्॥५५॥ शिवरात्रिव्रतं वक्ष्ये शिव
प्रीतिकरं परं॥ अहोरात्रं माघमासि घृतधारां प्रकल्पयेत्॥५६॥ धारारूपाणि पापानि वि
नश्यन्ति न संशयः॥ दर्शनं स्पर्शनं लिंगे घृतस्नानं विशेषतः॥५७॥ एवमेकगुणं ज्ञेयं मह

श्रीशिव

क्षेत्रे ष्वतोधिकं ॥ सर्वाघौघहरो मासः माघोयं पुण्यवर्द्धनः ॥ ५८ ॥ स्नानदानार्चनविधौ विशि
ष्टो भवतु षिदः ॥ प्रयागे तु विशेषेण मकरस्थे दिवाकरे ॥ ५९ ॥ गंगायमुनयोर्मध्ये मध्ये विध्या
पिवर्जितः ॥ स्नानं दानार्चनं देवि श्राद्धेनानंत्यमश्नुते ॥ ६० ॥ ॥ ईश्वर उवाच ॥ ॥ माज्याज्या
दिभिः शैवालिंगमगजे यो वाग्निषिच्याद्दरा सांम्राज्यं लभते किलैषभवहृद्ये ज्यायुनानां
फलं ॥ माघ्यां मासे सघर्षेल्वयशात भयते मुक्त एव हृभक्तः कुर्याद्योघतकं बलंविधियुतेभु
क्ते च भोगं भुवि विप्रालं लवरैः सदक्षिणमुमेन काशानः शक्तियुक्त ॥ ६१ ॥ ॥ इति श्रीशिव
रहस्ये एकादशांशे माघमासार्चनकथनं नाम चतुर्विंशोध्यायः ॥ २४ ॥ ॥ श्रीमहादेवायनमः ॥
॥ ईश्वर उवाच ॥ ॥ फाल्गुने मासि संप्राप्ते शिवं भावगा ते स्मरन् ॥ नदीनदतडागेषु देवखातो
दकेषु च ॥ १ ॥ सकुशो साक्षतं स्नाया द्वारुणैर्मंत्रलिंगकैः ॥ कुशासक्तकरो देवि संतर्प्य च
सुरान्पितॄन् ॥ २ ॥ भस्मधृत्वा त्रिपुंड्रं च कृत्वा रुद्राक्षधारणं ॥ होमं च हावयेद्देवि स्वयं वाश्नु
ति दर्शितं ॥ ३ ॥ कृतनित्यक्रियो विद्वान् सपुष्पां बुकुशादिकं ॥ समाहृत्य विशुद्धं च उदकुं
भोदकं शुभं ॥ ४ ॥ उपलिप्य शुभं देशं रंगवल्याघलंकृतं ॥ वितानतोरणं पेतं मंटपं तत्र कार
येत् ॥ ५ ॥ गंधदीपं च धूपं च पुष्पाणि विमलान्यपि ॥ स्थापयेद्विल्वपत्राणि फलमूलानि तत्र
हि ॥ ६ ॥ अक्षता धवलास्तत्र शालितंडुलजास्तिलैः ॥ मिश्राः कुर्याच्च गंधांबु पूरितं च घटं त
थं ॥ ७ ॥ पाद्यार्घ्याचमनीयानि स्थाप्यपात्राणि शंकरि ॥ पंचामृतं पंचगव्यं दधि क्षीराज्य

सन्मधु॥ ८॥ सुशार्करं पफलोदं च रम्भाम्रफनसं शिवे॥ जंबीरसारं गंधोदं हेमरत्नकुशोदकं च॥ ९॥ संपाद्य दीपांस्तु द्वोध्यवरये छांभवांस्ततः॥ संकल्प्य पूजयेद्देवं मासं नक्ताशनः स्थिरं॥ १०॥ पंचाक्षरं च प्रजयेत्सहस्राष्टोत्तरं शतं॥ ध्यायेद्दाम हादेवं सांबं चंद्रकलाधरं॥ ११॥ त्रिनेत्रं नीलकंठं च वरदाभयपाणिनं॥ शाश्वरं शंकरं देवि हृत्पद्मसदनस्थितं॥ १२॥ चंद्रकांतमयं लिंगं स्थाप्य पीठे सपुष्पकं॥ दधात्पाद्यं ततोर्घ्यं च मधुपर्कं महेश्वरि॥ १३॥ क्षीरेण दध्नाज्येनापि मधुना सितया शिवं॥ अभिषिच्य फलोदेश्च गंध हेमकुशोदकैः॥ १४॥ दत्वा धूपं च दीपं च नैवेद्यं किंचिदेव हि॥ उद्धृत्य शिवलिंगं च स्नानवेद्यां निधाय च॥ सपुष्पमौलिलिंगं च स्नानवेद्यां निधाय च॥ सपुष्पमौलिं देवेशि रुद्रैकादशसंख्यया॥ १६॥ गोशृंगधारापात्रेण सेचयेच्छांभवैः सह॥ स्नानकाले महेशस्य वादित्राणि विधाय च॥ १७॥ शंखकाहलभेर्यादि वेणुवीणादिनिस्वनं॥ भवाद्यैर्नितनोंते हि नर्पये दष्टनामभिः॥ १८॥ संमृज्य वाससा देवि लिंगं मंगलदं मम॥ वस्त्रोपवीतं गंधाद्यं सुभस्माभरणार्पणं॥ १९॥ पलाशबिल्वमंदारैः पूजयेदुत्पलैः शिवे॥ धूपं गुग्गुलसंयुक्तं साज्यं दद्यं महेश्वरि॥ २०॥ घृतदीपान्समुद्वोध्य हविः क्षीरेण पाचितं॥ मंडकाः फेणिकापूपं नैवेद्यं सघृतं शिवे॥ २१॥ दद्याच्चैव सुतांबूलं पानकं नक्तमेव वा॥ गीतं नाट्यं च वाद्यानि नीराजनपुरःसरं॥ २२॥ चंद्रदीपं ततो दद्या छत्रं चामरयोर्युगं॥ व्यजनादर्शकं तत्र प्रदक्षिणनमस्क्रिया॥ २३॥ स्तुतिं च नर्तनं देवि यथाभ

क्तिसमाचरेत्॥ तत्रनामानिवक्ष्यामिशृणुस्तवमपीश्वरि॥२४॥ फाल्गुनेफल्गुपापेभ्योमुच्य
तेनामपूजया॥बिल्वपत्रेणदेवेशिमासोयंशिवतुष्टिदः॥२५॥ ॐनमःशिवायशांतायसहस्रा
नायशंभवे॥भवायशिवरूपायशांतावर्तायबंधसे॥२६॥ दुंदुभ्यायवरण्यायशरण्यायपिना
किने॥योगिनेध्यानगम्यायरम्यायगुरवेनमः॥२७॥अवसान्यायवन्यायआहनन्यायतेनमः॥
कामनाशायवासायहरणायविसारिणे॥२८॥ नमोस्तुतेमहेशायनमःशांततमायते॥ प्रधान
पुरुषेशाययोगाधिपतयेनमः॥२९॥ नमस्त्रिकाग्निकालायत्र्यंबकायपिनाकिने॥ नमःका
लायरुद्रायमहासत्रायशूलिने॥३०॥ नमोधूर्जटयेतुभ्यंजटिलायकृशायच॥ नमोमेध्यायमेधा
यभववैद्यायबंधवे॥३१॥ नमस्त्रिमूर्तयेतुभ्यंब्रह्मणोजनकायच॥ब्रह्मादिपतयेतुभ्यंब्रह्म
विद्याधिपायच॥३२॥ विष्णोश्चजनकायायकनकायानकायच॥ नमोवेदरहस्यायहर्ष
नर्षायतेनमः॥३३॥ वेदवेदांतसारायसुपारायनमोनमः॥अतीतानागतज्ञायवर्तमानायवे
हते॥३४॥मेरुकोदंडहस्तायगंगामस्तायधारिणे॥नमोबुभुक्षायमुमुक्षायमेधायपरमात्मने॥
॥३५॥भूतनाथायभया[illegible]यहव्यकव्यभुजेनमः॥ नमोदिग्वाससेतुभ्यंदंडिनेमुंडिनेनमः॥ अना
दिमलहीनायज्ञानगम्यायतेनमः॥प्रधानपरमाणवादिमूर्तयेनंतशक्तये॥३६॥ विचित्रमहिमा
धारस्वरूपायनमोनमः॥भूम्नेसीम्नेवेदधाम्नेव्योम्नेसोम्नेनमोनमः॥३७॥ नमस्तारायतीर्थ्यायस
गोऽतिपरमायच॥ नमःपार्यायवार्यायशर्वायाप्रतिमायच॥३८॥कुकुदायविशेषायमध्यांतराहि

नायच॥ प्रसन्नायपराधाय कामांगामसुरेंतसे॥ ३९॥ गर्जनेनर्जने चैवमार्जनेब्रह्मरूपिणे॥ ऊर्जो यफालनेत्रायदुर्गगम्याप्रभावने॥ ४०॥ नाट्यायतरुणायाथकारणायनमोनमः॥ नमोधर्मादिग म्यायविरागायसुरागिणे॥ ४१॥ नमस्तेनिष्प्रपंचायनिराभासायतेनमः॥ ब्रह्मणेविश्वरूपाय सनातन्यायमन्यवे॥ ४२॥ पतीनांपतयेचैवकारणानां चकारिणे॥ नमःपारदवीर्यायदुर्गार्तिशा मनायच॥ ४३॥ एभिर्नामभिरेवेशंसंपूज्यकुसुमैःशिवैः॥ स्तवमेतत्प्रयुंजीतशर्वप्रीतिकरंमम॥ ४४॥ देवादिदेवगिरिजाशुनवामभागभोगिप्रियाभरणकारणतारणेश॥ व्योमादिसंवरणसत्प्रण वानुसेयमायाविहीनभगवन्सततंनमस्ते॥ ४५॥ विश्वंप्रभाभसितधूसरकामकारांनीतांगसंग कुसुमांगपिनाकसंग॥ गंगावतंसभरणाधिपनेत्रपद्मिनेत्रभगवन्सततंनमस्ते॥ ४६॥ रूपाद्रापीडोर्ध्वप्रकटतरविश्वांतकविभोमहाभर्गोसर्गविनिहन्सुराश्चासुरगणाः॥ ४७॥ न मन्येचान्यांस्तान्तवनतिरहितानन्यमुक्तान् नतोहन्त्वाम्यद्यशिवनरशरण्यंनवपदं॥ ४८॥ हेभर्गशंकरमहेशपिनाकपाणेगंगाधरांतकहरामरधीरवीर॥ हारीकृताहीनविभोसमानमान दिसेरहितामलपाहिदीनं॥ ४८॥ त्वय्येवसर्वमखिलंत्वयिलीनमेतत्सेकल्पशिल्पमखिलंभव जालभीत॥ मृत्युंभवज्जनसंस्थितिनाशविवर्जमानमेतत्तवोदरगतंपरिपाहिशंभो॥ ४९॥ स्तव मेतत्प्रयुंजीतफाल्गुनेमासिसत्तमे॥ कृतमोनाशकंदेविपुण्यमायुष्यवर्धनं॥ ५०॥ एकवारं त्रिवारंवापूजयेद्दिंदुशेखरं॥ सर्वव्यापिचमासेषु दद्यात्क्षेमिमिथुनंसितं॥ ५१॥ सदक्षिणंसवस्त्रं

चसनां बूलमुमापतेः॥ प्रीतये शांभवे चैव दापयेच्छिवपूजकः॥ ५२॥ मासि तस्मिं शिवे पूर्णपर्व
ण्येव समाहितः॥ मधुकंबलमीशाय कृत्वा पापैः प्रमुच्यते॥ ५३॥ घनकंबलमानेन वै शारे वराधिकं
बलं॥ कृत्वा पापैः प्रमुच्येन शिवस्यातिप्रियो भवेत्॥ ५४॥ मधुकंबलकं कुर्यात्फाल्गुने पापहा
रितत्॥ पूजाविशेषमासेषु कथितं प्रीतिदं मम॥ ५५॥ यत्कृत्वा मनुजः सद्यो मुच्यते भवबंधना
त्॥ समुच्चयस्तुवीते वं सर्वेष्वपि महेश्वरि॥ ५६॥ स्तुवीत परया भक्त्या देवदेवं महेश्वरं॥ त्वय्येव
सर्वमखिलं त्वय्येव सकलं स्थितं॥ ५७॥ त्वया संह्रियते विश्वं प्रधानपुरुषांतकं॥ त्वमेव पुरुषो
नंतः प्रधानं प्रकृतिस्तथा॥ ५८॥ भूमिरापोनलो वायुः व्योमाहंकारमेव च॥ यस्य रूपं नमस्यामि
भवंत्वां ब्रह्मसंज्ञितं॥ ५९॥ यस्य घोरभवन्मूर्धा पादौ पृथ्वी दिशो भुजः॥ आकाशमुदरं तस्मै
विराजे प्रणमाम्यहं॥ ६०॥ संतापयति यो नित्यं स्वभाभिर्भासयन् दिशः॥ ब्रह्मतेजोमयं विश्वं त
स्मै सूर्यात्मने नमः॥ ६१॥ हव्यं वहति यो नित्यं रौद्री मग्निमयी तनुः॥ हव्ये पितृगणानां च त
स्मै वह्न्यात्मने नमः॥ ६२॥ आप्याययति यो देवान् स्वधाभिः सकलं जगत्॥ सोमः सोमात्मने तु
भ्यं ओषधीशात्मने नमः॥ ६३॥ बिभर्त्यशेषभूतानि यो तः श्चरति सर्वगः॥ शक्तिर्माहेश्वरी साक्षा
त्तस्मै वाय्वात्मने नमः॥ ६४॥ सृजत्यशेषमेवेदं यः स्वकर्मानुरूपतः॥ स्वात्मन्यवस्थितिश्चैव त
स्मै विश्वात्मने तुभ्यं वि
चतुर्वक्त्रात्मने नमः॥ ६५॥ यः शेते भुशिवं ध्यात्वा पालयन् जागद व्ययः॥ तस्मै विश्वात्मने तुभ्यं वि
ष्णवे पालनात्मने॥ ६६॥ यः संहरते जगज्जालं शूलिने केन शांकरि॥ तस्मै रुद्रात्मने तुभ्यं नमस्ते

स्तुपिनाकिने ॥ ६७ ॥ यंविनिद्रजितश्वासाः पश्यंति परमेश्वरं ॥ ज्योतिः पश्यंतियुंजानाः तस्मैस
र्वात्मनेनमः ॥ ६८ ॥ इतिस्तवंप्रयुंजीत सर्वमासेषुशांकरि ॥ मासपूजामिमांकृत्वासंवत्सरम
तंद्रितः ॥ ६९ ॥ नसभूयोभिजायेतसंसारेदुःखसागरे ॥ ॥ईश्वरउवाच ॥ ॥ यः फाल्गुनेमासिशि
वार्चकोनरोनफल्गुपापैर्भयमेतिशांकरि ॥ सकलांतेनामशिवस्यपानैः नचांतिमलयोनि
मवाप्यमोदते ॥ ७० ॥ मधुकंबलकृतफाल्गुनेवरपर्वण्यगजेधुनोतिपापं ॥ मुखमेनल्किलहायनस्य
गौरिप्रथितापौर्णमसिविशिष्टमासि ॥ ७१ ॥ ॥ इतिश्रीशिवरहस्येमहादेवाख्येएकादशां
शेफाल्गुनमासार्चनंनामपंचविंशोध्यायः ॥ २५ ॥ ॥ श्रीमहादेवायनमः ॥ ॥ श्रीस्कंदउ॰
॥ ॥ शृणुगुह्यतमंपुण्यंसर्वसिद्धिप्रदायकं ॥ देव्येदेवेनकथितंमासार्चनविधिक्रमं ॥ १ ॥ कर्तु
रप्यधिकंपुण्यंलभतेश्रावकोनरः ॥ यदिभक्तोमहादेवेश्रुत्वापापैर्विमुच्यते ॥ २ ॥ यस्त्वशिव
भक्तेषुश्रेष्ठः स्तस्माद्दूरात्मितो ॥ चतुर्दश्यामथाष्टम्यांपक्षयोःशुक्लकृष्णयोः ॥ ३ ॥ योष्टमेकंत
कंभुंजीतशिवार्चनरतः शुचिः ॥ यत्पुण्यमक्षयंप्रोक्तंसततंसत्रयाजिनां ॥ ४ ॥ सत्यवादिषु
यत्पुण्यंयत्पुण्यंतीर्थगामिनां ॥ अग्निहोत्रेणयत्पुण्यंय[illegible]त्पुण्यंयज्ञयाजिनां ॥ ५ ॥ तत्पुण्यंसकलं
प्राप्यशिवलोकंसगच्छति ॥ नक्तंशाकोपिकुर्वीतभवभक्तोजितेंद्रियः ॥ ६ ॥ पृथिवींभाजनंकृत्वा
भुंक्तेपर्वसुयोनरः ॥ अहोरात्रेणचैकेनत्रिरात्रफलमश्नुते ॥ ७ ॥ द्वयोर्मासस्यचाष्टम्यांभूतयोर
पिभक्तिमान् ॥ शिवमभ्यर्च्यविधिवल्लिंगे बिल्वैश्चपंकजैः ॥ ८ ॥ सोपवासःसुगंधाद्यैःशयीत

श्रियया सह॥ शांतेनिश्चलचित्तो यो रतिरागविवर्जितः॥९॥ शिवैकगतचित्तस्य तस्य पुण्यफ
लं शृणु॥ दिव्यवर्षसहस्राणि दिव्यवर्षशतानि च॥१०॥ तपस्तप्तं महत्तेन भवेद्देवन संशयः॥ भ
वभक्तश्च पूतात्मा यद्यपि स्यात्सुपापकृत्॥११॥ विधूय पापकलिलं शिवलोके महीयते॥ सर्वमासे
षु पुण्यात्मा पक्षयोः शुक्लकृष्णयोः॥१२॥ शक्तो यमभयं भक्तो यो मुक्तो नक्ताशनो भवेत्॥ इह भोगान
वाप्नोति परत्र च परां गतिं॥१३॥ शिवलोके वसेन्नित्यं शिववत्संस्तुतो गुणैः॥ योऽष्टमेकं न भुंजी
त शक्तो नक्तं च पर्वणि॥१४॥ ब्रह्मचारी जितक्रोधो भस्मरुद्राक्षभूषणः॥ शिवलिंगार्चन
रतो विरक्तो विषयेषु च॥१५॥ संवत्सरांते विप्रेंद्रान् शिवभक्तान्सदक्षिणां॥ भोजयित्वा ततो
ब्रूयात्प्रियतामिति वै शिवः॥१६॥ भोजयेद्यदि विद्वांसं कपालव्रतधारिणं॥ भक्त्याप्यकं शुचिं
शांतमुमाकांतरतं द्विजं॥१७॥ भोजितास्तेन देवेशा ब्रह्मविष्णुमहेश्वराः॥ कपालपूर्णमन्ना
न्नैवेद्यं यो यस्य गच्छते॥१८॥ कुलं तस्योद्धरत्येव दशपूर्वान्दशापरान्॥ पाद्यार्घ्याचमनी
यानि गंधपुष्पैः प्रपूजयेत्॥१९॥ पर्वस्वपि विशेषेण भोजयेच्छिवयोगिनं॥ पूजितः सशि
वः साक्षात्यत्र शैवं प्रपूजयेत्॥२०॥ शिवव्रतेषु सर्वेषु नक्तभोजनमुत्तमं॥ उपवासात्परं भै
क्ष्यं भैक्ष्यात्परमयाचितं॥२१॥ अयाचितात्परं नक्तं तस्मान्नक्तेन वर्जयेत्॥ आमासोमा
न्विनायासान्नस्यान्नक्तं समाचरेत्॥२२॥ मुहूर्तोनं दिनं नक्तं न नक्तं निशि भोजनं॥ देवैस्तु भु
क्तं पूर्वाह्णे मध्याह्ने ऋषिभिस्तथा॥२३॥ अपराह्णे तु पितृभिः संध्यायां गुह्यकादिभिः॥ सर्वा

वेलामतिक्रम्य नक्तभोजनमाचरेत्॥२४॥ शिवक्षेत्रेषु सर्वेषु वर्धनक्तात्ताशनो भवेत्॥ अविमुक्ते विशेषेण यावज्जीवं भक्तितस्तथा॥२५॥ भस्मोद्धूलितसर्वांगो भवन्नक्ताशनो सदा॥ हविष्यभोजनं स्नानं सत्यमाहारलाघवं॥२६॥ शिवाग्निकार्यं लिंगार्चा नक्तभोजी समाचरेत्॥ कृष्णाष्टम्यां चतुर्दश्यां सोमवारे प्रदोषके॥२७॥ सर्वमासेषु सर्वत्र विधिर्नक्ताशनस्य हि॥ तत्रापि शिवक्षेत्रे अविमुक्ते च नैत्यकः॥ जाबालोक्तो विधिः साक्षान्नक्ताशी मुक्तिमाप्नुयात्॥ भस्मनिष्ठो लिंगरतो यां गतिं लभते मुने॥२९॥ न तां गतिमवाप्नोति वेदवेदांतवेद्यपि॥ मार्गशीर्षे शुभे मासि शंकरं तु समर्चयेत्॥३०॥ पीत्वा तु भक्त्या गोमूत्रं अनाहारं निशि स्वपेत्॥ अतिरात्रस्य यज्ञस्य फलमष्टगुणं लभेत्॥३१॥ एवं पुष्येपि संपूज्य पुष्पैः शंभुं निशि द्विज॥ कृष्णाष्टम्यां घृतं प्राश्य वाजपेयाष्टकं लभेत्॥३२॥ माघमासे तु संप्राप्ते कृष्णाष्टम्यां प्रपूजयेत्॥ यवांश्च संचिनान प्राश्य सोऽश्वमेधफलं लभेत्॥३३॥ कालाष्टम्यां तथा काश्यां भैरवं पूजयेन्नरः॥ विश्वेश्वरार्चनरतो बिल्वपत्रैश्च कोमलैः॥३४॥ हविर्भिर्नैवेद्य सापूपं माषपूपांश्च सत्तम॥ शतायोजनसंख्याभिः भैरवं चापि पूजयेत्॥३५॥ गंधपुष्पैस्तथा धूपैः काशीनिर्विघ्नकारणं॥ प्रतिमासं कृष्णपक्षे शिवरात्रिं च सत्तम॥३६॥ पूजयेद्देवमुक्तेश मन्यक्षेत्रेऽपि वा शिवं॥ माघ्यां कृष्णचतुर्दश्यां पूजयेद्दिं दुशेखरं॥३७॥ चैत्रे त्रिनेत्रनामानं पूजयेत्परमेश्वरं॥ द्वादशाहक्रतुफलं लभते सोचिरात्तन्मुने॥३८॥ वैशाखे वा शिवनामानं पूज्य रात्रौ कुशोदकं॥ पीत्वा पुरुषमेधस्य फलमष्टगुणं लभेत्॥३९॥ ज्येष्ठे पशुपतिं पूज्य ग

यांश्चं गादकं पिबेत्॥ गवां कोटिप्रदानस्य यत्फलं तदवाप्नुयात्॥४०॥ आषाढे चोग्रनामानं
दृष्ट्वा प्राश्य च गोमयं॥ सौत्रामण्ययुतस्यैव सफलं प्राप्नुयान्नरः॥४१॥ श्रावणे सर्वनामानं
पूज्य पर्णानि भक्षयेत्॥ वर्षकोटिशतं साग्रं सूर्यलोके महीयते॥४२॥ मासे भाद्रपदे ष्यां
त्र्यंबकं नाम पूजयेत्॥ प्राश्य बिल्वफलं पक्वं सत्रयागफलं लभेत्॥४३॥ मासे चाश्वयुजे य
स्यां ईश्वरं नाम पूजयेत्॥ पौर्णमास्यामाश्वयुज्यां च अश्विन्यर्क्षे प्रदोषके॥४४॥ अंधसा शशिभि
ल्लिंगं छादयेद्धाममार्गकं॥ सिक्थ्य तिक्थ्य अश्वमेधस्य फलमाप्नोति मानवः॥४५॥ तंडुलोदकमा
पीय तस्मिन्मासि शिवार्चकः॥ पौंडरीकाख्यकस्यैवं फलं च सकलं लभेत्॥४६॥ कार्तिके रुद्रना
मानं पूज्य पीत्वा कुशोदकं॥ अग्निष्टोमादि दशकं फलं प्राप्य विमुच्यते॥४७॥ मार्गशीर्षे महा
देवं अग्रं नाम्नाथ पूजयेत्॥ सउक्थ्य दशकस्यैव फलं लभ्येत चांबुपः॥४८॥ पुष्यमासे तु सं
प्राप्ते यः कुर्यान्नक्तभोजनं॥ ~~कृसरं मधुसंयुक्तं भुक्त्वा संपूज्य शंकरं॥५~~॥ शिवार्चनरतो धीमान्
फलमूलेन वर्तयेत्॥४९॥ अप्तोर्यामायुतं फलं प्राप्नोत्येव विशेषतः॥ माघमासे तु संप्राप्ते यः कु
र्यान्नक्तभोजनं॥५० कृसरं मधुसंयुक्तं भुक्त्वा संपूज्य शंकरं॥५०॥ सद्योऽशीदानफलं प्राप्नो
त्यमरपूजितः॥ संप्राप्ते फाल्गुने मासि नक्ताशी शिवपूजकः॥५१॥ श्यामाकक्षीरनीवारैः
जितक्रोधो जितेंद्रियः॥ अत्यग्निष्टोमदशकं फलं लभ्येच्छिवप्रियः॥५२॥ सोमवारे चतुर्दश्यां
भवेदुभयपक्षयोः॥ शिवाय पौर्णमास्यां तु यो दद्याद्घनकंबलं॥५३॥ माघ्यां मघायुते भक्त्या वेदे

वमहामुने॥मासद्वादशभेवंस्यात्पूजयेच्चशिवेश्वरे॥५४॥ वर्षातेभोजयेद्विप्रान्शिव
भक्तान्जितेंद्रियः॥पायसंमधुसंयुक्तंघृतेनचपरिप्लुतं॥५५॥ धनधान्यहिरण्यवासांसिभक्तेभ्योपि
निवेदयेत्॥ वर्षमेकंचरेदेवंनैरंतर्येणयोनरः॥५६॥ वर्षयज्ञफलंलब्ध्वाशिवक्षेत्रेविमुच्यते
॥अविमुक्तेतुनियतमेवंकुर्याद्व्रतंचरेत्॥५७॥जितेंद्रियःसत्यवादीवित्तशाठ्यविवर्जितः॥
देहांतेशिवसारूप्यंलभेत्पुण्यफलंशृणु॥५८॥ सूर्यकोटिप्रतीकाशैर्विमानैःसार्वकामिकैः॥
रुद्रकन्यासमाकीर्णैःमहावृषभसंयुतैः॥५९॥ संगीतनृत्यवाद्याद्यैरप्सरोगणशोभितैः॥ चा
मरैर्धूयमानश्चस्तूयमानःसुरासुरैः॥६०॥ गत्वाशिवपुरंदिव्यंवसेदाभूतसंप्लवं॥ ज्ञानंलब्ध्वा
शिवमुखात्तत्रैवविमुच्यते॥६१॥ वसंतेकिंशुकैःपूज्यदमनैर्मदनार्दनं॥ गोमेधफलमा
प्नोतिग्रीष्मेपिचमहेश्वरं॥६२॥ मल्लिकाभिःसमभ्यर्च्यनरमेधफलंलभेत्॥ वर्षासुकुटजैः
पूज्यशिवंसत्रफलंलभेत्॥६३॥ शरत्सुचमहादेवंपारिजातैःसमर्चयेत्॥ गवामयुतयज्ञस्य
फलंलब्ध्वाविमुच्यते॥६४॥ उमाकांतंचहेमंतेमंदारैश्चसमर्चयेत्॥ कर्णिकारैःसाग्निचित्य
क्रतोःफलमवाप्नुयात्॥६५॥ शिशिरेकरवीरैश्चसितरक्तैःसमर्चयन्॥ दशरात्रफलंलब्ध्वामो
दतेशिवसंनिधौ॥६६॥ कृष्णाष्टम्यांसर्वमासिअविमुक्तेविशेषतः॥ भैरवंपूजयेद्भक्त्यास्त्र
गंधाभरणार्पणैः॥६७॥ हविषावापितांबूलैर्माषापूपैःसमर्चयेत्॥ काश्यांभिर्विघ्नवासाय
भोमाघस्यांविशेषतः॥६८॥ संपूज्यसंस्तुवीतैवंकाश्यांश्रीकालभैरवं॥ परेतभूतवेतालकू-

रनालसमन्वितं॥ ६९॥ प्रपन्नितं महानन्त्यं कलये कालभैरवं॥ कपालमालिकाकंठं ज्वलत्पा
वकलोचनं॥७०॥ कपालकरमत्युग्रं कलये कालभैरवं॥ मणिपादुकपादाब्जं महाशूलकरां
बुजं॥७१॥ कंथाकंचुकसंक्रांतं कलये कालभैरवं॥ दिगंबरं जपावर्णं जरामरणवर्जितं॥
॥७२॥ चारुचंद्रजटाजूटं कलये०॥ बालभानुप्रभाकारं नीलकोमलकुंतलं॥ ज्वलद्दंडकपा
लाढ्यं कलये०॥७३॥ सुरारिवरदायानिं मुरवैरवशीनतुं॥ शिवाज्ञाकारिणीं साक्षात्कलये०
॥७४॥ यस्याज्ञया जगत्सर्वं स्थावरं जंगमात्मकं॥ सर्वं तेनिर्भयं काश्यां कलये०॥७५॥ यइदं का
लनाथस्य पठेद्वीरस्थं कं नरः॥ स एव लभते काशीं निर्विघ्नं शिवाज्ञया॥७६॥ तत्रैव वसते जंतुः
पूजनास्तवमेव च॥ ॥स्कंद उवाच॥ ॥इत्येवं ते समाख्यातो मासार्चनविधिः क्रमः॥ याव
ज्जीवं द्वादशाब्दं त्रिवर्षं वर्षमेव वा॥ ७७॥ काश्यामन्यत्र वा क्षेत्रे कृत्वा शिवसलोकगः॥
काश्यां सायुज्यमाप्नोति विश्वेशकृपया मुने॥७८॥ एवं कुर्वन्परं धर्मं शिवज्ञानमवाप्नुयात्॥
ज्ञाना दुःखं न माप्नोति काश्यामेव प्रसादतः॥७९॥ शंभोर्न चान्यतः पंथा विना शार्वार्चनान्मुने॥
वसंते यो शांनो भजंति च उमाकांतमगाजेवरे श्री सोम ओध्यं भजंति भवभीवो हि नितरां॥ शिवेव
र्व वर्षास्वपि भजंति मासेषु वारादिकृतां नां तं शंभुं भजंति यदि हं मनाशिशिरे॥ ८०॥ ॥इति श्री शि
वरहस्ये महादेवाख्ये एकादशांशे षड्विंशोध्यायः॥२६॥ ॥श्रीमहादेवाय नमः॥ ॥श्रीस्कंद उवा
च॥ ॥पुण्यपर्वसु सर्वेषु ग्रहणे सोमसूर्ययोः॥ अयने विषुवे चैव षडशीतिमुखेषु च॥१॥ सुग

मन्वादिषु मुने पौर्णिमामासु सर्वदा ॥ संक्रांतिषु व्यतीपाते वैधृतौ च विशेषतः ॥ २ ॥ आषाढे चैव
श्रावण्यां मार्गशीर्षे च चैत्रिके ॥ माघ्यां च पौर्णिमायां तु शिवपूजा विशिष्यते ॥ ३ ॥ अमासोमान्विता या
स्यात्सर्वमासेषु सत्तम ॥ कार्तिकेय विशेषेण पुष्याषाढे महाफला ॥ ४ ॥ स्नानमभ्यर्चनं शंभोः विशि
ष्टं स्यात्सदा नृणां ॥ कृष्णपक्षाष्टमी ह्येवं भूतास्त्वसितपक्षयो ॥ ५ ॥ मासिकी शिवरात्री च प्रशस्ता शि
वपूजने ॥ या माघे कृष्णपक्षस्य भूतासोमान्विता यदि ॥ ६ ॥ सार्द्रा पातान्विता वापि निशिवा वै प्रि
या हि सा ॥ स योगो दुर्लभो नॄणां तत्र लिंगोद्भवो मुने ॥ ७ ॥ एकेन बिल्वपत्रेण तस्यां पूज्य विमुक्तिभा
क् ॥ या माघी शिवरात्री च महत्पूर्वा विशिष्यते ॥ ८ ॥ गोकर्णे सा विशिष्येत तथा वै गंधमादने ॥
श्रीकालहस्ती शैले च शिवरात्रि विशिष्यते ॥ ९ ॥ विष्णुब्रह्मादयो देवा प्रार्थयंति मुनीश्वराः ॥
कदा गोकर्णमेष्यामः शिवरात्रौ शिवार्चकाः ॥ १० ॥ भविष्यामो बिल्वपत्रैः हृत्त्रे वा मुक्तिमाप्नुयुः ॥
तत्रैव सागरे स्नानं गोकर्णेशस्य पूजनं ॥ ११ ॥ शिवरात्रौ शिवार्चैषा जन्मनैकेन मुक्तिदा ॥ गो
कर्णं च मुनिश्रेष्ठ शिवक्षेत्रेषु पुण्यदा ॥ १२ ॥ तस्यामभ्यर्चनं विधिं न वाग्रे कथयाम्यहं ॥ कार्ति
के श्रावणे चैव सोमवारे विशिष्यते ॥ १३ ॥ कृष्णपक्षेपि च मुने सर्वमासेषु पुण्यदः ॥ भक्तिः शिवा
र्चकोनंतं तस्मिन्व्यक्तं तु मुक्तिदः ॥ १४ ॥ सर्वमासे प्रदोषेपि प्रशस्तः शिवपूजने ॥ तत्रापि दुर्ल
भो ज्ञेयः मंदवारे महाफलः ॥ १५ ॥ दुर्लभः कृष्णपक्षोत्थः शिवप्रियतमो मतः ॥ तत्रैवार्चनमीशा
स्य सर्वसंपत्प्रदायकं ॥ १६ ॥ सर्वत्र शिवागारे चरे वा स्थावरेपि वा ॥ लिंगेषु पूजया शंभोः मुक्तिः क

रगनाभवेत् ॥१८॥ किंपुनस्त्वविमुक्तेयस्त्रिलोचनसमीपतः॥ त्रिलोचनेश्वरं काश्यांमंदवारेप्रदोष

के॥ पूज्यजन्मायुतैः पापैः मुक्तोमुक्तिंचविंदति॥ सद्दादशप्रदोषाणां फलंलभ्येदयत्नतः॥ १९॥

मंदप्रदोषपूजातोलभेदेवमहामुने॥ एकादश्यांमहादेवंपूज्यबिल्वैः मनोहरैः॥२०॥ सिना

याम सितायांवारुद्रतिथ्यांमुनीश्वर॥ उपोष्यशिवमभ्यर्च्यकृत्वायोनक्तभोजनं॥२१॥ कुर्याद्दे

वंशिवभक्तोमहाफलजिगीषया॥ विष्णुब्रह्मादयोदेवाएकादश्यांशिवार्चनं॥२२॥ कुर्वंत्यु

पोषणंभक्त्यारुद्रतिथ्यंद्विजोत्तम॥ एकादशानांरुद्राणांप्रीत्यर्थंगरुडध्वजः॥२३॥ पक्षद्व

येपिसततंकरोत्येकादशीव्रतं॥ रुद्रप्रियकरोह्येषाकीर्तिकाबाढगासिता॥२४॥ वैशाख्यांच

तथाषाढ्यांचैत्र्यांमाघ्योमहेश्वरं॥ महास्नानविधानेनयोपोष्यास्नापयेन्नरः॥२५॥ पंचामृतैः

फलरसैः महापुण्यमवाप्नुयात्॥ नीलोत्पलदलैर्बिल्वैः पूजयन्कुसुमैरपि॥२६॥ सर्वपापवि

निर्मुक्तोअक्षयेलभतेगतिं॥ योमाघ्यांकुरुतेभक्त्याशिवायघृतकंबलं॥२७॥ सर्ववंशकोटिसं

युक्तोमोदतेशिवसंन्निधौ॥ वैशाख्यांपौर्णिमायांतुदधिकंबलकृन्नरः॥२८॥ महाकैलाससद

दनेमदनांतकरप्रियः॥ भवेन्नवर्ततेविप्रअस्मिन्लोकेध्रुवंनरः॥२९॥ फाल्गुन्यामथपौर्णम्याम

धुकंबलदोनरः॥ शिवायविधिवद्भक्त्यागाणापत्यंलभेन्नरः॥३०॥ संक्रांतिषुशिवंपूज्यंकुसुमैः

बिल्वपल्लवैः॥ क्षीरेणमधुनादध्नासितयाचघृतेनरपि॥३१॥ अभिषिंचेशिवंभक्त्यातूर्यमंग

लवादनैः॥ धूपंचगुग्गुलंदद्याब्रह्महत्यायुतंदहेत्॥३२॥ गच्छेच्छिवपुरंदिव्यंविमानैःसा

र्वैगाभिकैः॥शिवंमकरसंक्रांतौस्नाप्यपंचामृतैःफलैः॥३३॥ तिलांजलिप्रदातैःपूज्यमुधौतैःपांडुरैर्नरः॥ बिल्वपत्रैःसमभ्यर्च्यकृसरैस्तिलसंयुतैः॥३४॥ साज्यंनिवेद्यसगुडंकृतकृत्योभवेन्नरः॥ हंसकुंदेंदुसंकाशैःयानैर्गच्छेच्छिवाश्रमः॥३५॥ षडशीतिमुखेष्वीशंपूज्यभक्त्यासकृन्नरः॥बिल्वपत्रैःसमभ्यर्च्यसुद्रपापैःप्रमुच्यते॥३६॥युगादिषुमहादेवंसिंच्यपंचामृतैःफलैः॥हविर्निवेद्यदेवायसंपूज्यकुसुमाक्षतैः॥३७॥ सर्वपापैःप्रमुच्येतभक्तोभुक्तिंचविंदति॥ मन्वादिषुविरूपाक्षंपूज्यभक्त्यासकृन्नरः॥३८॥ वसेच्छिवपुरेदिव्यसर्वभोगसमन्वितः॥ व्यतीपातेचसंपूज्यदभाज्यैर्बिल्वसंयुतैः॥३९॥ मार्गशीर्षविशेषेणसफलंतस्यजीवितं॥ अणिमादिगुणैर्युक्तःशिववद्विचरेत्सदा॥४०॥ वैधृतौचविशेषेणसंपूज्यशिवमेवहि॥क्षीराद्यैर्बिल्वपत्रैश्चनिवेद्यचहविर्मुने॥४१॥ निशाकरकरप्रख्यैर्ध्रियमाणैःसार्वगाभिकैः॥ यात्येवसंनिधौशंभोर्गणश्रेष्ठोमरेडितः॥४२॥ संपूज्यदेवविप्रेंद्रोयोलिंगमुदगायने॥पुष्पैर्धूपैर्बिल्वैश्चनिवेद्यहविरुत्तमं॥४३॥ भोजयित्वामहाशैवान्कंथाशिवयोगिनः॥ प्रयातिशिवसारूप्यंगाणापत्यंलभेन्नरः॥४४॥ संपूजयन्नरोभक्त्यायोलिंगंदक्षिणायने॥ घृतेनैवाभिषिच्येशंबिल्वैःसंपूज्ययत्नतः॥४५॥ कृसरंयवसंयुक्तंनिवेद्यशिवयोगिनां॥भोजयित्वाघृतान्नेनसर्वपापैःप्रमुच्यते॥४६॥ सर्वान्कामानवाप्नोतियात्यंतेशिवालयं॥अमारवपि च कार्तिक्यांबिल्वैःसोमान्वितास्वपि॥४७॥ संपूज्यचघृतेस्नाप्यलभतेगतिमुत्तमां॥॥नक्तभक्ताशनोभक्तोभुक्तेंयातिनसं

शयः॥४९॥ दिवसेतु समभ्यर्च्य वारर्क्षतिथियुक्तमात्। एकाहमपियोभक्त्या समुक्तः सर्वपापभिः
॥४९॥ संपूज्य च घने स्नाप्य लभते गतिमुत्तमां॥ न लभन्ताधानोभक्तो मुक्तिं यान्ति न संशयः॥५०॥
प्रातः संपूजयेल्लिंगं नेशं पापं व्यपोहति॥ संगवे नंग तायार्थं पूज्या लिंगं सकृन्नरः॥५१॥ पापकं
चुकमुत्सृज्य शिव लोके महीयते॥ अपराण्हेच्छि यं पूज्य गर्भभाक् नैव जायते॥५२॥ मध्या
न्हे ह्यश्वमेधस्य फलं संपूज्य को लभेत्॥ सायंकाले शिवं पूज्य सर्वपापैः प्रमुच्यते॥५३॥ निशी
थे मन्मथारातिं पूज्य बिल्वेन पापभाक्॥ अरुणोदयवेलायां पूज्य देवं क्षणीन्नतु॥५४॥ षट्
काले पूजयेल्लिंगं त्रिकालं वा द्विकालकं॥ एककालं मुनेभक्त्या सरुद्रो नात्र संशयः॥५५॥ अह
रहरहरे नित्यं हरमेवं समर्चयेत्॥ पतोनित्यं जीवितं हि नाश्वसे क्षणमप्यहि॥५६॥ यः समभ्यर्च्य प्रदो
षशु शिवलिंगं समर्चयेत्॥ बिल्वपत्रैश्च कुसुमैः त्तिर्यग्योनिं न वाप्नुयात्॥५७॥ चतुर्थ्यां च प्र
दोषेषु पूज्य इत्येंदुदर्शनैः॥ शिवलिंगं बिल्वपत्रैः न दुर्गतिमवाप्नुयात्॥५८॥ सप्रदोष
स्त्रिधा प्रोक्तः शिवेन परमात्मना॥ माहेश्वरस्त्रयोदश्यां सप्तम्यां च महामुने॥५९॥ सारस्व
तस्तोविप्र चतुर्थ्यां च गणाधिपः॥ सर्वेष्वपि प्रदोषेषु पूज्य एवं महेश्वरः॥६०॥ माहेश्वरत्र
योदश्यां प्रदोषः सार्वमासिकः॥ तस्मिन्नभ्यर्चनं शंभोरनंतं फलदं मुने॥६१॥ मंदवारयुता
यस्यां प्रदोषो रजनीमुखे॥ तत्रापि कृष्णपक्षे च मासे माघे विलभ्यते॥६२॥ तस्मिन्प्र
दोषे लिंगार्चा दोषाद्विभवराभवेत्॥ ग्रहणे सोमसूर्याणां स्नान दानार्चनं विभो॥६३॥ कुर्या

येयो:

ज्जपंचमंत्राणां तस्मिन्काले च सिद्धये॥ सर्वग्रहे कुरुक्षेत्रे स्नानदानं शिवार्चनं॥६४॥ प्रभासे नैमुनिश्रेष्ठ पुष्करे तु शशिग्रहे॥ यमुनागंगयोः संधौ गंगासागरसंगमे॥६५॥ ओंकारेभृगुतुंदे च तथैवामरकंटके॥ नर्मदासागरोपांते गोकर्णे पश्चिमांबुधौ॥६६॥ कावेर्युदधिसंगे च तथा श्रीसागरसंगमे॥ धनुष्कोटौ मुनिश्रेष्ठ कन्यातीर्थे निमज्जनात्॥६७॥ सूर्येंदुग्रहणे पुण्ये स्नानं तेषु प्रशस्यते॥ विधिं च ते प्रवक्ष्यामि सर्वे दोग्रहणे मुने॥६८॥ नित्ये नैमित्तिके काम्ये जपहोमांबुमज्जने॥ शिवार्चने न विधिवन्महादानमनंतकं॥६९॥ कूपाच्छतगुणं वाप्यां नद्यां स्नानं ततोधिकं॥ सागरेपि ततोपि मनदीसंगे ततोधिकं॥७०॥ शिवस्य सन्निधौ स्नानं ततोपि गुणवत्तरं॥ आतुरः कोपि तोये न स्नायाद्ग्रहणयोर्द्वयोः॥७१॥ वेष्टाव्यात्स्कंदगाणेशान्शैवान्शाक्तान्जपेन्मनून्॥ मंत्रसंग्रहणं कुर्याद्ग्रहणे सोमसूर्ययोः॥७२॥ एकाकृत्यापि मंत्राणां लक्षावृत्तिफलं लभेत्॥ पितॄन्संतर्पयेत् श्राद्धैर्नैतैपि च मुनीश्वर॥७३॥ सर्वे गंगासमं तोयं सर्वे व्याससमाद्द्विजाः॥ सर्वं मेरुसमं दानं ग्रहणे सोमसूर्ययोः॥७४॥ मंत्रसिद्धिकरं स्थानं नद्यां पर्वतमस्तके॥ विपिने च शिवागारे देवब्राह्मणसंनिधौ॥७५॥ बिल्वमूले बिल्वपत्रे गृहे गोलिंगमर्चयेत्॥ तत्र संपूज्य यल्लभ्येत् फलं तं लक्षहायनं॥७६॥ रुद्रेण चैव गायत्र्या तथा पंचाक्षराणि च॥ रोगार्तमायुषार्त ध्येहोमयेयश्च गलूर्त्विभिः॥७७॥ तद्ग्रहस्ने परमं श्रेष्ठं शालाग्रे तत्तरमेव वा॥ नद्दीनोयनसंपूर्णघटं संस्पृश्य शोभनं॥७८॥ रुद्राद्भिर्जलैः स्नाप्य रोगैः पापैः प्रमु

च्यते॥ मंत्रान्पंचाक्षरं वापि गायत्रीं वेदमातरं॥ यावद्ग्रहणमोक्षंतु तावन्नद्यांसमाहितः॥ जपे
त्समुद्रगाभिन्यां पुरश्चर्याफलं लभेत॥ ८०॥ चरे वा स्थावरे वापि लिंगे लिंगे शिवार्चकः॥ ग्रहणे
तोमसूर्याणां योमा.हा स्नानकारकः॥ ८१॥ पंचामृतैः पंचगव्यैः तथा फलरसैरपि॥ घृताभ्यंगं
घृतस्नानं ग्रहणे तीव्रपुण्यदं॥ ८२॥ शिवस्य तोषदं विप्रशाणापत्यप्रदं परं॥ तीर्थयात्रिकं धूप
दीपंपुष्पगंधानुलेपनं॥ ८३॥ बिल्वमालार्पणं शंभोः पुण्यं नीराजनं विभोः॥ कुर्याद्यो ग्रहणे
विप्र सर्वान्कामानवाप्नुयात्॥ ८४॥ कश्चित्पूजयते भक्त्या कश्चित्पूजां प्रपश्यति॥ तयोः समफ
लं ज्ञेयं ग्रहणे लिंगदर्शनात्॥ ८५॥ ब्रह्महत्यादिभिः पापैः मुच्यते नात्र संशयः॥ सहस्रवार्षिकी
पूजां ग्रहणे पूजको लभेत्॥ ८६॥ संक्रांतौ शुक्रांतिरुद्रजनलक्ष्मेत्पाने पथार्थेन पतेन्निरयेक
दाचित्॥ नेवाधतिं सलभते द्विजवेध तौ शुभुक्तेः करग्रहणरुद्रग्रहणे शिवं हि॥ ८७॥ ॥
इति श्रीशिवरहस्ये एकादशांशे पर्वग्रहणपूजामहिमानाम सप्तविंशोध्यायः॥ २७॥ ॥
॥श्रीमहादेवाय नमः॥ ॥मुनिरुवाच॥ ॥रहस्यमन्यद्दृदेमममशंभुतनूभव॥ व्रतेषु
केषु चीर्णेषु प्रीतो भवति शंकर॥ १॥ सहेभिर्मुनिभिश्चैव गणैः सुरगणैरपि॥ श्रवणे वध
तं मे घमनः शिवकथामृतं॥ २॥ ॥सूत उवाच॥ ॥इत्थं जैगीषवाक्येन नंदिनात्माहरा
त्मजः॥ प्राह तं तारकारातिः शिवप्रीतिकरं व्रतं॥ ३॥ ॥श्रीस्कंद उवाच॥ ॥शृणुष्व मुनिशा
र्दूल त्रिपुरारिप्रियव्रतं॥ प्रत्येकं सावधाने नगणेश्च मुनिभिः सुरैः॥ ४॥ कैलासे शंकरेणैव प्रो

कानिप्रीतिदानितु॥ गिरिजायैविशेषेणमयानन्यश्रुतानिहि॥५॥ कैलासशैलमंचस्यपार्व
तीपर्छतीश्वरं॥ प्रांजलिर्विनयोपेताम्त्रिकालज्ञात्रिलोचनं॥६॥ पार्वत्युवाच॥ ॥देवदेवम
हादेवत्रिकालज्ञत्रिलोचन॥ किंनवप्रीतिकृच्छंभो व्रतंसर्वाघनाशनं॥७॥ पुमर्थदायकं
शर्वसर्वेषांकथयस्वमे॥ तस्यतद्वदनांभोजंपीत्वालोचनषट्पदैः॥८॥ प्राहदेवींविरूपा
क्षःसत्यक्षमवदद्व्रतं॥ ॥शिवउवाच॥ शृणुपद्मपलाशाक्षीव्रतंमेप्रीतिदायकं॥९॥
साधुसाधुमहाप्राज्ञेसर्वलोकोपकारके॥ यन्नकस्यचिदाख्यातंतदद्यकथयामिते॥१०॥
सर्वकामप्रदंदिव्यंसर्वरोगनिवारकं॥ ब्रह्मविष्ण्वादिभिर्देवैःकृतमेतन्महाव्रतं॥११॥न
रोवायदिवानारीद्विजोवाप्यंत्यजोथवा॥ कृत्वाव्रतमिदंदिव्यंममलोकंसविंदति॥१२॥
सर्वेष्वपिचमासेषुप्रशस्तंसर्वकामदं॥ वयंसोमव्रतेनेनिस्तुतंवेदैर्महेश्वरि॥१३॥ सोमवार
व्रतंदिव्यंद्विजानामेवकेवलं॥ नराणामथनारीणांसौभाग्यारोग्यवर्धनं॥१४॥ श्रावणे
कार्तिकेवापिरहीननियमेव्रती॥ पूजयेन्मांमहादेविसोचिरान्मुक्तिभाग्भवेत्॥१५॥
देव्युवाच॥ ॥कथंसोमव्रतंकार्यंकोविधिःपूजनंकथं॥ कस्मिन्कालेचकर्तव्यंसर्वंविस्तर
तोवद॥१६॥ ॥शिवउवाच॥ ॥श्रावणेस्मिन्वरेमासित्वन्विपतुमौलिसंस्थिते॥ केदारेश
महालिंगसन्निधौनियमाद्व्रती॥ संकल्प्यवत्सरंवापित्रीणिद्वादशवात्रिके॥ संकल्प्यब्राह्मणैः
सार्द्धंव्रतमेतत्समाचरेत्॥ अस्यकेदारनाथस्यश्रावणेसोमवासरे॥१८॥ पूजाकार्याविशेषेण

साधनैर्विविधैः शुभैः ॥ सोमवारं व्रतं कार्यं प्रयत्नेन यथाविधिः ॥१९॥ ब्राह्मणैरेव नियमादा
जन्मांतं महेश्वरि ॥ शक्तेनोपोषणं कार्यमन्यथा निशिभोजनं ॥२०॥ उपवासी पूजयेन्मां रात्रौ
यामचतुष्टयं ॥ परेद्युर्मां समभ्यर्च्यानिवेद्यास्तीनभावलः ॥२१॥ सर्वेष्वपि च मासेषु सोमवा
रः प्रशस्यते ॥ कृष्णपक्षे विशेषेण तस्य नोद्यापनं शिवे ॥२२॥ नक्तभुग्यदि भक्तस्य क्षारवर्ज्या
न्नभुक् भवेत् ॥ यन्निवेदितमीशाय तदश्नीयाद्यथाविधिः ॥२३॥ मधुमांसं वर्जयीत न कासी
सर्वदा शिवे ॥ वत्सरे वत्सरांते वा द्वादशाब्दे त्रिहायने ॥२४॥ नक्ताशनो धर्मं कुर्यादुपवासी न
संज्वरेत् ॥ अन्येष्वपि महादेवि शिवक्षेत्रेष्वथारभेत् ॥२५॥ अविमुक्ते तु नियतं नित्यं नक्ता
शनी भवेत् ॥ सोमवारेषु वादेवि भक्तानामस्मभीप्सुवा ॥२६॥ पर्वस्वपि विशेषेण सोमाभास्व
पिशाकशि ॥ मूहूर्ते नंदिने नक्तं तत्र संपूज्य हव्यभुक् ॥२७॥ कार्तिके मारभेद्वापि अरुणाचल
सन्निधौ ॥ सोमवारव्रतं देवि संकल्प्यैव हि पूर्ववत् ॥२८॥ ॥ ईश्वर उवाच ॥ अत्रेतिहासं व
क्ष्यामि श्रणु शैलसुतेनघे ॥ चाक्षुषस्यांतरे देवि दक्षो मेधाय दीक्षितः ॥३०॥ सर्वैः सुरासु
रैर्देवि विप्रैस्तु विष्णवादिभिः द्विजैः ॥ मामनादृत्य त्वां चापि यज्ञविघ्नमथालभत् ॥३१॥ सुराध्य
वीरभद्रेण शिक्षिना दीक्षितोपि हि ॥ चंद्रोपि तन्मय पश्चात्यं निःपिड्य करपंकजैः ॥३२॥ सोमो
ही नाम ता गौरी रोहिणी मां जपंस्तदा ॥ केदारे सोमनाथाख्यं लिंगं संस्थाप्य पूजयत् ॥३३॥ स
पुनर्दक्षशापेन पीडितो मममनूनुषत ॥ सोमवारेष्वथ मी शे सोमो यक्ष्मरुजार्दितः ॥३४॥ सोम उवाच ॥

बलीवर्द्दध्यन्सार्द्धं वेनक्रुधा त्रिपुरं निर्द्दहन्नन्दं तेजो ॥ इनाक्षेणेव हार्दं तमोनाशायन लोकजा
लं सुशोकं धुनीते पुनीते महेशः ॥ ३५ ॥ ततस्तु बोधस्य हे देवि तस्य स्तुत्या च भक्तितः ॥ सोमवा
रव्रतस्यास्य प्रभावेन गिरिं द्रजे ॥ ३६ ॥ तेनोक्तं यदि तुष्टोसि तिष्ठात्र स्थो निरंतरं ॥ यावच्चंद्र
श्च सूर्यश्च यावत्तिष्ठति मेदिनी ॥ ३७ ॥ तावन्मे स्थापितं लिंगं उमया सह तिष्ठ भो ॥ रोहिण्याश्च
पतिश्चैवं प्रार्थयित्वा च मां शिवे ॥ ३८ ॥ ततः शुभ्रचारी रो सो गगनस्थो विराजते ॥ ममोत्तमांग
देवेशि स्थानं दत्तं विशेषतः ॥ देवान्प्रीणाति सो ह्यपि सोमधामप्रदानतः ॥ प्रथमां पिबते वन्हिः
द्वितीयं भास्करः शिवे ॥ ३९ ॥ तृतीयामथ देवेंद्रः चतुर्थीं मरुतोखिलाः ॥ वसवः पंचमीं तस्य कलां
षष्ठीं तु वायवः ॥ ४० ॥ आदित्याः सप्तमीं देवि रुद्रास्तस्याष्टमीं कलां ॥ नवमीं ऋभवो देवि दश
मीं यक्षगुह्यकाः ॥ ४१ ॥ एकादशीं शिवे साध्याः द्वादशीं विष्णुरेव हि ॥ ब्रह्मत्रयोदशीं तस्य
चतुर्द्दशीं तु निर्ऋतिः ॥ ४२ ॥ अमावास्यासु पितरः कलां तस्यापि वंति हि ॥ सोमोमृतमयो
देवि देवानां भोजनं शशी ॥ ४३ ॥ कलाभिः पोषयेद्देवानोषधीनां गणं शिवे ॥ सोमवल्लीं पुनि
तरां यज्ञार्थे सोमपाः द्विजाः ॥ ४४ ॥ सोमेनादित्यबलिनः सोमेन सवितामहा ॥ सर्वेषामप
ऋक्षाणां मध्ये वै सोम आस्थितः ॥ ४५ ॥ इत्येषा वक्रूचानां हि श्रुतिराह महेश्वरि ॥ सर्वेषां
जनिता सोमः शक्रविष्णुनिलात्मनां ॥ ४६ ॥ तस्मात्तदा विष्टतया सोमवल्लीभिरेव हि ॥
प्रवर्तयंति यज्ञाश्च सोम्यायै ब्राह्मणाः शिवे ॥ ४७ ॥ सोमपा ब्राह्मणाः सर्वे मम वतनयाः ॥ शि

वं॥ ब्राह्मणानामयंराजासोमःसाक्षान्ममांशकः॥४८॥ तथैवचवदनं देविअग्निःमेवदनं
शिवे॥ तस्मादग्निश्चसोमश्चजगच्चक्रप्रवर्तकौ॥४९॥ अग्नीषोममयंसर्वंजगदेतच्चराचरं॥
तस्माद्यज्ञेषुसर्वेषुअग्नीषोमपशुस्मृतः॥५०॥ तस्माद्व्रतमिदं देविसोमवारंममेष्टदं॥
ब्राह्मणैःसोमपैरेवकार्यंनक्ताशनात्मना॥५१॥ शिवक्षेत्रेगृहेवापिअविमुक्तेचनेत्यर्कं॥
श्रावणेकार्तिकेवापिनक्तभोजनमाचरेत्॥५२॥ ब्राह्मणानांविधिश्चायंसोमपानांविशेष
तः॥ बहुज्ञाबालकथितोविधिरेषसनातनः॥५३॥ विधवायतिधुराणांचवानस्थानांचव
र्णिनां॥ उपवासोयतीनांचचतुर्थीष्वेषुपूजनं॥५४॥ प्रशस्तंममदेवेशिसोमवारेषुसर्वशः
॥वर्णानामाश्रमाणांचभक्तानांनियतात्मनां॥५५॥ ज्ञात्वोपुपोषणाहीनःचिरंविद्यासुतिष्ठति
॥येसोमवारेस्वछंदिवाकुर्वंतिभोजनं॥५६॥ तान्पालयंतिनैकेक्रूरास्तेयमकिंकराः॥तदा
प्रभृतियेकेचित्व्रतंकुर्वंतिमानवाः॥५७॥ तेपित्पदमायांतिविमलांगाश्चसोमवत्॥ नवार
व्रतमेतद्धिश्रुत्युक्तंविधिनाचरेत्॥५८॥अथाकिंबहुनोक्तेनविधानंतस्यकीर्तये॥ ॥
श्रीस्कंदउवाच॥ ॥ एवंजगादगिरिजांप्रतिचंद्रमौलिःसोमव्रतस्यमहिमामसमांद्विजा
चा॥भक्तोपिनक्तहितभक्तविधिशिवभुक्स्याल्लिंगार्चनस्तवनदर्शनतोन्नमुक्तः॥६०॥ ॥
॥ इतिश्रीमहादेवाख्येएकादशांशेशिवरहस्येसोमवारव्रतमहिमानामअध्या०॥२८॥
॥श्रीमहादेवायनमः॥ ॥श्रीशिवउवाच॥ ॥ यस्मिन्कस्मिंश्चमासेचशुक्लेसोमस्यवासरे॥

शौचं विधाय न द्यां वै स्नायाद्धुषसि सत्तमे ॥१॥ स्वधर्मविहितं कर्म कृत्वा स्थाने मनोरमे॥ सुसमे भूभवे रम्ये न्यसेत्कुंभं मनोरमं॥२॥ चूतपल्लवविन्यस्तं चंदनेन मनोरमं॥ श्वेतवस्त्रोपरिधानः सर्वालंकारभूषितः॥३॥ आदौ पात्रं च विन्यस्य आधारसहितं शिवं॥ अष्टौ विधिश्च रौद्रं वा सोमनाथं सशक्तिकं॥४॥ वाससा सहितं नत्र श्वेतपुष्पैः प्रपूजयेत्॥ लिंगं तु गंगं च विन्यस्य पंचगव्येन सेचयेत्॥५॥ शिवे फलरसैः श्वेतैर्वा गंधपुष्पांबुसेचनैः॥ गंधाक्षतादिभिः पूज्य रुद्रेण वह्नितोंबिके॥६॥ विविधैर्भक्ष्यभोज्यैश्च फलैर्नैवेद्यमाचरेत्॥ धूपदीपादिकं दत्त्वा नीराजितपुरः सरं॥ स्तोत्रैस्तुवीत देवेशं सोमवारे विशेषतः॥ सोमालंकृत मस्तकाय विभवेनादिसाम स्तुतिप्रख्यातायउमाधवाय महते भूमाय देवाय ते॥ कामांगारिवलद्दाहकाय भगवन्होमप्रिया यादराद्दामाधीकृतये समायजगतां पित्रे नमस्ते भवे॥८॥ स्तुवीत वं महादेवं सोमवारेषु पूजकः॥ उपोष्य वा नक्तभुक् भवेद्भक्तो दृढव्रतः॥९॥ एवं कृते तु प्रथमे सोमवारे गदोज्झितः॥ आरोग्यमतुलं प्राप्य शिवलोके महीयते॥१०॥ द्वितीये सोमवारे तु करंजं दंतधावनं॥ देवं संपूजयेद्रात्रौ गंधपुष्पैर्मनोरमैः॥११॥ शतपत्रैर्बिल्वपत्रैः नकाशी मुक्तिभाग्भवेत्॥ सगोलक्षफलं प्राप्य शिवलोके महीयते॥१२॥ तृतीये सोमवारे तु वटजं दंतधावनं॥ सायंकाले बिल्वपत्रैः जाजैभिः पूजयेच्छिवं॥१३॥ नैवेद्यं दापयेद्न्नं न दत्तीयानदाविधिः॥ एवं कृते तृतीये तु कन्यादानायुतं लभेत्॥१४॥ चतुर्थे सोमवारे तु

अपामार्गसमुद्भवं॥ रुद्रेण पूजयेद्रात्रौ बिल्वैः मल्लीसुमैः शिवं॥ १५॥ स्वादन्नं शर्कराक्षी
रं निवेद्याश्नीत सद्द्विजैः॥ यज्ञायुतफलं प्राप्य शिवलोके महीयते॥ १६॥ पंचमे सोमवारे तु
अश्वत्थं दंतधावने॥ शिवं संपूज्य येद्रात्रौ बिल्वैर्पद्मैर्महेश्वरि॥ १७॥ दधिभक्तं निवेद्यात्वा
ब्रह्महापि विमुच्यते॥ सोमवारे तु षष्ठे वै दंतधावनमार्जितं॥ १८॥ शिवं संपूजयेद्रात्रौ मंदा
रैर्बिल्वपल्लवैः॥ नैवेद्यं च शिवं दद्यात्फलपायसमंडकं॥ १९॥ सषड्यायुतफलं प्राप्य म
ल्लोकमाव्रजेत्॥ सप्तमे सोमवारे तु प्लक्षजं दंतधावनं॥ २०॥ श्रीकंठं पूजयेत्सायं श्रीपत्रैः
करवीरकैः॥ विविधैर्भक्ष्यभोज्यैश्च नारिकेलफलैरपि॥ २१॥ नैवेद्यं चन्नतो दत्वा दीपधूप
पुरःसरं॥ सप्तसागरदानस्य फलं लब्ध्वा ममांतिगः॥ २२॥ अष्टमे सोमवारे तु अष्टमूर्तिं य
जेच्छिवं॥ पंचामृतैः फलरसैः गंधपुष्पकुशांबुभिः॥ २३॥ गंधिपुष्पैर्बिल्वैश्च यक्षकर्दमले
पनैः॥ मध्वन्नं पायसापूपं कदलीफलसंयुतं॥ २४॥ निवेद्याश्नीत द्रात्रौ भवभक्तिजितेंद्रि
यः॥ गजानां च शतेनेदत्तेन लक्षं च रथवाजिनां॥ २५॥ सूर्यग्रहे कुरुक्षेत्रे यत्पुण्यं स्यान्महेश्व
रि॥ तत्पुण्यं कोटिगुणितं सोमवारव्रती लभेत्॥ २६॥ नवमे सोमवारे तु कुटजं दंतधावनं
॥ बिल्वपुन्नागकादंबैर्पूजयेन्मां महेश्वरं॥ २७॥ सायं घृतान्ननैवेद्यं धूपदीपमनोहरं॥
पौंडरीकायुतफलं प्राप्य विष्णुलोके वसेत्॥ २८॥ तेनोदितं शिवज्ञानं लब्ध्वा मल्लोकमाव्रजेत्
दशमे सोमवारे तु बिल्वजं दंतधावनं॥ २९॥ महादेवं बिल्वपत्रैर्यजेन्नीलोत्पलैः शिवे॥

नैवेद्यं वटकापूपंस्वाद्वन्नं विनिवेदयेत्॥ ३०॥ वाजपेयायुतं प्राप्य ब्रह्मलोके महीयते॥ ब्रह्मणा
पूजितस्तत्र ज्ञानं लब्ध्वा तदंतिके॥ ३१॥ तेनैव मुच्यते देवि सोपि मय्येव लीयते॥ एकादशे सो
मवारे काष्ठमौदुंबरं भवेत्॥ ३२॥ पार्वतीशं दूर्वया र्च्या बिल्वैश्चैवाथ चंपकैः॥ रसरं भक्ष्यभो
ज्यादि निवेद्याश्नीत नशांभवैः॥ ३३॥ राजसूयादिदशकं प्राप्य मल्लोकमावसेत्॥ द्वादशे सोम
वारे तु शिग्रुजं दंतधावनं॥ ३४॥ शिवं गुपुष्पैरुग्रपूजां कुर्यात्सायं तु बिल्वकैः॥ मुद्गान्नं घृ
तभक्ष्यं निवेद्याश्नीत शांभवैः॥ ३५॥ द्वादशाब्दफलं प्राप्य शिवलोके महीयते॥ मासाब्दसंख्य
या कुर्यात्सोमवारव्रतं शिवे॥ ३६॥ नक्ताशनी भवेद्वर्षं त्रिवर्षं द्वादशाब्दकं॥ शिवक्षेत्रेषु
पुण्येषु अविमुक्ते च नैत्यकं॥ ३७॥ कुर्यादुद्यापनं चांते पुनः पुनर्यथा भवेत्॥ आजन्म ग्रह
णे देवि। नैवोद्यापनमाचरेत्॥ ३८॥ ॥ पार्वत्युवाच॥ ॥ कीदृशं तद्व्रतं देव विधानं तस्य
कीदृशं॥ कथं कार्यं कदा ग्राह्यं किं दानं कं पमर्चनं॥ ३९॥ उद्यापनविधानं च विस्तरेण वदस्व मे॥
॥ महादेव उवाच॥ माघमास्यष्टमी शुक्ले शिवं दृष्ट्वा दिनसंयुता॥ तदा ग्राह्यं व्रतमिदं अनेन वि
धिना शुभं॥ ४०॥ प्रातः शुक्लतिलैः स्नाया दाचार्यसहितो व्रती॥ पूर्वाण्हे विधिवत्कुर्यादु
माशंकरपूजनं॥ ४१॥ ततः पुष्पांजलिं दत्वा प्रणम्य च पुनः पुनः॥ विधिनानेन गृण्हीयाद्व्रतं सं
कल्पपूर्वकं॥ ४२॥ गृण्हामि भवरोगार्तः सोमवारव्रतोत्तमं॥ व्रतेनानेन सुप्रीतो भव त्वं पा
र्वतीश्वरो॥ ४३॥ विसर्जनं ततः कुर्यादाचार्यं वरयेत्ततः॥ अहःशेषं ततो नीत्वा पुराणश्रव

णादिभिः॥४४॥शयानो दर्भकूर्चेषु अभुक्त्वा सचयेवान्॥ [illegible] अनेन विधिना देवि भाद्रे नेवा
सरे शुभे॥४५॥ व्रतीकुर्वन्न चाप्नोति मद्भावं नात्र संशयः॥ तस्मिन्दिने कृतं किंचिद्धोमं दानं
शिवार्चनं॥४६॥ व्रतं चाप्नोति दं स्कं दमुमया सहितस्य भो॥ अतः सोमाख्य यावारः प्रशस्तो
यं मम प्रियः॥४७॥ एवं समाप्य कं कुर्याद्व्रतस्योद्यापनं भवेत्॥ माघाद्य पंचकं कुर्याच्छुक्ल
पक्षे विशेषतः॥४८॥ शिवर्क्षे तिथियोगानामेकेकेनापि संयुते॥ सोमवारे विधातव्यं चं
द्रताराबलान्विते॥४९॥ विधाय रदनोल्लेखं प्रातःस्नाथाद्विधानतः॥ आचार्यं वरये देकं
शिवभक्तं जितेन्द्रियः॥५०॥ पुराणस्मृतिशास्त्रज्ञं निगमागमवेदिनं॥ उपोष्य सोमवारे च सा
यं संध्यामुपास्य च॥५१॥ शिवालये नदीतीरे शुचौ देशो गृहे वने॥ अष्टांगुलोच्छ्रितां वेदिं वि
तस्तिद्वयविस्तृतां॥५२॥ तस्यां षोडशपत्रं च तंडुलैः परिपूरितं॥ पुष्पमंडपिकां कुर्यात्त्य
नाकाद्यैरलंकृतां॥५३॥ वितानैर्विविधैः श्रोत्रैः फ[illegible]र्विराजितः॥ एवं प्रकल्पयेद्वे
दिं चतुरस्रां समां तथा॥५४॥ आचार्येण समं कुर्यान्मदाराधनमुत्तमं॥ पद्ममध्ये नवीनं च
धातुजं स्थापयेद्घटं॥५५॥ वाससा संवृते देवि फलपल्लवचक्रकं॥ समंतात्कुंभकैरष्टैः
पल्लवांबुमपूरितैः॥५६॥ गणेशं मातृकां चैव दुर्गां क्षेत्रपतिं हरिं॥ ब्रह्माणमथ सावित्रीं रुद्र
मैरावतं स्थितं॥ पंचामृतोदकैः स्नाप्य गंधपुष्पाक्षतैः जलैः॥ गृहीते मध्यमे कुंभे ध्यायेन्म
दुपमीश्वरि॥५८॥ सांबं चंद्रकलाजूटं त्र्यंबकं नीलकंधरं॥ वरदाभयहस्तं च गंधपुष्पांबराव

ते॥५९॥ त्वयाचस्कंदगणपनंदीभृंगीशास्तेविते॥ ध्यात्वावाह्यायसंपूज्य शुद्धपंचाक्षरेणहि
॥ ततहृद्वादिमंत्रैश्चपूर्वादिषुदलेष्वथ॥ मूर्तयोष्टौमहीयाश्चपूजनीयाः क्रमेणच॥६१॥
अनंतायनमः सूक्ष्मशिवायाथत्रिमूर्तये॥ श्रीकंठायशिखंडायचंद्रचूडायशूलिने॥६२॥
पूर्वादिक्रमयोगेनततनवः पूजयेत्क्रमम्॥ तद्बहिर्लोकपालांश्चपूजयेन्मूलमंत्रतः॥६३॥ वि
षयाद्युपचारैश्चगंधपुष्पाक्षतैर्यजेत्॥ बिल्वपत्राक्षतैःपुष्पैः धूपदीपैः समर्चयेत्॥६४॥
मनोरथाविधातव्या पूजाविज्ञानुसारतः॥ ततोवेद्यामधोभूमौसर्वतोभद्रमंडले॥६५॥
ब्रह्माद्यादेवताः सर्वाः क्रमेणैवसमर्चयेत्॥ नैवेद्यानिसुहृद्यानि तांबूलानिचकल्पयेत्॥
६६॥ रात्रौजागरणंकुर्याद्गीतमंगलवादनैः॥ पुराणैरितिहासैश्चशास्त्रशोधनयेद्व्रती॥६७॥
अपरेद्युः कृतस्नानः प्रातः संध्यामुपास्यच॥ पुनर्वैद्यांशिवंदेवान् पूजयेदुपचारकैः॥६८॥
हवनार्थंविधातव्यंकुंडंवास्थंडिलेशिवे॥ स्वगृह्योक्तेनविधिना उपलेपनपूर्वकं॥६९॥ अ
नाज्ञाताहविर्हुत्वामहाव्याहृतपस्तथा॥ होतव्याः मधुनाश्चैवपायसादितिलैः सह॥७०॥
र्वसोमासीतिमंत्रेणहुनेदष्टहुनीशानं॥ ततःस्विष्टकृतंहुत्वाहोमशेषंसमापयेत्॥७१॥ त
तो होमावसानेचगामेकांधवलांशुभां॥ पयस्विनीमरोगांच सवत्सांकांस्यदोहनां॥७२॥ द
द्यात्कृतसमध्यर्थमाचार्यायसदक्षिणां॥ वस्त्रैराभरणैरत्नैराचार्यंपरितोषयेत्॥७३॥ ततः
षोडशसंख्याकान्ब्राह्मणान्भोजयेद्दया॥ तान्भक्त्यापूजयेद्विप्रान् शांभवान्नामभिः क्रमात्

॥७४॥ सोमेश्वरस्तथेशानः शंकरो गिरिजाधवः ॥ महेशः सर्वभूतेशः शंकरस्त्रिपुरांतकः ॥७५॥
शिवः पशुपतिः शंभुः स्मरवकश्वं दृशेश्वरः ॥ गंगाधरो महादेवो वामदेव इति क्रमात् ॥७६॥
उपचारान्समर्प्याथ दद्यात्कुंभान्सदक्षिणान् ॥ वस्त्रैराभरणैरन्यैराचार्यं परितोषयेत् ॥७७॥
तथैव पूजयेदन्यान्दीनानाथांश्च तोषयेत् ॥ व्रतं ममास्तु संपूर्णमित्युक्त्वा तान्क्षमापयेत् ॥७८॥
विसर्ज्य ब्राह्मणान्सर्वान् शिष्टैरिष्टैः समन्वितः ॥ भुंजीयाद्व्रतशेषं तु आचार्यसहितो व्रती ॥
७९॥ एवं कृते महापुण्ये व्रतस्योद्यापने विधौ ॥ नारी वा पुरुषो वापि महेशस्य पदं लभेत् ॥८०॥
अपुत्रो लभते पुत्रं निर्धनो धनमाप्नुयात् ॥ पृथिव्यां यानि तीर्थानि व्रतान्यन्यानि यानि च ॥८१॥ सोम
वारव्रतस्यास्य कलां नार्हंति षोडशीं ॥ ॥ ईश्वर उवाच ॥ ॥ शिवेनानः प्रातः कमलमुखि सोमाल
स्त्रिजगतां तं भ्रांतं मम भजनवैधुर्यवशतः ॥ कुतः सौख्यं सख्यं लभति च फलं प्रेत्य सुखदं
जनानेष्या जातेः सुरवरनरैः सेवितपदे ॥८२॥ ॥ इति श्रीशिवरहस्ये एकादशांशे महा
देवाख्ये शिवगौरीसंवादे सोमवारव्रतोद्यापनकथनं नामैकोनत्रिंशोऽध्यायः ॥२९॥ ॥श्री
महादेवाय नमः ॥ ॥पुनरन्यद्व्रतं किं ते प्रियं शंकर मे वद ॥ येन चीर्णेन जगतां मुक्तिः साधारणी
भवेत् ॥१॥ ॥ ईश्वर उवाच ॥ ॥ प्रदोषो मे प्रियकरः त्रयोदश्यां महेश्वरि ॥ सर्वमासेषु सर्वे
षां भुक्तिमुक्तिप्रदो मम ॥२॥ किं पुनर्मंदवारेण संयुक्तः कृष्णपक्षगः ॥ तत्रोपवासः पूजा च
सायं मुक्तिप्रदा मम ॥३॥ तद्विधानं तत्र शिवे वदाम्यद्य विशेषतः ॥ शृणु त्वं सावधानेन चेतसा

जगदीश्वरि॥४॥ पक्षद्वये त्रयोदश्यां निराहारो भवेच्छिवे॥ प्रदोषव्यापि सायं यन्न घटिकात्र
यभाक् यदा॥५॥ तत्रैव पूजनं शास्त्रमया प्रोक्तोत्तरे भवेत्॥ नद्यां वा दिव्य वापीषु वा स्नानं तत्र समाच
रेत्॥६॥ शुक्लांबरधरो भूत्वा वाग्यतो नियमान्वितः॥ भस्मसंशोभित त्रिपुंड्र रुद्राक्ष परिमंडित
विग्रहः॥७॥ कृतसंध्याजपविधिः शिवपूजां समारभेत्॥ देवस्य पुरतः सम्यक् उपलिप्य न
वांभसा॥८॥ विधाय मंडपं रम्यं पुष्पमालाविराजितं॥ वितानाद्यैरलंकृत्य फलमूलनवांकुरैः॥९॥
विचित्रं पद्ममालिख्य पंचवर्णकसंयुतं॥ तत्र पीठे चतुष्पादे स्वोर्ध्वे स्थापयेच्छिवं॥१०॥ तत्रो
पविश्य शुभे चासने व्यग्रमानसः॥ पाद्यार्घ्याचमनादीनि सुपुष्पाणि च विन्यसेत्॥११॥ स
म्यक् संपादिताशेषपूजोपकरणः शुचिः॥ आगमोक्तेन विधिना पीठमामंत्रयेत् सुधीः॥१२॥
ततः कृत्वात्मशुद्धिं च भूतशुद्धिमनुक्रमात्॥ प्राणायामत्रयं कुर्याद्द्विजवर्णैः सबिंदुकैः॥१३॥
मातृकां न्यस्य विधिवद्ध्यात्वा तां देवतां परां॥ समाप्य मातृकां भूयो ध्यात्वा देवं परं शिवं॥१४॥
वामभागे गुरुं नत्वा दक्षिणे गणपं यजेत्॥ अंसोरुयुग्मे देवादीन्यसेन्नाभौ च पार्श्वयोः॥१५॥
अधर्मादीननंतादि हृदि पीठे च विन्यसेत्॥ आधारशक्तिमारभ्य ज्ञानात्मानमनुक्रमात्॥१६॥
उत्क्रमेण विन्यस्य हृत्पद्मे साधु भाविते॥ नवशक्तिमये रम्ये ध्यायेद्देवमुमापतिं॥१७॥ चंद्रको
टिप्रतीकाशं सोमचूडं त्रिलोचनं॥ आपिंगलजटाजूटरत्नमौलिविराजितं॥१८॥ नीलग्री
वमुदारांगं नागहारोपशोभितं॥ वरदाभयहस्तं च हरिणं च परश्वधं॥१९॥ दधानं नागवलयं

केयूरांगदमुद्रियं॥ व्याघ्रचर्मपरीधानं रत्नसिंहासनस्थितं ॥२०॥ ध्यात्वा मद्वामभागे त्वां चिंत
येद्गिरिकन्यकां॥ भास्वज्जपाप्रसूनाभामुदयार्कसमप्रभां॥२१॥ विद्युत्पुंजनिभां तन्वीं मनोन
यननंदिनीं॥ बालेंदुशेखरस्निग्धनीलकुंचितकुंतलां॥२२॥ भृंगसंघातरुचिरनीलालक
विराजितां॥ मणिकुंडलविद्योतमुखमंडलविभ्रमां॥२३॥ नवकुंकुमपंकांककपोलतलद
र्पणां॥ मधुरस्मितविभ्राजदरुणाधरपल्लवां॥२४॥ कंबुकंठीं शिखामुद्यत्कुचपंकजकुड्म
लां॥ पाशांकुशाभयवरैर्विलसत्करपल्लवां॥२५॥ अनेनरत्नविलसत्कंकणांगदमुद्रिकां॥
त्रिवलीवलयां हृद्यां रत्नकांचिगुणान्वितां॥२६॥ रत्नमालांबरधरां दिव्यचंदनचर्चितां॥
दिक्पालवनितामौलिसन्नतांघ्रिसरोरुहां॥२७॥ रत्नसिंहासनारूढां मंदस्मितमुखां
बुजां॥ एवं ध्यात्वा महादेवं मां देवीं त्वां मनोरमां॥२८॥ न्यासक्रमेण संपूज्य देवगंधादि
भिः क्रमात्॥ पंचभिर्ब्रह्मभिः कुर्यान्मूर्तिस्थानेषु वा हृदि॥ पृथक्पुष्पांजलिं देहे मूलेन च हृ
दि त्रिधा॥ पुनः स्वयं शिवो भूत्वा मूलमंत्रेण साधकः॥३०॥ ततः संपूजयेद्देवं बाह्यपीठे पुनः क्र
मात्॥ संकल्पं च वदेत्तत्र पूजारंभे समाहितः॥३१॥ कृतांजलिपुटो भूत्वा प्रार्थयेदं दुशेख
रं॥ ऋणपातकदौर्भाग्यदारिद्र्यविनिवृत्तये॥३२॥ अशेषाघविनाशाय प्रसीद मम शंक
र॥ दुःखशोकाग्निसंतप्तं संसारभयपीडितं॥३३॥ बहुरोगाकुलं दीनं पाहि मां वृषवाहन॥
आगच्छ देवदेवेश महादेवाभयंकर॥३४॥ गृहाण सह पार्वत्या नवपूजां मयीकृतां॥ इति सं

श्रीशिव

कल्पविधिवद्वाह्यपूजांसमाचरेत्॥ ३५॥ गुरुंगणपतिंचैव यजेत्सव्यापसव्ययोः॥ क्षेत्रेशमीशकोणेचवलैकात्यायनीं जयेत्॥ ३६॥ धर्मंज्ञानंचवैराग्यमैश्वर्यंचनमोंतकैः॥ सवैरग्न्यादिकोणेषु पादपीठेष्वनुक्रमात्॥ ३७॥ आभ्यांचविंदुवर्गाभ्यांमधर्मादींस्तुपूजयेत्॥ मात्रूपांचतुर्दिक्षुमध्येनंतंसनारकं॥ ३८॥ सत्वादींस्त्रिगुणांस्तंतुरूपान्पीठेतुविन्यसेत्॥ अथऊर्ध्वच्छदमायाविद्यात्मश्यामेशिवेनच॥ ३९॥ तदंतेनचांबुजंभूयः सकलंमंडलत्रयं॥ पत्रकेसरकिंजल्कव्याप्तंताराक्षरैः क्रमात्॥ ४०॥ पद्मत्रयंसमभ्यर्च्यमध्येमंडलमादरात्॥ वामांज्येष्ठांचरौद्रीं[illegible]चभागाद्यैर्दिक्षुपूजयेत्॥ ४१॥ वामाद्यानवशक्तिश्चनवाक्षरयुताजयेत्॥ हृदिबीजत्र[illegible]याद्यनपीठमंत्रेणचार्चयेत्॥ ४२॥ आवृत्तिप्रथमांगैस्तुपंचभिःमूर्तिशक्तिभिः॥ त्रिंशद्भिर्मूर्तिभिःश्चान्याविधिद्वयसमन्वितैः॥ ४३॥ अनंताद्यापराबह्मोमातृभिःश्चवृषादिभिः॥ सिद्धिभिश्चाणिमाद्याभिरिंद्राद्यैश्चशिवेसुरैः॥ ४४॥ वृषभक्षेत्रचंडेशौदुर्गाचस्कंदनंदिनो॥ गणेशक्षेत्रपश्चैवस्वस्वलक्षणलक्षिताः॥ ४५॥ अणिमामहिमाचैवगरिमालघिमातथा॥ ईशित्वंचवशित्वंचप्राप्तिःप्राकाम्यमेवच॥ ४६॥ अष्टैश्वर्याणिचोक्तानितेजोरूपाणिकेवलं॥ पंचभिर्ब्रह्मभिःपूर्वंहृल्लेखाद्याभिरप्यनु॥ ४७॥ अंगैरुमाद्यैरिंद्राद्यैःपूजोक्तामुनिभिःशिवे॥ उमाचंडेश्वरादीश्चपूजयेदुत्तरादिभिः॥ ४८॥ एवमावरणोपेतंतेजोरूपंमदाशिवं॥ उमयासहितंदेवमुपचारैःप्रपूजयेत्॥ ४९॥ सुप्रतिष्ठितवांरवस्यनीर्थैःपंचासनेरथि॥ पंच

गव्यैः फलरसैः कुशगंधांबु हेमजैः ॥५०॥ अभिषिच्य महादेवमुपचारैः समाहितः ॥ कल्प
येद्द्विविधैर्मंत्रैरासनाद्युपचारकान् ॥५१॥ आसनं कल्पयेद्धैमं स्वागतं विहितांजलिः ॥ अ
र्घ्यमष्टगुणोपेतं पाद्यं शुद्धोदकेन [illegible] नु ॥५२॥ तेनैवाचमनं दद्यान्मधुपर्कं मधूत्तरं ॥ पु
नराचमनं दत्वा स्नानमंत्रैः प्रकल्पयेत् ॥५३॥ उपवीतं तथा वासो भूषणानि निवेदयेत् ॥
गंधमष्टांगसंयुक्तं भस्म नापि निवेदयेत् ॥५४॥ ततस्तिलाक्षतैर्युक्तान् धौतान् धवलतंडुलान् ॥
पुष्पाणि बिल्वमंदारकल्हारसरसीरुहं ॥५५॥ धत्तूरं कर्णिकारं च द्रोणार्ककुशमल्लिकां ॥
तुलसी माधवी चंपा काशा यापामार्गदूर्वकं ॥५६॥ बृहतीकुटजादीनि यथालब्धानि
पूजयेत् ॥ निवेदयेत्सुगंधीनि माल्यानि विविधानि च ॥५७॥ धूपं कालागरुं देवि दीपं
च घृतसंयुतं ॥ अथ पायसनैवेद्यं सघृतं सोपदंशकं ॥५८॥ मोदकापूपसंयुक्तं शार्क
रा घृतपाचितं ॥ मधुनोक्तं दधियुक्तं जलतांबूलसंयुतं ॥५९॥ पायसेनैव हविषा जुहुया
ज्जातवेदसि ॥ प्रतिष्ठाप्य हुताशं च भवाद्यैरष्टनामभिः ॥६०॥ ततः शिवरुद्रं तेन हि नीराज
नमथाचरेत् ॥ छत्रं च चामरं दिव्यदर्पणं व्यजनं तथा ॥६१॥ तौर्यत्रिकं तत्त्वगीतं दद्याद्भक्त्याथ
शांभवे ॥ समर्चइत्वा विधिवन्मंत्रैर्वैदिकतांत्रिकैः ॥६२॥ यद्यशक्तः स्वयं निस्त्रो यथाविभवमर्चये
त् ॥ भक्त्या पुष्पेणोदकेन प्रदोषे तुष्यते शिवः ॥६३॥ अथांगभूतास्सकलां गणेशादीन्प्रपूज
येत् ॥ ऋक्सामयजुषाथर्वस्तुतिभिः पूजयेत्सभां ॥६४॥ प्रदक्षिणानमस्कारैर्नर्तनैश्चप्र

सादयेत्॥ स्तुवीतैवं विरूपाक्षं सप्रदोषमहेश्वरि।६५॥ जयजयविश्वविधानदक्षशिवाक्षज
यजयसर्वसुराधिनाथ॥जयजयचारुशशांकमौलि जयजयकालकलाविहीनदेह॥६६॥
जयजयकामहरांतकारे जयजयसामगणादिगण्यमूर्ते॥जयजयपुण्यफलप्रदोरुविश्वमू
र्ते जयजयसोमसुपांगवन्हिदृष्टे जयजयनीलगलप्रसीदशंभो॥जयजयदुरितांधकासुरारे
जयजयविष्णुहराजमग्यमूर्ते॥६८॥ जयजयजन्हुजटोरुशोभिमौले जयजयगरनील
कंठचारुकंठ॥जयजयपंकजासनाब्जनेत्रपूज्य जयजयपातकसंततिप्रणाशहेतोः॥६९॥
जयजयकामितसर्वदःस्त्वमीश जयजयविश्वपतेप्रसीदमां॥जयजयसामजचर्मवस्त्रशं
भो अन्नणं मां कुरु देवमानुषादिमौर्गे॥७०॥ आद्योवाथ दरिद्रोवा स्तुवीतैवं महेश्वरं॥तस्य
यच्चिंतितं कामं प्रयच्छति महेश्वरः॥७१॥ न तस्य पातकभयं न दारिद्र्यगदाद्भयं। भिषकूप
तिपदांबुजं वः प्रपन्नो यांति सद्गतिं॥७२॥ एवमाराधयेद्देवं प्रदोषे लिंगपूजनं॥ब्राह्मणान्
शांभवाश्चैव भोजयेद्द्वादशावरान्॥७३॥ दक्षिणाभिश्च तांबूलैः गंधपुष्पाक्षतादिभिः॥
शिवपूजेयमाख्याता सर्वाभीष्टफलप्रदा॥७४॥ सर्वपापक्षयकरी ऋणदारिद्र्यनाश
नी॥ ॥ईश्वर उवाच॥ ॥कैलासे त्रिजगज्जनित्रि सुमहान्नादस्तुगर्नीभ्राजत्प
न्नगमौलिरत्नसुमहामालालसद्दक्षसं॥ नंदिस्कंदगणेश्वरोद्धतमहानो यंत्रिकाणां स्वनैः श्रीशिव
कैलासेश्वरपूजयात्रिभुवनं विस्मापयन्नाश्चितः॥७५॥ प्रदोषे जुशोषाहिभूषाविशेषैर्वि

बंधारयंतं सुपुषोरुनेत्रं॥ सदोषाकरशाकार येषार्धगात्रं मनोक्षेणसंपूजयंतो ये लदाभस्म
भूषा॥७६॥ प्रदोषपूजारहितासदोषाद्दुःशोकजाल जनुषोवरमानुषारन्ते॥ विद्वावकाभुवि
भवंतिसुसौख्यसख्यनिद्रानिनंद्रितमनस्तनुवोदरिद्राः॥७७॥ ॥ इतिश्रीशिवरहस्ये
महादेवाख्येएकादशांशेशिवगौरीसंवादेत्रयोदशीप्रदोषपूजाकथनंनामत्रिंशोध्यायः॥३०॥
॥ श्रीमहादेवायनमः॥ ॥ श्रीमहादेवउवाच॥ ॥त्रयोदशीप्रदोषेभ्योमंदवारेणसंयुतः॥
प्रदोषोमेमहाप्रीतिदायकोलोकनार्चने॥१॥ शनिप्रदोषेसंप्राप्ते शुक्ले कृष्णे यथाशिवे॥प
क्षद्वयेत्रयोदश्यांनिराहारोभवेदथ॥२॥ ब्रह्मचारीगृहीभिक्षुर्वनीचनरनार्यपि॥ नित्यं
नैमित्तिकंकाम्यमितित्रेधास्यसंस्थितिः॥३॥ ये यथाकामयेद्वापिद्वादशाब्दं समाचरेत्॥उ
द्यापनंचास्यशिवे सोमवारसमोविधिः॥४॥ कालोहिमाघमासोस्यश्रावणेवामहेश्वरि॥
शनिप्रदोषयोगेनयदसंपद्यतेनदा॥५॥ कुर्यादुद्यापनंचास्य आजन्मीनेवमाचरेत्॥
विधिमस्यप्रवक्ष्यामिपूजायांशृणुशैलजे॥६॥ नद्यादौचनरःस्नात्वाशुक्लवासाजितेंद्रियः॥
प्रक्षाल्यपादावाचम्यपतवाक्शुद्धमानसः॥७॥ अग्निरित्यादिभिर्मंत्रैर्भस्मनोद्धूल्यवि
ग्रहं॥ त्रियायुषत्रिपुंड्रांकोरुद्राक्षोरुसरावृतः॥८॥ घटित्रयावशेषेणनित्यकर्मसमा
प्यच॥ लिंगस्यपार्श्वभागात्यकुर्यात्संकल्पपूर्वकं॥९॥ संपाद्यपूजासंभारंकालरुद्धंचयय
च्छिवे॥ त्रयोदश्यांदिवास्थित्वानिराहारोमहेश्वर॥१०॥ नक्तंभोक्ष्यामिदेवेशरात्राहिमांक्रु

पयाहर॥ सर्वपापक्षयकरो ऋणदारिद्र्यनाशकः॥ दुर्लभः शनिवारेण युक्तो मुक्तिप्रदो नणां॥ प्रदोषो दुर्लभतरो नत्र पूजापि दुर्लभा॥१२॥ ॥देव्युवाच॥ ॥भगवन्केन विधिना समभ्यर्च्य महेश्वरं॥ प्रदोषे वास्तदोषे तेशनियुक्ते शिवार्चकः॥१३॥ सर्वपापविनिर्मुक्तः सर्वान्कामानवाप्नुयात्॥ ॥शिव उवाच॥ ॥सायं संध्याप्रदोषस्तु त्रयोदश्यां शनेर्दिने॥ लब्धश्चेच्छुक्लकृष्णे वा शिवं दृष्ट्वा महाफलं॥१४॥ स्थावरे जंगमे वापि लिंगे तुंगे महेश्वरि॥ उदये द्वादशीकिंचित्प्रदोषे च त्रयोदशी॥१५॥ शिवार्चनेन यत्पुण्यं तत्स्यु धर्म्यं नान्यधर्मतः॥ वेदवादैर्न योगैर्वा यागैर्वा किं तपस्यया॥१६॥ शनिप्रदोषे लिंगार्चा एकबिल्वप्रपूजनात्॥ शनिप्रदोषसंप्राप्य प्रातः कृत्यं समाप्य च॥१७॥ स्नात्वा नद्यां तटाके वा धौतवासा जितेंद्रियः॥ उपास्य पश्चिमां संध्यां भस्मरुद्राक्षभूषणः॥१८॥ शिवागारं प्रविश्याथ वितानसमलंकृतं॥ पुष्पमालावृतं चारु नौर्यत्रिकनिनादितं॥१९॥ उपविश्यासने शुभ्रे प्राणानायम्य वाग्यतः॥ भूतशुद्धिं ततः कृत्वा मातृकाक्षरपूर्वकं॥२०॥ मंत्रन्यासं ततः कृत्वा शिवपीठं समर्चयेत्॥ आधारशक्तिं पूजां च कुर्यादागममंत्रतः॥२१॥ उमामहेश्वरं लिंगे स्थाप्य पीठे मनोरमे॥ पंचब्रह्मविधानेन देवं ध्यायेद्विचक्षणः॥२२॥ मूलमंत्रात्मिकं देवं सविकासहिते शिवं॥ ध्यात्वा चावाहयेद्देवं पद्मस्थं पद्मसंनिभं॥ ॥२३॥ चतुर्भुजं प्रसन्नास्यं वरदाभयपाणिनं॥ अक्षमालाव्रतकरं चंद्ररेखाविभूषितं॥२४॥ नीलकंठं त्रिनेत्रं भ

त्वांचमंद्रामपार्श्वगां॥ सोमधामाननांचारुचंचच्चंद्रकलाधरां॥ २५॥ प्रसन्नास्यांमुदंनींच
नांडवंपरिमंडितां॥ सर्वाभरणशोभाढ्यांवासः स्रग्गंधभूषितां॥२६॥ एवंध्यात्वार्चयेद्देवं
श्रद्धयापरमेश्वरं॥ अत्रागच्छमहादेवपार्वत्यासहशंकर ॥२७॥ गृहाणमत्कृतांपूजा
मासनंपरमंशुभं॥ भवायेतिशिवेपाद्यंवामायेतितथाचमं॥२८॥ अर्घ्यंसद्योतिमंत्रेणस
पुष्पंविनिवेदयेत्॥ अघोरेणशिवेस्नानंवस्त्रंतत्पुरुषेणहि॥२९॥ ईशानेतिचमंत्रेणउ
पवीतंप्रकल्पयेत्॥ यज्ञोपवीतमंत्रेणदद्यात्पुनरयामसं॥३०॥ गंधमाल्याक्षतांदद्यान्न
मःसोमायमंत्रतः॥ त्र्यंबकेतिमंत्रेणबिल्वपुष्पाणिचार्पयेत्॥३१॥ इमारुद्रेतिमंत्रे
णअक्षतांश्चसमर्पयेत्॥ मानस्तोकेतिधूपंचदीपंमानेपितेनेतिच॥ ३२॥ यच्छंचयोश्चमं
त्रेणनैवेद्यंदापयेच्छिवे॥ परीणेतिपरीवारान्पूजयेन्नियतव्रतः॥ ३३॥ क्षमार्पंभास्करं
विष्णुंजयंविजयमेवच॥ दुर्गांगणपतिंचैवयजेत्प्राच्यादियोगतः॥३४॥ नंदीशंक्षेत्र
पालंचचंडेशंभैरवंतथा॥ कैलासादीन्यथाद्रींश्चकपालंशूलमेवच॥३५॥ अथसंपूज्यवि
धिवन्मदग्रेवृषभेश्वरं॥ स्तुहिश्रुतेतिमंत्रेणवृषंमेधर्मरूपिणं॥ ३६॥ मीढुष्टमेतिचस्कं
दंगणानांत्वागणाधिपं॥ सर्वोपचारैर्देवस्यदेव्याःसहसमर्चनं॥३७॥ परिवारान्समभ्य
र्च्यतन्मंत्रैर्विशेषतः॥ महानैवेद्यमीशायदेवस्यत्वेतिमंत्रतः॥३८॥ प्रणामप्रक्रमंचैवनी
राजनपुरःसरं॥ छत्रचामरदानंचघंटानोयत्रिकंशिवे॥३९॥ दद्यात्प्रसादयेद्देवंक्षम्यना

मिनिसप्तमे॥ होमंचवायनः कुर्यात्प्रतिष्ठाप्युहुताशनं॥४०॥ अष्टोत्तरसमिद्भिश्च बेल्वा
ज्यचरुणाभुशनं॥ शतरुद्रेणजुहुयाद्वात्मोप्यत्यपिस्विष्टकृत्॥४१॥ ततस्तुवीतदेवेशंशंक
रंशशिशेखरं॥भवायभवनाशायमहादेवायधीमहि॥४२॥ रुद्रायनीलकंठायशर्वायशशि
मौलिने॥उग्रायोग्राघनाशायभीमायभयनाशिने॥४३॥ ईशानायनमस्तुभ्यंपशूनांपतये
नमः॥ यथासमस्तभयदः पशूनांपाशमोचकः॥४४॥ तथात्वेननमेतुष्टः ऋणदौर्भाग्यनाश
कः॥ नमोगौर्यैमहादेव्यैभवान्यैतेशिवेनमः॥४५॥ शिवप्रदायैशर्वाण्यैरक्षिस्थितयंतेह
नवे॥नमोस्त्वार्तिविनाशिन्यैतुभ्यंसर्वभयापहे॥४६॥ तुभ्यमानंदरूपिण्यैनमः कमल
लोचने॥विद्यायैवेदमात्रेचवेदशक्तिस्वरूपिणी॥४७॥ अंबिकेतेनमोनित्यंममास्तुव
रदःशिवः॥ इत्युपस्थायमांदेविपुनः कुर्यात्प्रदक्षिणां॥४८॥ कृत्वासव्यापसव्येनप्र
दक्षिणविधानतः॥शतमष्टोत्तरंकृत्वाप्रणम्यचपुनःपुनः॥४९॥ सव्यापसव्यमानेन
सोमसूत्रंनलंघयेत्॥ शनैः शनैः क्रमात्कुर्यात्त्वरालस्यादिवर्जितः॥५०॥ देवंसंमुखमः
कृत्वाब्रासणांचविशेषतः॥प्रदक्षिणंक्रमात्कुर्याद्बषणसहितंशिवं॥५१॥ यानिकानि
चपापानिजन्मांतरकृतानिच॥ तानितानिविनश्यंतिप्रदक्षिणपदेपदे॥५२॥ एवंप्रदक्षि
णंकृत्वानमस्कृत्यपुनःपुनः॥ गणइत्यापदंभूयोतत्कोटिगुणितंभवेत्॥५३॥ अंगप्रद
क्षिणादेविततः कोटिगुणोत्तरा॥ प्रतिप्रदक्षिणंकृत्वामासांगंप्रणमेद्भुवि॥५४॥ शिव

स्याग्रे समे देशे भूमिसंलग्नमस्तकः॥ प्रदीनुविधिवद्दद्यादर्घमष्टांगसंयुतं॥ गोक्षीरं च कुशाग्राणि घृतं दधि च तंडुलान्॥ सिद्धार्थकास्तथा दुर्वाः गंधपुष्पाक्षतास्तथा॥ ५६॥ अर्घो ष्टांग इति प्रोक्तः तदभावे सुमैर्युतं॥ पंचामृतं पंचगव्यं गंधपुष्पकुशोदकं॥ ५७॥ फलजाल रसं चापि घनाभ्यंगं तु कारयेत्॥ भयरोगादिदारिद्र्यं पापं क्षुदपमृत्यवः॥ ५८॥ ऋणशोकं मनस्तापं नश्यंतु मम सर्वदा॥ मंत्रेणानेन दत्वार्घ्यं त्रिवारं प्रार्थयेच्छिवं॥ ५९॥ प्रसीद देवदेवेश प्रसीद परमेश्वर॥ प्रसीद सोम सर्वज्ञ प्रसीद करुणाकर॥ ६०॥ एवं संप्रार्थ्य देवेशमुमां चापि ततो व्रती॥ शनिप्रदोषयोगे मे व्रतं संपूर्णतामियात्॥ ६१॥ प्रसादं कुरु देवेश येन मुच्ये ऋणार्णवात्॥ जन्मांतरसहस्रेषु यदृणं च कृतं मया॥ ६२॥ देवं पित्र्यं मानुषायं मुच्येत् ऋणबंधनात्तु यात्॥ अनृणोहं भविष्यामि धनाढ्योहं भवानि च॥ ६३॥ इत्थं संप्रार्थ्य देवेशमाचार्यं पूजयेच्छिवे॥ होमशेषं प्रदापयेच्च गां दद्यात्पयस्विनीं॥ ६४॥ अरोगां च सवत्सां च कांस्य दोहनसंयुतां॥ अणुमात्रप्रदानेन प्रदोषे च शनेर्दिने॥ ६५॥ इहामुत्र क्षयं पुण्यं भोगानाप्नोति शाश्वतान्॥ ततो रषभमभ्यर्च्य गंधपुष्पाक्षतादिभिः॥ ६६॥ धूपदीपौ च नैवेद्यं तांबूलं श्वेतवस्त्रकं॥ वृषाय धर्मरूपाय शिवाय शिववर्मजे॥ ६७॥ इत्यर्घ्यं प्रार्थ्य दत्वा तु प्रार्थयेत्तं यतव्रतः॥ अंडं स्पृष्ट्वा जपेन्मंत्रमिमं तस्य रषभस्य च॥ ६८॥ शृंगमध्ये शिवं दृष्ट्वा समाहितमना व्रती शिवे॥ धर्मत्वं वृषरूपेण जगदानंदकारकः॥ ६९॥ अष्टमूर्तेरधिष्ठानमतः पाहि सनातन

मघान्॥पृथिव्यांयानितीर्थानिसागरांतानियानिवैं॥७०॥अंडमाश्रित्यतिष्ठंतिप्रदोषे
गोवृषस्यच॥कुर्यातद्दर्शनंस्पर्शंशाशंकरस्यविलोकनं॥७१॥प्रदोषेशंकरंदृष्ट्वावृषशृंगां
तरेशिवे॥ब्रह्महत्यायुतंनश्येद्भुक्तिंमुक्तिंचविंदति॥७२॥एवंदृष्ट्वातुभुंजीयाँच्छांभवैःक्षा
रवर्जितं॥व्रतंसमर्प्यदेवायमंत्रेणानेनशांभवी॥७३॥व्रतेनानेनचीर्णेनप्रसन्नोभवशंकर॥
त्वद्भक्तिपरमंज्ञानंमुक्तिंचैवप्रयच्छमे॥७४॥अज्ञानाज्ज्ञानतोवापियन्न्यूनंपूजनंतव॥ज्ञा
निप्रदोषयोगेस्मिन्तदस्तुप्रीतिकृत्तव॥७५॥एवंकृत्वाव्रतंभक्त्यासंपूज्यशिवमंबिकां॥
सर्वज्ञत्वमवाप्नोतिमिमंलोकंसविंदति॥७६॥इदंव्रतंसमाकृत्वायःकरोतिजितेंद्रियः
॥महत्फलमवाप्नोतिऋणकोट्याविमुच्यते॥७७॥एकविंशतिकृत्वस्तुव्रतमेतत्सुदु
र्लभं॥पुत्रादीन्लभतेसद्योभुक्तिंमुक्तिंचविंदति॥७८॥व्रतसंपूर्णतार्थायगामेकांवृषभं
शिवे॥शिवायवाद्विजायायदत्वाचाज्ञीःप्रयोजयेत्॥७९॥ ॥ईश्वरउवाच॥ ॥अपिप्र
हीणस्यसमस्तलक्षणैःक्रियाविहीनस्यनिकृष्टजन्मनः॥प्रदक्षिणीकृत्यत्र्यांकशेखर
रंप्रयास्यतःकस्यनसिद्धिरग्रतः॥८०॥त्र्यक्षद्विरूपाक्षपदंप्रदोषेनान्यंसुरंचिंतयतेसम
धन्यतः॥मान्यःसमामान्यनरोपिवाशिवेनन्येनचान्यःकिलशैलकन्ये॥८१॥संतप्रपद्यते
निवसेत्समाशातेमांविष्णुतुल्यंमनुतेप्रदोषे॥सदोषएवेहभवेत्पातकीसब्रह्महत्यायु
तपापकंनरः॥८२॥सदर्शनंसंस्तवमंबिकेमुदाप्रदोषकालेषुसुरेतराणां॥कुर्वन्ब्रह्महत्या

तकमभ्युपैमि नस्मात्तदानान्यमनाभवेत्॥ ८३॥ दधिक्षीरमध्वाज्यसशर्कराभिः शिवेनारि
लांभ्रंजंबीरसारैः॥ सुगंधोदकैः पुष्पबिल्वादिभिर्मामसमभ्यर्च्यमुक्तः शिवेधूपदीपैः॥ ८४॥
वरान्नैः शिवेपायसापूपशाकैः सुतांबूलनिराजनच्छत्रदानैः॥ प्रणामस्तवप्रक्रमैर्नृत्तगेयैः
र्चरेश्चामरैर्वीजकोमत्प्रियस्यात्॥ ८५॥ ब्रह्मांडमंडलगतानिसुतीर्थखंडान्यायांतितत्र हृद्य
वरांडगतानि तत्र॥ श्रंगांतरेनुनिवसेदयधर्मजालं तस्मात्प्रदोषसमयेक्षणकृत्स्प
शेन्मां॥ ८६॥ भूमौपुत्रकलत्रमित्रसहितः सत्रानिराज्यादिभिः॥ यशारोग्यभवंतिधा
न्यधनकैः गोभिश्चनागाश्वकैः॥ ८७॥ प्रासादांबरभूषणंममशिवेप्राप्यंप्रसादोद्भयात्॥
तस्मिंतांप्रदिशाभिसंपदधिकांमुक्तिंप्रदोषार्चके॥ ८८॥ आनंदांबुजकंदरपणिस्थितं
मंदप्रदोषममंदरोगममालयासुमगणैःवंदारवृंदोत्तमाः॥ सानंदांबुधिवीचिमग्न
हृदयास्तंपूजयंतिध्रुवं कुंदाभमंदमरंदभिंदुशाकलालंकारभीशेतदा॥ ८९॥ शशिखं
डशिखंडखंडपशुविधिर्मुंडामलकुंडलीशमालंनगकोदंडधरंत्वखंडबिल्वैः प्रक
टोच्चंडनतांडवशिवेर्च्येनेशमुः॥ ९०॥ शतमखमुखमुख्यलेखजालाः सुमुखाएवनमं
तिशंकरांघ्रिं॥ सकलाघौघहरेप्रदोषकालेप्रथममथायल्लकलिंगलोकनप्रहृष्टाः॥ ९१॥
॥ इतिश्रीशिवरहस्येमहादेयाख्येएकादशांशेशनिप्रदोषमहिमानामएकत्रिंशोध्या
यः॥ ३१॥ ॥ श्रीमहादेवायनमः॥ ॥ईश्वरउवाच॥ ॥ शिवरात्रिव्रतंपुण्यंममैवप्रीति

दं परं॥ शिवलिंगतयोद्भूतः तस्यां रात्रौ महेश्वरि॥१॥ ब्रह्मविष्णोर्बोधनार्थे चतुर्दश्यां
निशि प्रिये॥ माघे कृष्णचतुर्दश्यां सोमपानार्द्र ऋक्षके॥२॥ सान्निध्ये दुर्लभं त[illegible] योगयु
क्ता विशेषतः॥ माघ कृष्ण चतुर्दश्यां पूज्योहं लिंगमध्यमे॥३॥ रात्रौ यामचतुष्कं वै अनि
द्रोपोषणादिभिः॥ नैत्यकं व्रतमेतद्धि सर्वेषां सर्वदा शिवे॥४॥ चतुर्दश्यां र्ध घटिका यदि
तस्यां गतां भवेत्॥ प्रदोष पूजा तत्रैव कार्या सा महदादिमे॥५॥ निशीथसमये ग्राह्या माघकृ
ष्णचतुर्दशी॥ तस्यां समस्तपुण्यानि तीर्थान्यायतनानि च॥६॥ स्थावरे वा चरे लिंगे संक्रमे
ध्यति पार्वती॥ उपवास प्रभावेन अतंद्र निशि जागरात्॥७॥ चतुर्यामार्चनाद्देवि बिल्व
पत्रेण केवलं॥ अक्षय्यं पुण्यमाप्नोति शिवसायुज्यमश्नुते॥८॥ शिवे मे शिवरात्रिं यः पू
जाजागरणैर्नयेत्॥ अखंडितव्रती सस्यादाखंडलशतं वसेत्॥९॥ शिवलोके सर्वभो
गैः सुरासुरनमस्कृतः॥ नित्यं च काम्यकं देवि शिवरात्रिव्रतं मम॥१०॥ मम्मेव भक्तो यो दे
वि शिवरात्र्यार्चको भवेत्॥ पूजाजागरणोपेता रात्रौ यामचतुष्टये॥११॥ गणत्वमक्षयं त
स्य मम कैलासमूर्धनि॥ वर्षे वर्षे महादेवि नरनार्यो हि द्विजात्यजाः॥१२॥ शिवरात्रौ महादे
वं नित्यं भक्त्या यजंति हि॥ देवा विधींद्रविष्णवाद्याः सदा राक्षासुरा द्विजाः॥१३॥ शिव
रात्र्यां महादेवं पूजयंति दृढव्रताः॥ शिवरात्रिव्रतादेवि त्रिः सप्तनपरात्परं॥१४॥ न पूज
यति भक्तेशं रुद्रं त्रिभुवनेश्वरं॥ योन्नभुक् क्रिमिभुक् स स्यात् अनिद्रो जागरो भवेत्॥१५॥

नानायोनिसहस्रेषुभ्रमतेसोधमोनरः ॥ द्वादशाब्दिकमेवंस्याच्चतुर्दशाब्दिकंतुवा ॥ १६ ॥ यावज्जन्ममहापुण्यंकुर्वन्महदणपोभवेत् ॥ माघकृष्णचतुर्दश्यांभोमः सोमःप्रशस्यते ॥ १७ ॥ भौमवारेणसंयुक्ताकृष्णांगारचतुर्दशी ॥ रथार्द्धपातयुक्ताचेच्छिवयोगंसुदुर्लभः ॥ १८ ॥ सजन्मायुतपापघ्नानस्यबिल्वैकपूजनात् ॥ शिवयोगस्ययोगोवैनद्भरदुत्तमोत्तमं ॥ १९ ॥ त्रयोदशीकलाप्येकामध्येचैवचतुर्दशी ॥ अंतेचैवत्रिनीवालीत्रिस्पृत्र्यांचशिवार्चकैः ॥ २० ॥ प्रदोषव्यत्कलाव्याप्तौपरेबासंप्रशस्यते ॥ पूर्वापरेन्हिदेवेनिशीथव्याप्यगोत्तमा ॥ २१ ॥ जागरेचोपवासंचतस्यांकुर्याच्छिवार्चकः ॥ ॥ देव्युवाच ॥ ॥ शिवरात्र्यांमहादेवकथमर्च्यंतिसाधकः ॥ २२ ॥ कोविधिस्तस्यनियमः तत्सर्वंवदमेविभो ॥ ॥ महेश्वरउवाच ॥ ॥ कथयामिविधिंतेघशिवरात्रौसमर्चने ॥ २३ ॥ शृणवपर्णनप्रकाश्यंरहस्यंपरमंमम ॥ स्थावरेवाचरेवापिमद्बाणस्फटिकेपिच ॥ २४ ॥ धातुजेवाक्षयाजेपूजायामचतुष्टयं ॥ संपाद्यपूजासामग्रीशिवक्षेत्रे ग्रहेपिवा ॥ २५ ॥ प्रातःकृत्यंचनिर्वर्त्यदुष्टालापविवर्जितः ॥ स्नात्वानद्यांतटाकेवाधौतवस्त्रधरःशुचिः ॥ २६ ॥ सितभस्मत्रिपुंड्रांकःरुद्राक्षाभरणान्वितः ॥ गोमयेनोपलिप्यशिवाल्यांद्दिमंडितां ॥ २७ ॥ वितानमंडपैर्युक्तांवेदिकांस्तरणावृतां ॥ कल्पयेत्पीठमुत्कृष्टंसमासीनःकुशासने ॥ पंचामृतंफलरसंपंचगव्यंसुमान्यपि ॥ बिल्वपत्रार्ककह्लारनवनीलोत्पलानिच ॥ २९ ॥ दमनोशीरकादीनिसंपाद्यानुचचंदनं ॥

धूपदीपैःफलानीवेद्यंवायतोहविरेवच।।३०।। तांबूलंचसुवासांसिसंपाद्यानियमान्वितः।। संकल्पंचशिवस्याग्रेध्यायन्नामेवकेवलं।।३१।। जागरेणोपवासेनपूजांयामचतुष्टये।।करोमिनवदेवेशगृहाणावासमन्वितः।।३२।।आचम्यप्राणानायम्यजपेत्पंचाक्षरंशिवे।।सांगंन्यासंसहस्रमेयामेयामेथपूजकः।।३३।।ध्यायेद्देवंविरूपाक्षंशिवरात्र्यांशिवार्चकः।। देवंनित्यंमहेशंरजतगिरिवशंचारुचंद्रावतंसंरत्नाकल्पोज्वलांगंपरशुमृगवराभीतहस्तोतरंग।।पद्मासीनंसमंतात्स्तुतममरगणैर्व्याघ्रकृत्तिंवसानंविश्वाद्यंविश्ववंद्यंनिखिलभयहरंसर्वपापादिहारं।।३४।। ध्यात्वाबाह्यमहालिंगसपुष्पांजलिरीश्वरि।। पाद्यार्घ्याचमनादीनिदद्यात्पंचाक्षरेणहि।।३५।। पंचामृतैःपंचगव्यैःविविधैःफलरसैरपि।। गंधपुष्पकुशांबूनिदद्यात्रुद्रेणभामिनि।।३६।। घृतदीपावलींदद्याद्धूपंगुग्गुलसंयुतं।।कुर्याद्धाराभिषेकंमेरुद्रेकादशसंख्यया।।३७।। तीर्थैस्त्रिकैःतदादेवीशिवरात्र्यांशिवेमुदा।। सकुचैस्तर्पयेद्देवंतेभवाद्यष्टनामभिः।।३८।। किंचिद्दत्वायनैवेद्यंपरिमज्याथवाससा।। पीठेसंस्थाप्यदेवेशंगंधपुष्पाक्षतैर्यजेत्।।३९।। भस्मनाबिल्वकुसुममालिकाभिर्महेश्वरि।। भूषणैर्भूषयेद्दीपधूपैःकल्हारचंपकैः।।४०।। मंदारैःकनकैःश्वेतवनथादमनकादिभिः।। शताष्टनामभिर्वापिनामसाहस्रकेणवा।।४१।। मूर्तयोष्टौशिवस्यैताःपूर्वादिक्रमयोगतः।।पूजयेत्स्कंदनंदीशंगणाचंडेश्वरादिकान्।।४२।। उमांचभवपार्श्वेचपूजयेदुपचारकैः।। शर्वायक्षितिमूर्तयेभवायजलमूर्तये।।४३।।

रुद्रायतेजोरूपायउग्रायपवनात्मने॥भीमायाकाशरूपाययाज्यायपशुपायच॥४७॥म
हादेवायसोमायईशसंधीत्मनेनमः॥इतिसंपूज्यदेवेशमष्टमूर्तैपिनाकिनं॥४८॥गणे
शंभैरवंदुर्गांस्कंदनंदीश्वरावुभौ॥चंडेशंचगणेशांश्चतत्तन्मंत्रैर्यजेच्छिवां॥४९॥मूलमंत्रे
णतांशक्तिंगंधपुष्पाक्षतादिभिः॥धूपंदीपंततोदद्यान्नैवेद्यंभक्ष्यभोज्यकं॥५०॥तांबूलं
फलजालंचपानीयंमुखवासकं॥नीराजनंततोदद्याच्छतसाहस्रचार्तिकं॥५१॥चामरंदर्प
णंछत्रंवितानंध्वजमेवच॥व्यजनंभाजनंदेविदद्याद्विजमवंचयन्॥५२॥नमेत्प्रदक्षिणं
स्तोत्रंकृसामाथर्ववयाजुषां॥कुर्याद्वृतंगीतवाद्यवीणावेणुमृदंगकान्॥५३॥निवेदइत्वा
देवायस्तोत्रमेतत्पठेन्नरः॥विश्वाधिकत्रिदशनायकदेवदेव॥५४॥वंदारुवंदितपदाब्जम
हेशशर्व॥पाहिप्रंवयाशिकलामलचारुमौलेमामालोकभववारुधिवीचि.लग्नं॥विश्वेशविश्व
जनकाव्ययसोमधामभूमावशेषमहिमागमवामदेव॥५५॥कामांगनाशनगराशनकाल
कालमांपाहिसंसृतिजगाद्दनमाशुभिशा॥कंदर्पदर्पहरसर्पविभोभितांगगर्जासनस्थगज
चर्मपरीतदेह॥कर्तात्वमेवजगतांपरमेशहर्तापालात्वमीशपरिपाहिभवाब्धिमग्नं॥५६॥
हविश्वनाथगणनाथसुमन्मथारेमल्लायहृत्तमहाघचयाव्ययचंद्रचूड॥पाहीशमामकाधि
याभचपात्रालग्नमग्नंमहाभवसमुद्रसुपंकिलर्मा॥५७॥त्र्यक्षाक्षयप्रफलदाव्ययविभोदक्षा
दिदीक्षापहउक्षोर्ध्वगगनामिनमहावीक्षादिरथ्यासुरकृक्षदिस्थितपक्षपातसुदृशासंवी

क्षमामीश्वरपक्षि द्रिमि यथा हृ पूजितपदाम्भत्यक्षमुक्तिप्रद॥५८॥ इत्थं यामचतुर्थेवं संस्तुवी
न महेश्वरं॥ प्रत्येकमर्घ्यं दद्याद्वै सपुष्पं विधिमिश्रितं॥५९॥ नमः शिवाय शांताय सर्वपापहरा
यच॥ शिवरात्रौ मया दत्तमर्घ्यं प्रीतिकरस्तुते॥ मया कृतान्यनेकानि पापकानि च शंकर॥ गृहाणा
र्घ्यमुमाकांत शिवरात्रौ प्रसीद मां॥ दुःखदारिद्र्यभावैश्च दग्धोहं पार्वतीपते॥६०॥ मामर्घ्यदाना
त्सुप्रीतः सुखिनं कुरु शंकर॥ मया कृतान्यघौघानि हरत्वं करशं कुरु॥६१॥ शिवरात्रौ ददाम्यर्घ्यं
शिवरात्रौ प्रसीद मे॥ प्रीतमहर भवं स्यादर्घ्यदानात्सुप्रसीद नः॥६२॥ स्विनं कुरु शंकर॥६२॥ दत्वा
विचक्षणः॥६२॥ दंडवत्प्रणतो भूत्वा स्तुत्वा दत्त्वार्घ्यमादरात्॥ एकाग्रमणतो भूत्वा ततो देवं क्षमा
पयेत्॥६३॥ अंगहीनं क्रियाहीनं विधिहीनं महेश्वरः॥ पूजितोसि मया देव तत्क्षमस्व घृणा
निधे॥६३॥ यच्चाप्युपहतैः पुष्पैः खशासे भावदूषितः॥ केशकीटापविद्धैश्च पूजितोसि मया
प्रभो॥६४॥ अन्यथासक्तचित्तेन क्रियाहीनेन वा विभो॥ निद्रालस्य हतांगेन सुन्क्षाम्भफ
लभक्षणैः॥६५॥ नामसेन च भावेन हीनमंत्राक्षरेण च॥ पूजितोसि मया देव तत्सर्वं क्षम्य
तां मम॥६६॥ व्रतसंपूर्णतां यातु फलं चाक्षय्यमस्तु ते॥ एवं स्तुत्वा नमस्कृत्य पूजास्थानं विस
र्जयेत्॥६७॥ नैवेद्यादि ततः सर्वं भस्माभायनिवेदयेत्॥ परेद्युकृतकर्माय संपूज्य शिवमव्य
यं॥६८॥ ब्राह्मणान्भोजयेच्छक्त्या गंधपुष्पाक्षतादिभिः॥ एवमीशार्चनं कुर्यान्नैत्यकं प्रतिवर्षिके
॥६९॥ माघकृष्णचतुर्दश्यां सर्वकामफलप्रदं॥ चतुर्विंशद्वादशाब्दं कुर्यादुद्यापनं बुधः॥

॥७०॥ आजन्मीनुनन्तुर्यात्सोक्ष्मयां लभते गतिं॥ माघ कृष्णचतुर्दश्यां पूज्य लिंगपिनाकि
नः॥७१॥ चतुर्दशी दर्शयुक्ता अष्टमी नवमीयुता॥ पारणं तत्र कर्त्तव्यं रोद्रेर्क्षे वा पुनर्वसो॥७२॥
कलशादशवाष्टौ वा सोदकानभिपूर्यच॥ गंधपुष्पाक्षतफलैऋत्विजोष्टौ निमंत्रयेत्॥७३॥
आचार्यं वरयेदेकं ब्राह्मणं वेदपारगं॥ गणेशं स्कंदनंदी शं कालीं भद्रं सरस्वतीं॥७४॥ वृषभं
चामुंडां देवी कलशेष्वभिनो यजेत्॥ मृत्युंजयेन मंत्रेण वन्हौ हुत्वाशताष्टकं॥७५॥ चरुणा
सघृतेनैव ब्राह्मणां भोजयेत्ततः॥ यथाशक्त्या धेनुवस्त्रां हिरण्यं च दक्षिणां॥७६॥ ऋत्वि
ग्भ्यो ह्याचार्याय दद्याद्युद्यापनं स्मृतं॥ एतद्धि संग्रहं मेवं कुर्याद्युद्यापनं शिवे॥७७॥ शिवरा
त्रिव्रतस्यास्य सर्वकामप्रपूरणं॥ ॥ईश्वर उवाच॥ ॥ भूतादि मथभूतनाथ मगजे माध्यां
ममर्क्षे नरो पापोघात्त्वबिभेतिशंकरपदध्यानानुरक्तः सदा॥ मुक्तः संसृतिघोरपाशात्तद
मांशां सर्वदानाधिकां दत्वाय त्फलमाप्नुयात्सुनिशीने तत्राप्यमामेत्तिच॥ ॥ इतिश्रीशि-
वरहस्ये महादेवाख्ये एकादशांशे महाशिवरात्रिव्रतकथनं नाम द्वात्रिंशोध्यायः॥ ॥श्री
महादेवाय नमः॥ मासि मास्यपि देवेशि कुर्याद्वै च चतुर्दशीं॥ सा मासशिवरात्रीति कथिताकृ
ष्णपक्षगा॥१॥ चैत्रादि कृष्णपक्षेषु तत्तन्मासि चतुर्दशीं॥ प्राप्य संपूजयेद्देवं लिंगमूर्तिं
सदाशिवं॥२॥ रात्रौ यामचतुष्केषु पूजयेद्बिल्वपत्रकैः॥ एकभुक्तेन नक्तेन सोपवासेन वा शिवे॥
॥३॥ तत्र कृष्णचतुर्दश्यां सायं शौचं निवर्त्यच॥ नद्यां वा देवखाते वा स्नानमंत्रैः कुशैर्युतः॥४॥

धनवासाः भस्मधुनास्त्रिपुंड्रोक्षरो भवेत् ॥ संशोध्य कलशं शुद्धं स्वयमंबु प्रसाधयेत् ॥५॥
वस्त्रपूतं नदा देवि सुपुष्पां ऽणितदाव्रती ॥ गहे त्वा नियमोपेतः गृहे वापि शिवालये ॥६॥ सं
शोध्य गोमयांभोभिः स्थंडिलं शिवपूजने ॥ वितानपुष्पजालाढ्यं मंडपं परिकल्पयेत् ॥७॥ पीठं त
त्र निधायैव प्राङ्मुखो वोदङ्मुखोपि वा ॥ चैलाजिनकुशैः स्थित्वा संपाद्यार्घ्याचमनं शिवे ॥८॥ प्र
क्षाल्य धातुपात्राणि नवानि कलशांस्तथा ॥ शंखं च धूपदीपौ च सपुष्पांबु निसाधयेत् ॥९॥ पंचाम
तं पंचगव्यं तथा फलरसं शिवे ॥ गंधपुष्पाक्षतास्तत्र संस्थाप्य निवेदनं ॥१०॥ तांबूलं चैव वासाध
रत्नालंकरणानि च ॥ संकल्प्य नियमोपेतः मासि कां शिवरात्रिकां ॥११॥ ततोऽथ प्रथमे यामे संपू
ज्यैव महेश्वरं ॥ पंचाक्षरशतं जप्त्वा सांगन्यासं महेश्वरि ॥१२॥ कलशं पूज्य शंखं च गंधपुष्पाक्ष
तादिभिः ॥ अंगेषु भावयेद्देवान् ततः प्रजननेन च ॥ १३॥ लिंगसंस्थं महादेवमेवं ध्यायेत्त्वया
सह ॥ साबं त्रिनेत्रं चंद्रांकं नीलकंठं पिनाकिनं ॥१४॥ वरदाभयहस्तं च मृगटंकधरं शिवं ॥
नागयज्ञोपवीताढ्यं दिव्यालंकारभूषितं ॥१५॥ सोमधाम समानास्यं नीलेंदीवरलोचनं ॥
फुल्लकल्हारसंकाशं सर्वाभरणभूषितं ॥१६॥ मदंकसंस्थां त्वां ध्यायेत्साधकः परमेश्वरं ॥
नत्वनान्यमना देवि पंचाक्षरपुरःसरं ॥१७॥ समावाह्य ततो लिंगे वामनासापुटेन हि ॥ पाद्या
र्घ्याचमनादीनि मूलमंत्रेण दापयेत् ॥१८॥ पंचगव्यैर्विशोध्येशं ततः पंचामृतेरपि ॥ पुनः
फलरसैर्देवि गंधपुष्पकुशोदकं ॥१९॥ दद्यादनुक्रमेणैव रुद्रेणैवाभिषेचयेत् ॥ तदंते तर्पणं कु

र्धाद्भवाद्यैरष्टनामभिः॥२०॥ वाससा परिमज्ये शांपीठे संस्थाप्यपूजयेत॥ भस्मनाचंदने वापि
अक्षताभिर्महेश्वरं॥२१॥ बिल्वपत्रैः शिवेपुष्पैर्धूमो लंकारभूषणैः॥ निधनेत्यादिभिर्मंत्रैर्बि
ल्वैः पुष्पैः प्रपूजयेत॥२२॥ शानाद्यनामभिर्वापिपूजयेद्दं दुशेखरं॥ चतुर्दश्यांतथादेविनाम
भिश्चचतुर्दश॥२३॥ पूजयेद्बिल्वपत्राद्यैः नमोंतेरेवमीश्वरं॥ चतुर्दश्यांसगहरंअपामार्गैः
प्रपूजयेत॥२४॥ अजेकपादहिर्बुध्न्योभवःशर्वउमापतिः॥ रुद्रः पशुपतिःशंभुः महेशःशिव
ईश्वरः॥ महादेवोहरोभीमोनामान्येवचतुर्दश॥ एभिर्नामभिरीशानं चतुर्दश्यांसुमेर्यजेत॥
॥२६॥ सापूयाज्यंहविर्दैविनिवेद्यप्रणवेनहि॥ तांबूलं दीपधूपंच नीराजनमथाचरेत॥
२७॥ कर्पूरखंडदीपंचघृतदीपोनिदापयेत॥ स्तोत्रैस्तुवीतेवमीशंप्रदक्षिणनमस्कृतिः॥२८
छत्रंचचामरंचैवध्वजंव्यजनमेवच॥ दद्याच्छिवायदेवेशिवाद्यानिविविधानिच॥२९॥ नर्त
नंकरनालेचऋग्यजुःसामाथर्वकैः॥ पौराणैरीशितिहासोत्थैस्तोत्रवर्यैःस्तुवीतच॥ ३०॥ नमः
शिवायाप्यनमःशिवायैनमोस्तुगौर्यैश्शशिशेखराय॥ नमोस्तुसंसमेदेव्येचनमोस्तुशंभवेन
मोस्तुदेवायनमोस्तुदेव्यै॥ ३१॥ नमःशिवायप्रणतार्तिहारिणे नमोजगज्जन्मगतिप्रदायै॥
नमोस्तुवेद्यायमहेश्वरायनमोस्तुगंधर्वगणस्तुतायै॥ ३२॥ नमःशिवायादिविहारकारिणे
नमोजनित्र्यैभवमंगलायै॥ नमोस्तुविश्ववादिमदप्रदायनमोस्तुवाणीस्तुतिसंस्तुतायै॥ ३३॥ न
मःशिवायांतकगर्वहारिणेनमोस्तुभंडासुरखंडनायै॥ नमोस्तुवेदानवचःस्तुतायनमोस्तुसत्के

सरिवाहनायै॥३४॥ नमः शिवाय प्रमथाधिपाय नमोस्तु रुद्राणि वरप्रदायै॥ नमोस्तु देवादिग
णस्तुताय नमोस्तु भद्रप्रदमंगलायै॥३५॥ एवं स्तुत्वा शिवौ देवि चतुर्दश्यां सदाशिवं॥ प्रहरे चापि प्रहरे
एवमेव यथाविधि॥३६॥ द्वितीयादंष्ये क्रमेणैव पूजांते च महेश्वरि॥ आधिव्याधिसमायुक्तं ऋ
णदौर्भाग्यपीडितं॥३७॥ दशाम्यचैमहेशाय सुप्रीतः तेन मे भवेत्॥ एवमेवाप्यदानं च रात्रौ या
चतुष्टये॥३८॥ मासि मासि महेशानि कृष्णपक्षे विशेषतः॥ चैत्रादिसर्वमासेषु मासि मासि सिति स्य
तासु च॥३९॥ एकां वा प्रहरे पूजां यदि कुर्याच्च नक्तभुक्॥ एवं नरो वा नारी वा विधिवोपवसेन्नि
शि॥४०॥ सुतानैर्लभ्यते भूतानस्या मर्च नमेवमे॥ पुण्यलक्षेश्च लभ्येत नविनाम मत्प्रसादतः॥
४१॥ ब्रह्मा स्वयं चतुर्वक्त्रं पंचवक्त्रः स्वयं हरिः॥ सिक्तेसिक्ते फलं तस्य वक्तुं शक्तो न पार्वती॥४२॥
ब्रह्मांडोदरमध्यानि यानि तीर्थानि संति वै॥ संस्थितानि भवंति ह्मलायां पारणे कृते॥४३॥
परेद्युः पूज्यमादेवि यथाशक्त्या द्विजार्चनं॥ एवं त्वब्दं द्वादशाब्दं व्रतं कुर्याद्विधानतः॥४४॥
संवत्सरं वा देवेशि आजन्मी मद्गणो भवेत्॥ उद्यापनविधिं वक्ष्ये भक्तायां मासि मासिके॥४५॥
॥देव्युवाच॥ ॥ व्रतस्योद्यापनं देव किं कर्तव्यं च मानवैः॥ को विधिः कानि द्रव्याणि कथं का
र्यं वद प्रभो॥४६॥ ॥ईश्वर उवाच॥ ॥ शृणु काम्यविधिं भद्रे लोकानां हितकाम्यया॥ चतु श्रीशिव
र्दश्यां तु कर्तव्यं मासे भक्तांगनाशिवे॥४७॥ एकभुक्तं त्रयोदश्यां चतुर्दश्यामुपोषणं॥ संपाद्य
सर्वसंभारान् मंडपं तत्र कारयेत्॥४८॥ वस्त्रैः पुष्पैः समायुक्तं फलपल्लवशोभितं॥ तन्मध्ये ८७

विलिखेत्पद्मं सर्वतोभद्रमंडपं॥४९॥ धूपदीपसमायुक्तं कुंभाष्टकैर्विराजितं। आचार्यैव
रयेनत्र ऋत्विग्भिः सहितं शिवं॥५०॥ शिवरूपाश्च ते विप्राः पूजाश्चंदनपुष्पकैः॥ अनुज्ञा
तश्च ते विप्रैः शिवमावाह्य कुंभके॥५१॥ अव्रणं सजलं कुंभं सपल्लवं हेमलाञ्छनं॥ कुंभो
परि न्यसेद्देवमुमया सहितं शिवं॥५२॥ सौवर्णं वापि रौप्यं वा ताम्रं मृण्मयमेव वा॥ रत्ना
लंकारकैर्युक्तं वस्त्रैः पुष्पैः प्रपूजयेत्॥५३॥ प्रतिष्ठा अर्चयेन्मूर्तिं सोमां दिक्पालकानपि॥
परितोष्य सुकुंभेषु पूजयेन्मूलमन्त्रतः॥५४॥ पूर्वेद्युः गंधपुष्पैश्च सोपवासः प्रपूजयेत्॥ धू
पदीपैश्च नैवेद्यैः फलैर्नानाविधैरपि॥५५॥ प्रातः स्नात्वा परेद्युर्भो पूजयेत्कृतनैत्यकः॥ ऋ
त्विगाचार्यसहितो मूर्तिं दिक्पालसंयुतां॥५६॥ पूजयेद्गंधपुष्पाद्यैर्धूपदीपं निवेदयेत्॥
नैवेद्यं भक्ष्यभोज्यं च अपूपांश्च चतुर्दश॥५७॥ प्रत्येकं सघृतान्कंतु संख्ययाश्च चतुर्दश॥
स्वगृह्योक्तेन मार्गेण प्रतिष्ठाप्य हुताशनं॥५८॥ परिस्तीर्य विधानाज्यं हविः संस्कृत्य हा
वयेत्॥५९॥ आचार्य ऋत्विक्सहितः सपत्नीकः स्वयं शुचिः॥ रुद्रेणैव नमोन्तेन जुहुया
ज्जातवेदसि॥६०॥ ततः स्विष्टकृतं दत्त्वा होमशेषं समापयेत्॥ आचार्यं ऋत्विजश्चैव पू
जयेद्दक्षिणादिभिः॥६१॥ गोसवत्सां सवस्त्रां नामाचार्याय निवेदयेत्॥ ततः सकुंभां तां
मूर्तिमाचार्याय निवेदयेत्॥६२॥ प्रीयतां मे शिवो नित्यं सर्वां तां मुक्तिप्रदो मम॥ दिक्पालमू
र्तिः कुंभांश्च ऋत्विग्भ्यो दापयेत्क्रमात्॥ ततो नानाब्राह्मणान्देवि गंधपुष्पैः प्रपूजयेत्॥

वित्तशाठ्यमकुर्वाणो दक्षिणाभिः प्रसादयेत्॥६४॥ पुनःसंपूज्य मं लिंगे प्रार्थयेद्भक्तितिधये॥ व्रतमेतन्कृतं यन्मे पूर्णं वापूर्णमेव वा॥६५॥ रोगपीडानिर्नितो देवि दिवाभुक्तं तु यन्मया॥ मासि मासि चतुर्दश्यां कदाचित्प्राप्ययोगतः॥६६॥ सर्वे संपूर्णतां यातु त्वत्प्रसादान्महेश्वरः॥ ब्राह्मणान्भोजयेतत्र परेद्युश्च चतुर्दश॥६७॥ सपत्नीकानभक्ष्यभोज्यैः गंधपुष्पाक्षतादिभिः॥ दक्षिणाभिः प्रतोष्येवत्स्वयंभुंजीत बंधुभिः॥६८॥ एवं नरो वा नारी वा विधवापि चतुर्दशी॥ मासि कीर्थस्तु लभेत नन्देकाग्रमनाश्शृणु॥६९॥ अपुत्रो लभते पुत्रं कुमारी सत्पतिं लभेत्॥ निर्धनो धनवान्भूयादायुः हीनः तथायुषा॥७०॥ भक्तो मुक्तिमवाप्नोति विधवापति लोकगा॥ भक्तो मारणपोभूयामासिभूतार्चनेन मे॥७१॥ किंपुनर्बहुनोक्तेन सर्वान्कामानवाप्नुयात्॥ ॥ईश्वर उवाच॥ ॥ एवं मासचतुर्दशीषु नियतो संपूजयन्मां हरं शर्वाणीसहितं स शर्मलभते सर्वेषु लोकेष्वपि॥ पूर्वोघ छत्रिसुंदरं नगवरं कैलासमाप्यादरात्प्रश्वान्क्षेगणपुंगवं द्रुतामुपगतात्ज्ञाना हि लीनो भवेत्॥७२॥ ॥ इति श्रीशिवरहस्ये रुद्रकादशांशे महादेवाख्ये शिवगौरीसंवादे मासशिवरात्रिसोद्यापनव्रतकल्पनं नाम त्रयस्त्रिंशोऽध्यायः॥३३॥ ॥ श्रीमहादेवायनमः॥ ॥ श्रीशिव ईश्वर उवाच॥ ॥ कृष्णाष्टम्यां महादेवि पूजयेन्मां यतव्रतः॥ दृढव्रतो महादेवि बोधायतविधानतः॥१॥ स्त्रियो वा महस्रापुरुषा वर्णितोपि महेश्वरि॥ सर्वकृष्णाष्टमीषु शं उपोष्य

हम दोषके ॥२॥ नद्यां तटाके संस्नाया धौतवस्त्रधरः शुचि ॥ भस्मत्रिपुंड्रसहितो रुद्राक्षाभरणै र्युतः ॥३॥ बिल्वपुष्पाणि संपाद्य धौतं कुंभं सतायुतं ॥ कुशांश्च साग्रान्संपाद्य रतनित्य ऽर्क्रियो द्विजः ॥४॥ पूजास्थानं समालिप्य गोमयेन नवांभसा ॥ रंगवल्लीशोभिते च पुष्पमंडपकैर्युतं ॥५॥ चितानपल्लवोपेते तोरणावलिभूषितं ॥ तस्मिन्संस्थापिते पीठे समावाह्य वृषध्वजं ॥६॥ सांबं सगणमव्यग्रो उग्रार्चनपरायणः ॥ संकल्प्य देशकालादि पंचाक्षरजपादरः ॥७॥ पाद्यार्घ्याचमनादीनि शंखं कुंभं च सांबयुक् ॥ लिंगाग्रे स्थापयेदेवि सकूर्चं गंधपुष्पयुक् ॥८॥ पंचामृतं पंचगव्यं तथा फलरसानि च ॥ मधुपर्कं च पात्रे स्थापयेद्धूपपुष्पकं ॥९॥ तांबूलं च हविर्देवि सपाद्यार्घं डलाक्षता ॥ घृतदीपान्ततो दिक्षु पेटान्कुर्यात्सवर्तिकान् ॥ आत्वा चेहेति मंत्रेण शिवमावाहयेद्बुधः ॥ सांबं च सगणं देवं लिंगे त्वर्चेत्पिनाकिनं ॥११॥ पाद्यार्घ्याचमनादीनि दद्याद्देवि पृथक्पृथक् ॥ मूलमंत्रेण विधिवन्मधुपर्कं ततः शिवे ॥१२॥ पंचामृतं पंचगव्यं तथा फलरसैः शिवे ॥ गंधपुष्पकुशाग्रांबु लिंगे दद्यात्सुडसरैः ॥१३॥ शतरुद्रेण विधिवद्रुद्राध्यायेणाभिषेचयेत् ॥ इमा आप इतीव मा पो दद्याच्छिवायतु ॥१४॥ आपोहिष्ठादिमन्त्रुभिरभिषिंचेत्ततः परं ॥ व्रसजन्नैः पावमानैः कद्रुद्रायेति मंत्रतः ॥१५॥ सर्वो ह्येष महारुद्रः पुरुषो रुद्र इत्यपि ॥ विश्वं भूतमिति शानी वामदेवादिसामभिः ॥१६॥ यजुः पवित्रेमापोस्मा रुद्राग्राविती मंत्रतः ॥ अभिषिच्य महादेवं शिवलिंगे स्वरूपिणं ॥१७॥ देवस्य त्वेति मंत्रेण सकूर्चेणाभिषेचयेत् ॥ भवा

येत्यष्टभिर्देवि तर्पयेन्नामभिः पृथक्॥१८॥ संशोध्य वाससा लिंगं पीठे संस्थाप्य पूजयेत्॥ सितभस्मगंधवस्त्रं साक्षतं चोपवीतकं॥१९॥ सुवर्णरत्नाकल्पैश्च बिल्वैः पुष्पैः प्रपूजयेत्॥ कमलोत्पलकल्हारमंदारकरवीरकैः॥२०॥ कर्णिकारार्कदमनैः कनकैः द्रोणसंभवैः॥ शतोष्टनामभिर्देवि भिधानेत्यादिमंत्रतः॥२१॥ धूपं च गुग्गुलोपेतं घनदीपान्मनोरमान्॥ गणांश्च परितः पूज्य गंधपुष्पाक्षतादिभिः॥२२॥ महाकालाय पूर्वे तु शंकुकर्णाय दक्षिणे॥ नंदिकेशाय पश्चात्तु वक्रतुंडाय चोत्तरे॥२३॥ ईशाने चंडिकेशानं धर्मं चैव शिवाग्रतः॥ उत्तरे च महादेवीं पूजयेदुपचारकैः॥२४॥ ततस्तन्नामभिर्देवि शिवस्य परितोषयेत्॥ उद्दीप्यस्वेति मंत्रेण चाष्टपैष्टिकदीपदः॥२५॥ हविः साज्यं च तांबूलं शिवे दद्यात्क्रमेण च॥ नीराजनं ततो दद्यात् हाद्यधोर्ध्वपुरःसरं॥२६॥ छत्रं च चामरे देवि व्यजनादर्शके तथा॥ प्रदक्षिणं प्रणामं च स्तवमेतत्प्रयोजयेत्॥२७॥ जय शंकर पार्वतीपते विधिविष्ण्वासुरसेवितांघ्रिपाद उरगेंद्राभरण प्रसीद शंभो प्रणतं पाप मपाकुरुष्व सद्यः॥२८॥ जय सोमानलसूर्यलोचनाक्ष शंभो धृतचंद्रांकजटाकटीरगंग॥ परिधाहिपतंगमध्यवासस्य घ्रिमुंडाभरण प्रसीद देव॥२९॥ जय सोमकलावतंस शूलपाणे गणवंद्यामलसेवनप्रसीद॥ हर भर्गोत्तम नंदिचंडिकेशागणस्कंदातुलशंकाल कालैः॥३०॥ परितः सेवितपार्श्वविश्वनाथ स्थिरधन्वन्नमसा प्रनुधिमेहि॥ जय सांबमहोरगेंद्रहार प्रसभं मन्मथनाशन प्रसीद भर्ग॥३१॥ भवभीममहेश्वरावशंभो मयि दृष्टिं करुणां कुरुष्व शंभो॥ इति स्तुत्वा महादेवं काला

षष्ठ्यां तदा व्रती ॥ ३२ ॥ प्रतिष्ठाप्य ततो वह्निं स्वस्वगृह्योक्तमार्गतः ॥ अशानीयहविषा स्यां जुहुयात्तेन सर्पिषा ॥ ३३ ॥ इमारुद्रेत्यादिभिर्मोपूर्वं तु जुहुयाच्छिवे ॥ त्र्यंबकं त्वामित्यादिभिश्चव अंहेविभर्षि इत्यपि ॥ ३४ ॥ मानस्तोके इत्येन दातेपितरिति क्रमात ॥ मानः सूर्य एवाहीनिमानोगाहांनमित्यपि ॥ ३५ ॥ मानस्तोकेनमंत्रेण हविष्मं न इति क्रमात् ॥ वास्तोष्पतेतिमंत्रेण आर्द्रयारुद्र इत्यपि ॥ प्रमुंचतु दुरितानीतिमंत्रास्ते समिदानके ॥ भवायेच भिर्मंत्रैः स्वाहांते र्जुहुयाच्छिवे ॥ ३७ ॥ भवायेत्यपिपत्न्यैश्च इत्यष्टाभिर्जुहोत्यपि ॥ देवस्यचसुतोयेति लुहुयाज्ज्ञान वेद्ससि ॥ ३९ ॥ ततस्त्विष्टकृतं हुत्वा आज्ये होमं समापयेत ॥ पुनरेव सुमैः पूज्य होमांते शंप्रसादयेत ॥ ३९ ॥ प्रीयतां भगवानीशः सांबः सगण ईश्वरः ॥ अनया पूजया होमेन मे मां संप्रसीदतु ॥ ४० ॥ दद्यादर्घ्यं महेशाय सपुष्पांबु महेश्वरि ॥ दुःस्वदारिद्र्यादिमग्नेमामुद्धर महेश्वर ॥ ४१ ॥ अवश्यमर्घ्यदानेन अष्टमूर्ते प्रसीद मे ॥ इत्यर्घ्यं च ततो दत्वा पूजामुद्वास्य सत्तमे ॥ ४२ ॥ ब्राह्मणायहिरण्यं गां शांभवाय निवेदयेत् ॥ यत्किंचिद्वा यथाशक्ति दद्याद्विशानतुष्टये ॥ ४३ ॥ भक्ष्यभोज्यान्नसंयुक्तं भुंजीयाच्छांभवैः सह ॥ दक्षिणाभिश्च तान्पुष्यैः गंधताम्बूलपूर्वकं ॥ ४४ ॥ कृष्णाष्टमीव्रते नियतमेष सामन्यतो विधिः ॥ ४५ ॥ एकाब्दं त्रीणि वा देवी द्वादशाब्दमथापि वा ॥ ४५ ॥ कृत्वा व्रतोद्यापनं च तत्काशीवासमेव तु ॥ ४६ ॥ सितासिताष्टमीषु अपि मुख्यं तु मेत्यकं ॥ ४६ ॥ उपोष्य वापि मुख्येषां पूज्य बिल्वैः सुमैरपि ॥ ४७ ॥ शिवे गांगांबुभिः सौम्यैः अभिषिच्य महेश्वरं ॥ धूपदीपादिनैवेद्यैः स्तुवीत वं महेश्वरं ॥ ४८ ॥

कालाष्टमीषु नियमनमविमुक्तेश्वरं हिमं॥ गंगाधरांधकरिपो प्रमथाधिनाथ विश्वेश्वराविश्वगतसर्जक
भर्जकांते॥ ब्रह्मादिविष्णुसुरवर्गसुपूजितांघ्रे मामीश पाहि दयया स्मरकालनाश॥४९॥ इति स्तु
त्वाविमुक्तेशं कालराजं प्रपूजयेत्॥ कालाष्टम्यां तु नियतं काशीवासी महेश्वरि॥५०॥ कुलस्तंभं
समासाद्य गंधपुष्पांबुभिः सदा॥ अपूपं हविषा चैव वटकैर्लड्डुकैरपि॥५१॥ पूजयेत्धूपदीपै
श्च कालाष्टम्यां स्तुवीत च॥ भैरवं भीषणाकारं वामनिर्विघ्नहेतवे॥५२॥ स्तोत्रेणानेन देवेशि
काश्यां कालाष्टमीषु च॥ स्तुवीत पद्यैः हृद्यैस्त्वं मम आद्यगणपोत्तमं॥५३॥ ॥ देवराजसेव्यमा
नपावनांघ्रिपंकजं व्यालयज्ञसूत्रमिंदुशेखरं कृपाकरं॥ नारदादियोगिवृंदवंदितं दिगंबरं
काशिकापुराधिनाथकालभैरवं भजे॥५४॥ भानुकोटिभास्वरं भवाब्धितारकं परं नीलकंठ
मीप्सितार्थदायकं त्रिलोचनं॥ कालकालमंबुजाक्षकंधरं हरं शिवं का०॥५५॥ भुक्तिमुक्तिदाय
कं प्रशस्तचारुविग्रहं नितांतभक्तवत्सलं समस्तलोकपालकं॥ निक्वणन्मनोज्ञहेमकिंकिणीलस
त्कटिं काशिकापुर०॥३॥ शूलटंकपाशदंडपाणिमादिकारणं श्यामकायमादिदेवमक्षरं नि
रामयं॥ भीमविक्रमं प्रभुं विचित्रतांडवप्रियं काशिकापु०॥४॥ रत्नपादुकाप्रभाभिरामपादयु
ग्मकं नित्यमद्वितीयमिष्टदैवतं निरंजनं मृत्युदर्पनाशनं करालदंष्ट्रभीषणं काशिका०॥५॥
धर्मसेतुपालनमधर्ममार्गनाशनं कर्मपाशमोचकं सुकर्मदायकं प्रभुं॥ सुवर्णवर्णकेशपाशशोभि
तांगनिर्मलं काशिका०॥६॥ अट्टहासभानुवर्णजांडकोशसंततिं दृष्टिपातनष्टपालकालनम्र

दावलिं॥अष्टसिद्धिदायकं कपालमालिकाधरं काशिका०॥७॥ भूतसंघनायकं विशालकीर्ति
दायकं काशिवासपुण्यलोकपापशोधनं प्रभुं नीतिमार्गकोविदं पुरातनं जगत्पतिं काशिका०॥
८॥ कालभैरवाष्टकं पठंति ये मनोहरं ज्ञानमुक्तिसाधनं पवित्रपुण्यवर्धनं॥ शोकमोहदैन्य
लोभकोपतापनाशनं काशिकापुराधिनाथ कालभैरवं भजे॥ ९॥ प्रविष्टयोप्यथान्यत्र वसंते
तं स्तवं जपेत॥ पुनः काशीं समासाद्य तत्र नष्टं नन्नूं भवेत्॥ १०॥ कालष्टम्यां कालराजो स्तुवीते
वं प्रसाद्य च॥ काश्यां सर्वनिवसेत्तः न पापैरमेत हि सः॥ ११॥ किं पुनर्बहुनोक्तेन कालाष्टम्यर्च
को नरः॥ सर्वान्कामानवाप्नोति भुक्तिं मुक्तिं च विंदति॥ १२॥ यत्नात्पुनफलं प्राप्य मम लोके महीय
मे॥ ब्रह्महत्यादिभिः पापैः मुच्यते नात्र संशयः॥ १३॥ ॥ ईश्वर उवाच॥ ॥ मध्याष्टमी प्रथित
सोमकलावतंसं सर्वाष्टमीषु नगाजे परिपूजयंति॥ १४॥ नष्टानि ते षु दुरितानि भवंति सद्यो
हृष्टानि तेषु सहितानि विमुक्तिदानि॥ १५॥ यो वाविमुक्ते सितभस्मपालकालाष्टमीषु नियं
तं मम कालराजं॥ संपूर्णायं न द्युगणैर्न बिभेति सद्यो भवेदति न रोसन रोति धन्यः॥ १६ ॥
॥ इति श्रीशिवरहस्ये महादेवाख्ये रकादशांशे शिवगौरीसंवादे अष्टमीपूजाकथने भैर
वस्तुतिनाम चतुस्त्रिंशोध्यायः॥ ३४॥ ॥ श्रीमहादेवाय नमः॥ ॥ श्रीदेव्युवाच॥ ॥ उद्या
पनविधिं ब्रूहि कृपया भक्तवत्सल॥ कस्मिन्काले च किं द्रव्यं कृष्णाष्टम्यां महेश्वरं॥ १॥ न
न्मेवद महादेव व्रतषाड्गुण्य हेतवे॥ ॥ देव्युवाच॥ ॥ पूर्णां तिथिमनुप्राप्य चित्तगिलादि

९१

संयुतः॥ निशीथव्यापिनीग्राह्यासिताचाप्यसितातिथिः॥२॥ कृष्णाष्टमीविशेषेण संपूर्णफल
हेतवे॥ सप्तम्यामेकभक्तः सन्भवभक्तो जितेंद्रियः॥३॥ मामभ्यर्च्यविधानेन भस्मरुद्राक्षभू
षणः॥ निर्वर्त्यावश्यकं कर्म वर्तनेन द्वादशाह्निके॥४॥ वर्षे त्रिवर्षे देवेशि कृत्वानंताष्टमीव्रतं
त्वा संध्यामुपास्य च॥ पूर्वोक्तविधिना देवि कामीनुद्यापनं चरेत्॥५॥ अष्टम्यां बुधवारेण युतायां
मे देवेशि ने॥ प्रातरुत्थाय मतिमान्स्नात्वा संध्यामुपास्य च॥६॥ मंडपं रचयेत्तत्र पुष्पमालाविरा
जितः॥ वितानतोरणोपेतं कदलीस्तंभमंडितं॥७॥ तस्मिन्सगोमयेनैव भुपलिप्तेन वा भ
सा॥ रंगवल्यादिशोभाढ्यं पद्मं कुर्यात्सकेसरं॥८॥ शिवक्षेत्रेऽथ गेहे वापि नद्यां वापि वने गि
रौ॥ पुण्याहं वाचयित्वा यत्नाद्दीक्षां विधाय च॥९॥ ऋत्विजो वरयेद्दक्षो आचार्यसहितान्न

९ शिव

व॥ भस्मरुद्राक्षसंपन्नो लिंगार्चकान् शिवे॥१०॥ वेदागमपुराणज्ञा ब्राह्मणाः संशितव्रताः॥ गं
धपुष्पैस्तानभ्यर्च्य स्वस्त्यं चैव समादरात्॥११॥ उमामहेश्वरं चापि सौवर्णेन वकारयेत्॥ पले
न वा तदर्धेन कुर्याद्रौप्येण वा शिवे॥१२॥ नंदिस्कंदं महाकालं शंकुकर्णं गणेश्वरं॥ चंडेश्व
रं च वृषभं दुर्गां चैव यथाविधि॥१३॥ मन्मये स्ताम्रजे वापि कुंभे रंबुप्रपूरितैः॥ फलपल्लव
संयुक्ते स्तेषु तां प्रतिमान्यसेत्॥१४॥ मध्यमे च महाकुंभे सांबं पुष्पफलैर्युते॥ उमां महेश्व
रं स्थाप्य प्रतिष्ठाप्यार्चयेत्क्रमात्॥१५॥ दिग्गादिक्रमयोगेन अन्यमित्यर्चयेच्छिवे॥ प्रा
णानायम्य विधिवत्कृत्वा सेकस्य मादरात्॥१६॥ उद्यापने कीदृश्येहं कृष्णाभ्यर्चनस्य च॥३

श्रीशिव

त्युक्त्वा पूजयेत्तत्र लिंगमूर्तिं सदाशिवं॥१७॥ पंचामृतैः पंचगव्यैः तथा फलरसैरपि॥ गंधपुष्प
कुशादिश्च मंत्रपूतैर्यजेच्छिवं॥१८॥ रुद्रेणैवाभिषिच्येशं तर्पयेद्दश नामभिः॥ वाससा यज्ञोप
वीतं च भस्म चंदनसाक्षतं॥१९॥ बिल्वपंकजपुंनागसौगंधिकुसुमानि च॥ पूजयेत्पार्वती
कांतं निधनेत्यादिमंत्रतः॥२०॥ धूपं दीपं ततो दत्वा निवेद्य हविरंबिके॥ तांबूलं च ततो दद्या
न्नीराजनमतः परं॥२१॥ प्रदक्षिणानमस्कारैः स्तोत्रैः स्तुत्वा महेश्वरं॥ विसर्जयित्वा च ततः कुं
भे मूर्तिं प्रपूजयेत्॥२२॥ गंधपुष्पाक्षतैर्देवि ऋत्विगाचार्यवञ्चकतः॥ उमामहेश्वरं देवमाचा
र्यः पूजयेच्छिवे॥२३॥ रुद्रदुर्गादिगायत्र्या पूज्य सर्वोपचारकैः॥ ऋत्विजश्चैव तथा मूर्तिः
पूजयेयुर्यतव्रताः॥२४॥ दिक्कुंभेषु समंताच्च ततः गायत्रिभिः क्रमात्॥ संपूज्य गंधपुष्पाद्यैः
निवेद्य हविरीश्वरि॥२५॥ नीराजनं बलिं कुर्युः तत्तन्मंत्रैर्दिशासु वै॥ मंटपात्पश्चिमे भा
गे स्थंडिलं चतुरस्रकं॥२६॥ कृत्वाचोल्लेखनादीनि प्रतिष्ठाप्याग्निमीश्वरि॥ इध्मान्दर्भा
न्परिस्तीर्य पात्रासादनमाचरेत्॥२७॥ पूर्णपात्रप्रतिष्ठा च ब्रह्मासनमतः परं॥ इध्माधाना
दि चाघारं हुत्वा चैव चतुर्मुखी॥२८॥ अपामार्गसमिद्भिर्वा बिल्वैर्वापि महेश्वरि॥ हविश्च
सर्पिषा युक्तं सतिलं जुहुयाच्छिवे॥२९॥ रुद्रैर्नमोंते स्वाहेति शतार्धं स्विष्टकृत्ततः॥ गणपां
श्च हवेत्तत्र स्वाहाकारेण चामले॥३०॥ प्रायश्चित्ताहुतीर्हुत्वा होमशेषं समापयेत्॥ पूर्णाहु
तिं च जुहुयादखंडघृतधारया॥३१॥ रुद्रसूक्तेन देवेशि औदुंबरस्रुचा हुता॥ मधुमिश्रेण

चाज्येनत्र्यांत्र्यंबकं हुनेन्॥३२॥ तदंते चाग्निमध्यस्थं पूजयेन्मौलयासह॥ गंधैः पुष्पै
स्तथा बिल्वैर्वासमा हविषा तथा॥३३॥ धूपं दीपं ततो दत्वा नीराज्यार्नीगृहैः सह॥ त्रिः प्रद
क्षिणमावृत्य समिधं जातवेदसे॥३४॥ ब्राह्मणानां मध्यगां भोभिः प्रोक्षयेच्च सदाकरः॥ वासो
लंकारगोभिस्तान्पूजयेच्छ भवानशिवे॥३५॥ पश्चकृत्र्त्विज्ञमाचार्यं पूजयेद्दक्षिणादिभिः॥
वित्तशाठ्यं न कुर्वीत ब्राह्मणं ब्राह्मणं यजेत्॥३६॥ दीनानाथान्दक्षिणाभिः पूज्यान्नैः भो
जयेद् दपि॥ प्रतिमास्तास कुंभाश्च देयाऋत्विक् शुभूर्तिकाः॥ ३७॥ कुंभस्थैः तज्जलैः
स्नात्वा सदारो धौलवस्त्रधृक्॥ गंधपुष्पधरो विप्रो ऋत्विगाचार्य पूर्वकं॥ ३८॥ भुंजीया
द्रस्यभोज्यान्नं शिवमभ्यर्च्य वाग्यतः॥ नवम्यां पारणं कुर्यादृंधुभिश्च विशेषतः॥३९॥
आचार्यं च सपत्नीकं पूजयित्वा यथाविधि॥ प्रतिमा धस्त्रकलशान्नाद्यो वत्सविशोभि
ताः॥ ४०॥ वस्त्राभरणघंटाद्याः कांस्यदोहाः पयस्विनीः॥ दत्वा ब्रह्मादिविप्रेभ्यः कलश
प्रतिमास्तथा॥४१॥ ब्राह्मणान्भोजयेदन्नैर्गृण्हीयादाशिषश्शिवे॥ शिवे मे प्रियतां देवः
सांबः सगण ईश्वरः॥४२॥ कृष्णाष्टम्यामर्चनेन व्रतेनोद्यापनेन च॥ भुक्तिं मुक्तिं च मे भ
क्तिं ददातु परमेश्वरः॥४३॥ इत्युक्त्वा तु मसाधेशं व्रतोद्यापनकर्मणि॥ उद्यापनमिदं दे
वि कृष्णाष्टम्यां व्रतस्य च॥४४॥ यत्कृत्वा न पुनर्जन्म विंदते मनुजः क्वचित्॥ गाणपत्य
मवाप्नोति मम कैलासमौलिगः॥४५॥ एवं नरो वा नारी वा कृत्वा मध्याष्टमीव्रतं॥ यान्यान्वि

नयनेकामान्प्राप्यांतेप्रेत्यमांव्रजेत॥ ५६॥ उद्यापयच्चपुनर्देवि तत्र्णहीयादथभक्तितः॥ किंपुनर्ब
हुनोक्तेननानेनसदृशंव्रतं॥ ५७॥ भुक्तिमुक्तिप्रदंपुंसांसौभाग्यारोग्यवर्धनं॥ पापापहंपुण्यदंच
प्रशस्तंममपूजनं॥ ५८॥ सर्वकामप्रदंपुत्र्यमपुत्राणांविशेषतः॥ सर्वभद्रमवाप्नोति दुर्गाण्या
युनरत्यपि॥ ५९॥ ॥श्रीईश्वरउवाच॥ ॥एवंकृष्णाष्टमीसुव्रतमशुभहरंपुत्र्यमारोग्यदं येकृ
त्वाजन्मशतायुनौघसमहापापैर्नविश्यदथ॥ पश्चान्मेगणपुंगवैंद्रतामुपगतेनाशेशिवेदु
र्गतिंप्राप्तोतीश्वरचिंतकः समुकृतांशशिचार्विंदेदपि॥ ६०॥ ॥इतिश्रीशिवरहस्येमहादेवा
ख्येएकादशांशेकृष्णाष्टमीव्रतोद्यापनकथनंनामपंचत्रिंशोध्यायः॥ ३५॥ ॥श्रीमहादेवा
यनमः॥ ॥श्रीशिवउवाच॥ ॥शिवव्रतानिविधिवत्तवप्रोक्तानिशैलजे॥ किंपुनर्देवि
मांपृच्छतत्तेवक्ष्यामिसांप्रतं॥ १॥ ॥देव्युवाच॥ ॥देवदेवमहादेवकरुणालयशंकर॥ श्रुता
निविश्रुतान्यद्यव्रतानिशंभोदानिते॥ २॥ अविमुक्तेनिवसतांनियतंनियमश्चकः॥ शिवा
र्चनाद्यकरणेप्रायश्चित्तंश्रुतिश्रुतं॥ ३॥ तन्मेविस्तरयाद्यशाविस्तारयतणांभिह॥ ॥ईश्वर
उवाच॥ ॥सम्यक्पृष्टंत्वयादेविलोकानांहितहेतवे॥ रहस्यंसर्ववेदानांनोक्तंपूर्वमयां
बिके॥ ४॥ बृहज्जाबालकथितंतत्तेवक्ष्याम्यनुक्रमात्॥ काशीवासिजनाचारबृहज्जा
बालदर्शितं॥ ५॥ शिवार्चनपरित्यागेचैकान्हापिचसन्मे॥ प्रायश्चित्तंवदाम्यद्यश्रुणु
श्रवणभूषणं॥ ६॥ एतदर्थेहिमुनयोमुक्तिमंडपमध्यमे॥ विश्वेश्वराग्रतस्थित्वाभस्मरुद्रा

सम्भूषणः ।।७।। प्रणम्याहुः भुसुरंतंचं द्रवंडशिवार्चनं ।। ।।मुनय ऊचुः ।। ।।किं कार्यंब्रा
ह्मणानांचकिंधार्यंकचसंस्थितिः ।। कः पूजनीयो ध्येयश्च नन्नो ब्रूहि शिवार्चकः ।।८।। इति
पृष्ठो भुसुंडो सौ ब्रह्मज्ञाबालसंभवं ।। रहस्यं तान्नवोचन्मेकर्तव्यं ब्राह्मणेषु यत् ।।९।। प्रथ
मेभस्मरुद्राक्षधारयोर्महिमांशिवे ।। त्रिपुंड्रलन्मुखानांचधारणे महिमांवदत् ।।१०।। भुसुं
ड उवाच ।। सम्यक्पृष्टं मुनिश्रेष्ठा ब्राह्मणानां हितायनं ।। कैलासेयन्महादेव्यै वै ब्रह्मज्ञाबा
लगेरवे ।।११।। प्रोक्तवान्छ्रीमहादेवो देव्यैयत्श्रुतिदर्शितं ।। तद्भक्त्योवदाम्यद्य श्रृणु
ध्वंसावधानतः ।।१२।। भासुरं भुसुराणां च शिवाचारं श्रुतीरितं ।। उत्पन्नो ब्राह्मणकुलेऽष्ट
चत्वारिंसंस्कृतः ।।१३।। शौक्तसावित्रसोमाद्यदीक्षाभिर्भूलजन्मभिः ।। सतुमुख्याधिकारीस्या
न्नेतरः सार्ववर्णिकः ।।१४।। वर्णाश्रमाचाररतद्विजात्रैवर्णिका अपि ।। तेषुक्तमेश्वराचारं श्रुत्या
मुक्तिप्रदं द्विजाः ।।१५।। वात्सल्यं सावधानेन अविमुक्तेथवोत्तमं ।। तच्छिवागारमतुलं क्षेत्रे
ष्वन्येषु वारुचि ।।१६।। प्रशस्तेतणकाष्टेदेसर्वदार्यसमन्विते ।। अग्निरित्यादिभिर्भस्मधार्यं
श्रौतानलोद्भवं ।।१७।। अथषोडशाकांगेषु मंत्रैर्विभाः त्रियायुषैः ।। ब्राह्मणक्षत्रियैर्वैश्यैः
शूद्रैस्तन्मजनाग्निजं ।।१८।। वर्णीवनीगृहस्थोवायतीवाविधवास्त्रियः ।। प्रणवेन यतेः प्रो
क्तं स्त्रीणां पंचाक्षरेणतु ।।१९।। पंचब्रह्मभिरेवेहभस्मनाप्यवगुंठनं ।। अत्याश्रमेप्रकथितं त्रि
पुंड्रस्यचधारणं ।।२०।। शिरोव्रतमिदं श्रौतं धार्यं सर्वाश्रमेरपि ।। त्यक्तेन त्यजति मायांतिन्

रकं स्वपितामहैः ॥२१॥ भिक्षुभिः सोऽभवेद्देव मालारुद्रगणे द्विजाः ॥ रुद्राक्षसंभवाश्चैताः रुद्रा
क्षाः रक्तपीतकाः ॥२२॥ कृष्णोऽश्वानुक्रमेणैव वर्णैर्धार्याश्च मंत्रतः ॥ सर्वैराश्रमैस्तथा स्त्रीभिः त्र्यं
बकेनैव मंत्रतः ॥२३॥ न त्यक्त्वा धारणं भक्त्या उपोष्या स्यायमेवहि ॥ यतिः प्रणवसाहस्रं जपन्मु
क्तो ध्रुवो भवेत् ॥२४॥ धारणस्पर्शने दृष्टे गोदानफलमाप्नुयात् ॥ पर्वण्यपि च रुद्राक्षं ललत्त हृर्णे
श्च धारिते ॥२५॥ पूर्वोक्तं च फलं सर्वे दद्यात्तस्यैषु सर्वदा ॥ ध्येयः सर्वैर्महादेवः शिवरूपः शिवं
करः ॥२६॥ उमासहायो विश्वेशो नीलग्रीवस्त्रिलोचनः ॥ ब्राह्मणैरन्यवर्णैश्च स्त्रीभिश्च य
तिभिस्तथा ॥२७॥ जप्यः प्रणवरूपेह शिवः पंचाक्षरं मम ॥ त्रिकालं सर्वदा सर्वैः स्त्रीशू
द्राणां नमोन्तकः ॥२८॥ नातः परं तारकोऽस्मि मंत्रः पंचाक्षरः परः ॥ काश्यामंते च वै शानो कर्णे
तूर्णं विमुक्तिदः ॥२९॥ ददाम्यहं सप्रणवं पुनर्भवनिवृत्तये ॥ गंगावासहजां वापि समाश्रित्य
वसेद्द्विजः ॥३०॥ अविमुक्ते तु नियमाद्वासः कष्टतरो नृणाम् ॥ सह्यजायास्तटे क्षेत्रे वसन्भक्त्या
धमुक्तये ॥३१॥ पूजनीयो महादेवः स्मर्तव्यश्च मुमुक्षुभिः ॥ कौबेर्यां वापि गंगायां नदीष्वन्या
सु वा द्विजैः ॥३२॥ स्नात्वा समंत्रमुपसिक्त्वा शौचं विधानतः ॥ संतर्प्य देवपित्र्यर्षीन् रुद्रसू
क्तैश्च मार्जयेत् ॥३३॥ वासोऽप्युपरि धार्यैव भस्मरुद्राक्षमंडितः ॥ संध्यां कुर्यादप्रमादं दत्वार्घ्यं सं
ध्ययोर्द्वयोः ॥३४॥ उद्यंतमंशुमंतं च ध्यायेत्तिष्ठन्स्वरत्वले द्विजः ॥ सहस्रपरमां देवीं शतमध्या
दशावरां ॥ गायत्रीं प्रजपेद्विद्वान्मध्ये सायं च ते भवेत् ॥ श्रौतस्मार्तेन लेवापि जुहुयाद्दशं

व्रतः॥३६॥ जपेल्लक्षं चाक्षरं मंत्रमोंकाराद्यं षडक्षरं॥ सहस्रपरमं विप्राः शतार्द्धं वाभिभावितः॥
संभार्य पूजासंभारं कापिलं पंचगव्यकं॥ अन्यस्माद्दुर्लभं प्रोक्तं मधुपर्कं फलानि च॥ ३८॥ उप
लिप्ते तदा पीठे लिंगमभ्यर्च्य यो द्विजः॥ तस्मिंश्चैः तैश्च संभारैः गंधचंदनवारिभिः॥ ३९॥
नतरु कगुणो रुद्रो जप्यो प्येकादशावृतः॥ सकूर्चं वाससामज्य परिवेष्ट्य सुवाससा॥ ४०॥
पीठे स्थाप्य तदा लिंगं भस्मनाभ्युषयेत्ततः॥ गंधाक्षतोपवीतादीन दद्यात्पंचाक्षरेण हि॥ ४१॥
त्रिशाखैर्बिल्वपत्रैश्च तथानार्द्रैरनार्द्रकैः॥ बिल्वपत्रैः समभ्यर्च्य कुसुमैर्वा यथाबलं॥ ४२॥
न तु बिल्वं परित्यज्य सर्वदा सावधानतः॥ धूपं दीपं च नैवेद्यं दद्यात्क्रमतर्तनं॥ ४३॥ प्रणामं च
स्तुतिश्चेति पूजयेन्यरिकीर्तिता॥ ब्राह्मणानां परो धर्मः शिवलिंगस्य पूजनं॥ ४४॥ त्रिकाल
मप्रमादेन वर्णानामाश्रमेषु च॥ यतेस्तु प्रणवेनैव स्त्रीशूद्राणां तु पार्थिवे॥ ४५॥ प्रमादादेकदा
त्यक्त्वा उपोष्यैवापरेहनि॥ कृत्वा सौशिरसोवाप्यं पूजां तद्द्विगुणां चरेत्॥ ४६॥ भुक्त्वा प्रमादादी
शार्च्यामकृत्वा ब्राह्मणो यदि॥ तद्दुदीर्घमुपोष्यैव पंचगव्येन शोधितः॥ ४७॥ संपूज्य शंभवान्पू
ज्य द्विगुणं मुक्तिकिल्बिषः॥ जपेद्रुद्रान्प्रयत्नेन दिवा नक्तं च भस्मधृक्॥ ४८॥ दिवा सूर्यं च पश्य
न्वै रात्रौ चंद्रं च वन्हिकं॥ ॥प्रमादादेकदा त्यक्त्वा शिवलिंगे शिवार्चनं॥ प्रायश्चित्तमकुर्वन्वै
नरकं पंचवत्सरं॥ ४९॥ अन्यथा तु परे तं जोविप्या भक्षं भुंति ष्ठति॥ यतिस्त्यक्त्वैकदा पूजां प्रण
वं तु सहस्रकं॥ ५०॥ प्रणवेन द्विगुणं पूजां कुर्यात्सस्मावगुंठितः॥ शिवपूजां न कुर्वन्यो फल

मूलांबुभोजनः॥५१॥ रेतोभक्षीपरेतोहिअंबुपःफलभुक्कृमीन्॥ अन्नभुक्यदिविप्राचीति
ष्ठत्यत्यंतसंकटं॥५२॥ वर्णानामाश्रमाणांचविधिःश्रुत्याप्रदर्शितः॥ काशीवासीतुनियमाद्दमे
दामरणेसदा॥५३॥ सर्वक्षेत्रोत्तमंतच्चयत्रविश्वेश्वरस्थितः॥ शिवोदेतश्चतुर्थोत्रसाक्षाल्लिंगे
प्रकाशते॥५४॥ विश्वेश्वराख्यंयल्लिंगंवेदवेदांतसंस्तुतं॥ तत्पूज्यंसर्वदासर्वैःबिल्वपत्रैश्च
सासतैः॥५५॥ स्नापयित्वाकापिलेनपयसालिंगमैश्वरं॥ विश्वेश्वराख्यंमुनयोब्रह्महापिविमु
च्यते॥५६॥ सुरापीनाकपिलेनदध्नाज्येनहिरण्यहृत्॥ मधुनागुरुदाराद्याश्चिलयासर्वजीव
हृत्॥ महाप्रस्थादिमानेनस्नापयेत्सर्वणीक्रमात्॥ तंडुलैश्चयवैर्दिव्यैस्तिलैःसंपूज्यशंकरं॥
५७॥ सर्वान्कामानवाप्नोतिसुरलोकेप्रमोदते॥ नित्यांतर्गृहयात्रांचकुर्याद्धर्मस्यधारकः॥५८॥
तत्रमूत्रपुरीषादिनकुर्यान्मोहतोपिच॥ तत्रप्राच्यांप्रतीच्यांचभैरवाःशूलपाणयः॥५९॥ रक्षंति
परितःक्षेत्रंपापिष्ठान्दारयंतिते॥ यमस्यसदनेकल्पंयद्दुःखंसमवाप्यते॥६०॥ ततोपिबहुधादुः
खंभैरवेघटिकात्रयं॥ तस्माद्दमेत्सुनियतंकाश्यांविभ्राविमुक्तये॥६१॥ विश्वेश्वरार्चनध्यानविही
नानांतत्रवासोनशस्यते॥ पंचाक्षरविहीनानांतत्रवा॥६२॥ भस्मरुद्राक्षहीनानांतत्र॥ प्रदो
षार्चनहीनानांतत्र॥६३॥ रुद्राध्यायविहीनानांतन॥ भूताष्टमीसोमवारविहीनानांदुरात्म
नां॥६४॥ अन्नपूर्णाक्षेत्रपालस्कंदविघ्नेशभैरवान्॥ पूजयेन्नियतंकाश्यांपंचक्रोशप्रदक्षि
णां॥६५॥ कुर्याद्दंतर्गृहाद्धीनपातकैश्चप्रमुच्यते॥ स्नायाद्गंगांभसिस्थित्वामणिकर्ण्यामथद्दि-

जाः॥६६॥ पश्येच्च नियतं तत्र विश्वेशं चान्नपूर्णिकां॥ एवं वसंतयातेवै मुक्तिं विंदति चोत्तमां॥६७
॥ ॥ श्रीस्कंद उवाच॥ ॥ एकाहमप्युषित्वा तां करार्चकोवियुक्तां सुतिष्ठेच्च शातं समानरः॥ यो वा
ज्ञानेोरेनपपातकी भवेदन्नाशनेो विटाकिमिभुक्परेनः॥६८॥ मायश्चित्तं न च चित्ते कलयति लटुदीये
नियमं चयेस्त कं मुंडं दंडयोनभवतिपरे तोयमभटैः॥ उपोष्यैवा सायाशि व मथयज्ञ ते द्विगुणितं अहो
भक्षेष्वर्थं ददति हि भवेत्सोत्र नियतः॥६९॥ ये कालकाले नियमात्त्रिकालं द्विकालमप्येकतरं च का
लं॥ संपूज्य काश्यां तु शिवार्चकाद्विजाः॥ कुर्युस्तेजावालगालनिष्क्रांतिं द्विजाः॥७०॥ उमाधारमाधव
मंबिकां गणं स्कंदं द्विजा भैरवदंडपाणिनं॥ गंगां चतुर्गंगान नमं तियेनरा स्तेपामरा भैरवयातना
रताः॥७१॥ चतुर्दश्यां काश्यां विधिनियतनक्ताशनरता शिवे भक्त्या युक्ता शिवभजनसक्ता हि
सुनराः॥७२॥ द्विजाः कालाष्टम्यां शशिशकलचूडार्चनरताः॥ लभंते देहांते शिवसदनम
ध्ये शिवजनाः॥७३॥ यो वा प्रदोषे निशि सोमवारे त्रिलोचनं पूजयते सधन्यः॥ वन्यैः किम
न्यैः नरजन्मगादिभिः॥ ॥ काश्यां च सामान्यनरैर्भैरैर्भुवः॥ ७४॥ काश्यां स्थित्वापि पापाः शि
वभजनहीना हि कुनराः महेशं विश्वेशं यदि सकृद्दशांते कमूलयेत॥ शंभुर्द्विश्वेशपादे यदि श्रीशिव
भजति काश्यां च निबसन् तथा न्नेपूर्णां वांछति च कृपापूर्णकलनां॥ समभ्यर्णाभिख्यातिकिल
कलिजजातेपि सुजने॥७५॥ कृपापात्रे यात्रां प्रतिदिनमपांतर्हि हरे त्रिनेत्रस्य प्रीतां न हि
चरति यात्यं धनमसि॥ तेमज्जयंत्यघगिरिं वरांगनीरे मज्जंति नो दयविधौ किल मज्जनाते॥७६॥

प्राज्ञांच मुक्तिपदवीं मदीयसीं तिसंप्राप्नुवंति गिरिजे विरजाभवंति॥ मुक्ताख्याकांताभजंति
नमुमांकांतरूपयाप्रदोषविशेषेण लोकोरक्तं दोषमहात्रीषभूषां गालिंगार्चकश्चैव॥ विशेषेण
दोषजा एव प्रमोक्षा न तस्यास्तिबुद्धेरशेषामरेऽयः॥ शक्ताविमुक्तेपिच देहसोरव्यमुक्ताविरक्तानं
महेशभक्ताः॥७८॥ सक्तांश्च धर्मेषुनन्नभक्ता वसुमेनात्रनरानमुक्ताः निवसेन्नियतोत्र भु
क्तिमुक्त्यै शिवनिवेशाहि गिरिष्ठ एषधर्मश्रुतिसीमंनविविधाय्यमेनन्याविमुचेदविमुक्तगोच
रिष॥७९॥ ॥ इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेप्रायश्चित्ताविमुक्तवासकथनं
षड्त्रिंशोध्यायः॥३६॥ ॥ श्रीमहादेवायनमः॥ ॥ श्रीईश्वरायनमः॥ ॥ ईश्वरउवाच॥
॥ शांत्यध्यायन्प्रवक्ष्यामि समाहितमनाशिवे॥ राजचोराग्निपीडासुग्रहभूतगदादिभिः॥१॥
पीडितानांशिवेशांत्येमयैवमनसाकृताः॥ ततः शृणु वदाम्यद्य सर्वपापक्षयायच॥२॥ अतः
परमिदंगुह्यं रुद्रेणोदीतंमहोदयं॥ महाविघ्नप्रशमनंमहाशांतिकरंशुभं॥३॥ अकालमृ
त्युशमनं सर्वव्याधिनिवारणं॥ परचक्रप्रमथनं सदाविजयवर्धनं॥४॥ स्तंभनं परसैन्य
स्यरिपुनाशकरं सदा॥ विषग्रहक्षयकरं मम स्वाभीष्टसाधकं॥ सर्वशांत्यधिकाराख्यं धर्मं
वक्ष्ये शृणुष्वतं॥ नागांकधारकं स्व्यक्षो नागयज्ञोपवीतवान्॥ चतुर्मुखश्चतुर्बाहुः सित
भस्मावगुंठितः॥६॥ वरोवरेण्योवरदोवामदेवोमहेश्वरः॥ त्रैलोक्यनमितश्रीमान्शां
तिं वाशु करोतु मे॥७॥ सर्वावयवमुख्येन गात्रेण तनुमध्यमा॥ पीतश्यामातिसौम्येनशिव

रूपेण शोभिना ॥ ८ ॥ ललाटतिलकोपेता चंद्ररेखार्धधारिणी ॥ दिव्यांबरधरा देवी सर्वाभरणभूषिता ॥ ९ ॥ वरस्त्री सर्वनारीणां शोभागुणमहास्पदा ॥ भावमात्रसंतुष्टा उमादेवी वरप्रदा ॥ १० ॥ साक्षादागत्य रूपेण शांतेनामिततेजसा ॥ शांतिं करोतु मे प्रीता भक्तानां भक्तवत्सला ॥ पद्मरागद्युतिः सौम्या रक्तमाल्यानुलेपनः ॥ अबालो बालरूपेण षण्मुखः शिखिवाहनः ॥ १२ ॥ पूर्णेंदुवदनः सौम्यस्त्रिशिखा शक्तिसंयुतः ॥ कृत्तिकामातृरुद्राणां भंगोद्भूतः सुरार्चितः ॥ १३ ॥ कार्तिकेयो महातेजा वरदानैकतत्परः ॥ शांतिं करोतु मे प्रीतो बलं सौख्यं च सर्वदा ॥ १४ ॥ श्वेतवस्त्रपरीधानः श्मश्रुलः कनकप्रभः ॥ शूलपाणिर्महाप्राज्ञो नंदीशः शिवभावितः ॥ १५ ॥ शांतिं करोतु मे शांतो धर्मे च मतिमुक्तवान् ॥ महोदरो महाकायो स्निग्धांजनसमप्रभः ॥ १६ ॥ एकदंष्ट्रोत्कटो देवो गजवक्त्रो महाबलः ॥ नागयज्ञोपवीती च नागाभरणभूषितः ॥ १७ ॥ सर्वार्थसंपदाधारो गणाध्यक्षो वरप्रदः ॥ रुद्रस्य तनयो देवो नायको ऽप्यविनायकः ॥ १८ ॥ करोतु मे महाशांतिं कर्मसिद्धिं च सर्वदा ॥ इंद्रनीलनिभः स्वच्छो दीप्तशूलायुधोद्यमः ॥ १९ ॥ रक्तांबरधरः श्रीमान् रक्तांगो नागभूषणः ॥ पापनोदनसंभूतः स्वलक्ष्मीमलनाशनः ॥ २० ॥ करोतु मे महाशांतिं महाकालो महाबलः ॥ पीतांबरपरीधाना कन्यारूपा स्वलंकृता ॥ २१ ॥ गणनाथांबिका त्र्यक्षगुण्या गौरी सुरेश्वरी ॥ सर्वसिद्धिप्रदा देवी प्रसादपरमा परा ॥ २२ ॥ शांतिं करोतु मे शांतिसिद्धिमाशु प्रयच्छतु ॥ सिंहस्थामीनवर्जेन महिषासुरमर्दिनी ॥ २३ ॥ धनुश्चक्रप्रहरणा शंखपद्मासिधारिणी ॥

आर्त्तजनेऽघनाकार सर्वोपद्रवनाशिनी॥२४॥ सर्वमंगलमालामेशिव माश्रु गय च्छतु॥ निर्मा
मेन शरीरेण मुक्त्याद्यच्छिन्नि बंधनं॥२५॥ अतिसूक्ष्मो निर्विकांतस्त्र्यक्षो भंशिशिटिर्महान्॥
रूद्रात्मजो रूद्रवीरो रूद्रैकगतमानसः॥ २६॥ सोपि शांतात्मभावेन शांतिमाशु करोतु मे॥ प्र
चंडगणसैन्येशो महाटंकास्त्रधारकः॥ २७॥ अक्षमालार्पितकरः त्र्यक्षश्चंडेश्वरप्रभुः॥ प्रचंड
पापहरणो ब्रह्महत्यादिशोधकः॥२८॥ करोतु मे महायोगी कल्याणं परमं शुभं॥ पद्मासनः प
द्मनिभः चतुर्वदनपंकजः॥२९॥ कमंडलुधरः श्रीमान् देवगंधर्वपूजितः॥ शिवं ध्यानैकनिरतः
शिवसद्भावभावितः॥३०॥ ब्रह्मशब्देन दिव्येन ब्रह्मशांतिं करोतु मे॥ शंखकुंदेंदुवर्णाभः कंठेम
रकतप्रभः॥ ३१॥ अक्षमालासरोगस्तशिवज्ञाने व्यवस्थितः॥ चतुर्मुखश्चतुष्पाद्स्त्रिनेत्रः स
र्वतोज्ज्वलः॥ ३२॥ क्षितेःपतिर्वृषो देवो धर्मो धर्मोत्तमोत्तमः॥ ईशांव हंतिपृष्ठेन तस्माद्धर्मो जगत्प्र
भुः॥३३॥ वृषो वृषपतिः श्रीमान् देवगंधर्वपूजितः॥ शिवध्यानैकसंपन्नः शिवसद्भावभावितः॥
॥३४॥ वृषशब्देन दिव्येन वृष शांतिं करोतु मे॥ तार्क्ष्यासनश्चतुर्बाहुः शंखचक्रगदाधरः॥३५॥ श्या
मःपीतांबरधरो वनमालाविभूषितः॥ यशोदेवोत्तमो देवो माधवो मधुसूदनः॥३६॥ शिवप्रसाद
संपन्नः शिवध्यानपरायणः॥ शिवार्चनरतो नित्यं विष्णुशांतिं करोतु मे॥ ३७॥ पद्मरागप्रभा दे
वी चतुर्वदनपंकजा॥ अक्षमालार्पितकरा कमंडलुधरा शुभा॥ ३८॥ ब्रह्माणी सौम्यवदना शिव
पूजापरायणा॥ शांतिं करोतु मे प्रीता ब्रह्मशब्देन निर्मला॥ ३९॥ मयूरवाहना देवी सिंदूरा

रूपाविग्रहा॥ शक्तिहस्ता महारूपा सर्वाभरणभूषिता॥४०॥ रुद्रभक्ता महापुण्या रुद्रार्चनर
ता सदा॥ कौमारी वरदा देवी क्षेमारोग्यं ददातु मे॥४१॥ शंखचक्रगदाहस्ता श्यामा पीतांबरप्रि
या॥ चतुर्भुजा तार्क्ष्यरथा वैष्णवी सुरपूजिता॥४२॥ शिवार्चनरता भक्ता रुद्रैकगतमानसा॥ शांतिं
करोतु मे नित्यं सर्वासुरविमर्दनी॥४३॥ हिमशैलनिभा देवी महावृषभवाहिनी॥ त्रिशूलहस्त
वरदा नानाभरणभूषिता॥४४॥ रुद्रभक्ता महावीर्या रुद्रार्चनरता सदा॥ चतुर्भुजा चतुर्वक्त्रा
त्रिनेत्रा पापहारिणी॥४५॥ आर्तिं हरतु मे प्रीत्या माहेशी नित्यमुज्वला॥ वराहघोषविकटा वराह
वरवाहना॥४६॥ श्यामांगा वरदा देवी शंखचक्रगदाधरा॥ तर्जयंती सदा विघ्नान् अर्चयति सदाशि
वं॥४७॥ वाराहि वरदे देवि क्षेमारोग्यं ददातु मे॥ ऐरावतगजारूढा वज्रहस्ता महाबला॥४८॥
नेत्राणां च सहस्रेण भूषिता कनकप्रभा॥ ऐंद्री देवी सदाकाली कांतिमाशु करोतु मे॥४९॥ ऊर्ध्व
केशोत्कटाशामा निर्मांसा हस्तास्नुवेधना॥ करालवदना घोरा खड्गघंटावरोध्वला॥५०॥ कपाल
मालिनी देवी क्रूरा खट्वांगधारिणी॥ आरक्तपिंगनयना गजचर्मावगुंठिता॥५१॥ नानानागपरी
तांगी प्रेतोपरिनिवासिनी॥ शिवरूपेण घोरेण शिवाराव भयंकरी॥५२॥ चामुंडा चंडरूपेण चि
त्रा यंत्रासनेन तु॥ भूतप्रेतपिशाचेभ्यो मम रक्षां करोतु सा॥५३॥ आकाशमातरो दिव्यस्तथा भू
लोकमातरः॥ भूतानां मातरः सर्वास्तथान्याः पितृमातरः॥५४॥ सर्वे मातृगणा देव्याः स्वायुधव्यग्र
पाणयः॥ जगद्व्याप्यावस्थिताः त्वा बलिकामा महोदयाः॥५५॥ रुद्रभक्ता महावीर्या रुद्रार्चनपरास-

दा॥ शांतिं कुर्वंतु मे नित्यं मातरश्च सुपूजिताः॥ ये रुद्रा रौद्रकर्माणो रुद्रस्थाननिवासिनः॥ सौ
म्याश्चैव तु ये केचित्सौम्यस्थाननिवासिनः॥ मातरो रुद्ररूपाश्च गणनामाधिपाश्च ते॥ विघ्न
भूतास्तथा चान्ये दशादिक्षु समाश्रिताः॥ ५७॥ सर्वे सुप्रीतमनसः प्रतिगृह्णंत्विमं बलिं॥ ॥
श्रीईश्वर उवाच॥ ॥ महां मह्यं च शांतिसुनततिधनगोवाजिमातंगयूथेराष्ट्रे ग्रामे पुरे वा सु
विहितमधुना शांतिदा संतु सर्वाः॥ सर्वे शर्वार्चनायां यमनियमरताः पांतु मां सर्वकाले नित्यं प्री
तास्सदा मां शिवपदनिरताः पांतु मां सर्वदेवाः॥ ५८॥ ॥ ॥ इति श्रीशिवरहस्ये महादेवाख्ये
एकादशांशे शांत्याध्यायो नाम सप्तत्रिंशोध्यायः॥ ३७॥ ॥ श्रीमहादेवाय नमः॥ ॥ श्रीस्कं
द उवाच॥ ॥ सिद्धिं पुष्यंतु मे नित्यं भयेभ्यः पांतु मां सदा॥ ऐंद्र्यां दिशि गणा ये तु वज्रहस्ता
महाबलाः॥ १॥ सुपीताक्षा पीतनिभास्तथैव पीतलोहिताः॥ दिव्यांतरिक्षभौमाश्च पातालतल
वासिनः॥ २॥ रुद्रार्चनरता नित्यं शांतिं कुर्वंतु मे सदा॥ आग्नेय्यां ये गणा सर्वे शक्तिहस्ता निषं
गिणः॥ ३॥ सुरक्ताक्षासुरनिभास्तथा वै पीतलोहिताः॥ दिव्यांतरिक्षभौमाश्च पातालतलवा
सिनः॥ ४॥ रुद्रार्चनरता नित्यं शांतिं कुर्वंतु मे सदा॥ आग्नेय्यां ये गणास्सर्वे शक्तिहस्ता नि
षंगिणः॥ ५॥ शिवप्रणामपरमाः शांतिं कुर्वंतु मे सदा॥ याम्यां दिशि गणा ये तु सततं दंडपा
णयः॥ ६॥ सुकृष्णाक्षाः कृष्णनिभाः तथा वै कृष्णलोहिता॥ परमेशार्चनरताः शांतिं कुर्वंतु मे
सदा॥ ७॥ निर्ऋत्यां ये गणाः सर्वे राक्षसा खड्गपाणयः॥ सुनीलाक्षा नीलनिभास्तथा वै नील

लोहिताः॥ ९॥ दिव्यं॰ (तरिक्षभौमाश्च) परमेशार्चनरताः शांतिं कुर्वंतु मे सदा॥ रंध्रैकध्यान
निरताः शांतिं कुर्वंतु मे सदा॥ वारुण्यां ये गणाः सर्वे सततं पाशपाणयः॥ ९॥ संत्रपामाश्यामाः श्याम
निभास्तथा श्यामलोहिताः॥ दिव्यांतरिक्षभौमाश्च पातालतलवासिनः॥ पर॰॥ वायव्यां ये गणाः
सर्वे सततं ध्वजपाणयः॥ सुधूम्राक्षा धूम्रनिभास्तथा वै धूम्रलोचनाः॥ ११॥ दिव्यं॰॥ शिवभ
क्तिपराः सर्वे क्षेमं कुर्वंतु मे सदा॥ १२॥ कौबेर्यां ये गणाः सर्वे सततं निधिपाणयः॥ सपीताक्षा पी
तनिभाः तथा वै पीतलोहिताः॥ १३॥ दिव्यं॰॥ शिव॰॥ ऐशान्यां ये गणाः सर्वे सततं शूलपाण
यः॥ सुसूक्ष्माक्षाः सूक्ष्मनिभास्तथा वै सूक्ष्मलोहिताः॥ १५॥ दिव्यं॰॥ रुद्रप्रणामपरमाः शांति॰॥
१६॥ अथोर्ध्वभागे गणा ये तु सततं चक्रपाणयः॥ सुधूम्राक्षा धूम्रनिभास्तथा वै धूम्रलोहिताः॥
॥ १७॥ दिव्या॰॥ शिव॰॥ १८॥ अधोभागे गणा ये तु सततं चक्रपाणयः॥ सुधूम्राक्ष धूम्रनिभास्त
था वै धूम्रपाणयः॥ सुपद्माक्षाः पद्मनिभाः तथा वै पद्मलोहिताः॥ १९॥ दिव्यं॰॥ शिवपूजासमा
युक्ताः शांतिं कुर्वंतु मे सदा॥ २०॥ एते गणा महात्मानो महाबलपराक्रमः॥ शिवं संपूज्य यत्नेन
स्वं स्वं पदमवापिरे॥ २१॥ ततः सप्रीतमनसः शांतिं कुर्वंतु मे सदा॥ ततस्तु प्रीतमनसः शांतिमा
युर्बलं श्रियं॥ २२॥ प्रयच्छंत्वाशु मर्त्यानां तत्भक्तानां विशेषतः॥ नाम्नाऽमरावती पूज्या पूर्वभा
गे या व्यवस्थिता॥ २३॥ विद्याधरगणाकीर्णा सिद्धगंधर्वसेविता॥ रत्नप्राकाररचिता महारत्नोपशो
भिता॥ २४॥ तत्र देवपतिः श्रीमान् यज्ञहस्तो महाबलः॥ नेत्राणां तु सहस्रेण शोभनेन विराजितः॥

॥२५॥ ऐरावतगजारूढो हेमवर्णो महाद्युतिः ॥ देवेंद्रः परमो हृष्टः परमेशार्चने रतः ॥ शिव
ध्यानैकसंपन्नः शिवभक्तिपरायणः ॥ शिवभक्तैस्तथा चान्यैर्देवैरिह महानुजैः ॥२७॥ शिवप्रणा
मपरमः करोतु मम शांतिकं ॥ आग्नेय्यां दिशोभागे पुरी तेजोवती शुभा ॥ २८॥ नानादेवसमाकी
र्णा रत्नज्वालासमाकुला ॥ तत्र ज्वालापरीतांगो दीप्तांगारसमद्युतिः ॥ २९॥ भूतिरुद्धो हि नादे
वोज्वलनः पापनाशनः ॥ शिवपूजासमायुक्तः शिवधारणभावितः ॥ ३०॥ शांतिं करोतु मे देवो न
ष्टपापपरिक्षयं ॥ वैवस्वतपुरी नाम्ना दक्षिणस्यां व्यवस्थिता ॥ ३१॥ लोहप्राकारसंयुक्ता प्रासा
दैर्गोपुरैः शुभाः ॥ सुरासुरनानानीकपित्रयक्षोरगालयः ॥ ३२॥ तत्रेंद्रनीलसंकाशो रत्नस्रग्व
स्त्रभूषणः ॥ दंडहस्तो पापिनां च भयदो शिवार्चितकः ॥ ३३॥ शांतिं करोतु सततं शमनो यमरा
ड् सदा ॥ नैऋत्यां दिशि रक्षोपलोकराक्षससंयुतः ॥ ३४॥ खड्गपाणिर्महातेजा करालवद
नोज्वलः ॥ ॥ राक्षसेंद्रश्च निर्ऋतिः शिवार्चनरतः सदा ॥ करोतु मे महाशांतिं शिवभक्तिसमु
त्सुकः ॥३५॥ पश्चिमे तु दिशोभागे पुरी शुद्धवती शुभा ॥ नानारत्नसमाकीर्णा नानार्कैं लरसे
विता ॥ ३६॥ तेजप्रकाशापर्यंतानिरोपम्यां सदोज्वलां ॥ तत्र मौक्तिकसंकाशो परिपिंगल
लोचनः ॥ ३७॥ श्वेतवस्त्रपरीधानः पाशहस्तो महाद्युतिः ॥ वरुणः परया भक्त्या शिवे वाहि
तमानसः ॥ ३८॥ रोगशोकार्तिसंतापं विनाशयतु मे सदा ॥ वायव्ये तु दिशोभागे पुरी गंधवती
शुभा ॥ ३९॥ ऋषिसिद्धगणाकीर्णा हेमप्राकारतोरणा ॥ तथा धूम्रेण देहेन कृष्णपिंगललो

चनः ॥ ४०॥ श्वेतवस्त्रपरीधानः पाशहस्तोमहाद्युतिः ॥ पट्याप्रांतरालीनोध्वजपस्यायुपोज्वला ॥ पवनः परमोदेवः परमेश्वरभाविनः ॥४१॥ क्षेमारोग्यंबलंशांतिंकरोतुममसर्वदा ॥ महोदयानामपुरीउत्तरेणव्यवस्थिता ॥४२॥ अनेकयक्षसंकीर्णानानारत्नोपशोभिता ॥ तत्रदेवोगदाहस्तश्चित्रस्रग्वस्त्रभूषणः ॥४३॥ ह्रस्वबाहुर्महातेजाः परिपिंगललोचनः ॥ कुबेरश्रीमुखश्रीमान्हरपादार्चनेरतः ॥४४॥ शांतिंकरोतुमेप्रीतः शांतःशांतेनचेतसः ॥ यशोवतीपुरीरम्याईशान्यांदिशिसंस्थिता ॥४५॥ नानागणसमाकीर्णानानारूतसुरालया ॥ तेजोप्राकारपर्यंतानिरूपम्यगुणान्विता ॥४६॥ तत्रमौक्तिकसंकाशः शशांककृतशेखरः ॥ त्रिनेत्रः शांतरूपात्माद्यक्षमालाधरोहरः ॥ ४७॥ ईशानः परमोदेवोशिवध्यानेकतत्परः ॥ सोपिसर्वात्मभावेनशांतिमाशुकरोतुमे ॥ ४८॥ शांताः शिवार्चनरताः शिवपादसक्ताशाक्तस्वरगवभुवनेषुसदेवमुक्ताः ॥ युक्ताः मखायुतफलैर्वरभस्मभूषारुद्राक्षवक्षसइमेशिवलिंगभक्ताः ॥ ४९॥ ॥ इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेशांतिध्यायोनामअष्टत्रिंशोध्यायः ॥ ३८ ॥ ॥ श्रीमहादेवायनमः ॥ श्रीईश्वरउवाच ॥ भूलोकेचभुवर्लोकेस्वर्लोकेचवसंतिये ॥ देवादिव्यप्रभायुक्ताशांतिंकुर्वंतुमेसदा ॥ १॥ महर्लोकेजनोलोकेतपोलोकेचयेस्थिताः ॥ तेतुप्रमुदितादेवाशांतिंकुर्वंतुमेसदा ॥२॥ सत्यलोकेचयेदेवाः प्रभाज्वलितविग्रहाः ॥ शिवभक्तासुमनसः भयार्तिनाशयंतुमे ॥ ३॥ तपोलोकेचयेदेवाः शुभ्रस्फटिकविग्रहाः ॥ रुद्रभक्तामहात्मानः शिवंकुर्वंतुमेसदा ॥ ४॥ जनोलोके

चयेदेवाधौतस्वामीकरप्रभाः॥ ईशानं प्रणतानित्यं शांतिं कुर्वंतु मे सदा॥५॥ महर्लोके च ये देवा वि
मानोज्वलसंस्थिताः॥ भवप्रणामपरमा नाशयंतु भयं सदा॥ ६॥ भुवर्लोके च ये देवाः दीप्तिमंतो महा
बलाः॥ शंकरं प्रणतानित्यं कुर्वंतु विजयं मम॥ ७॥ भूर्लोके च ये देवा भासयंति दिशो दश॥ शिवैक
शरणा देवा पापं प्रशमयंतु मे॥ ८॥ गिरिकंदरदुर्गेषु मुनयो निवसंति ये॥ रुद्रार्चनरता नित्यं
शांतिं कुर्वंतु मे सदा॥ ९॥ शरच्चंद्रांशुगौरेण देहेनामिततेजसा॥ सरस्वती शिवे भक्ता शांतिमा
शु करोतु मे॥ १०॥ चारुचामीकरप्रख्यसरोजकरपल्लवा॥ शिवभक्ता च श्रीदेवी श्रीमद्भूतिं द
दातु मे॥ ११॥ चारुणा मुखचंद्रेण विचित्रकनकोज्वला॥ जयादेवी शिवे भक्ता सर्वान्कामान्ददा
तु मे॥ १२॥ हारेण सुविचित्रेण भास्वत्कनकमेखला॥ पराजिता रुद्रभक्ता करोतु विजयं स
दा॥ १३॥ सिंदूरारुणवर्णेन देहेनायतलोचना॥ सहस्रकिरणः श्रीमान् सप्तसप्तिकवाहनः॥ १४
गभस्तिमाली भगवान् शिवपादार्चने रतः॥ करोतु मे महाशांतिं ग्रहपीडानिवारणे॥ १५॥
जगदाप्यायनकरो ह्यमृतांशुः सशीतलः॥ सोमः सौम्येन भावेन ग्रहपीडां व्यपोहतु॥ १६॥ पद्मरा
गेण देहेन देवः पिंगललोचनः॥ अंगारकस्तु सततं रुद्रपूजापरायणः॥ १७॥ रुद्रसद्भावसंप
न्नो रुद्रध्यानैकतत्परः॥ ग्रहपीडाभयं सर्वं विनाशयतु मे सदा॥ १८॥ कुंकुमच्छविना श्रीमान्
श्रीमान् देहेन पिंगलः॥ बुधोपि शिवधामात्मा ग्रहपीडां व्यपोहतु॥ १९॥ तप्तचामीकराभासः
सर्वज्ञानसुधालयः॥ बृहस्पतिः सदाकालमीश्वरार्चनतत्परः॥ २०॥ सोपि शांतात्मचित्तेन तु

परमेणसमाधिना॥ ग्रहपीडां विनिर्जित्य करोतु विजयं मम॥२१॥ हिमकुंदेंदुतुल्याभः कांत्या देवेंद्र
पूजितः॥ शक्रः शिवार्चको नित्यं ग्रहपीडां व्यपोहतु॥२२॥ भिन्नांजनसमच्छायास्तु रक्तनयनद्यु
तिः॥ शनैश्चरः शिवभक्तो ग्रहपीडां व्यपोहतु॥२३॥ धूम्रायमाणः सततं सर्वोत्पातसमन्वितः॥ नी
लांजनसमः श्रीमान् सैंहिकेयो महाद्युतिः॥ २४॥ शिवपूजारतो राहुः ग्रहपीडां व्यपोहतु॥ धू
म्रायमाणः सततं॰॥ २५॥ नीलां॰॥ शिवार्चनरतः केतुर्ग्रहपीडां व्यपोहतु॥२६॥ एते ग्रहा महा
त्मानः शिवार्चनपरायणाः॥ शांतिं कुर्वंतु मे हृष्टाः सदा कालं हितैषिणः॥२७॥ मुखे यस्य स्थि
तो मृत्युः पुच्छे नीम महाबलः॥ सुमुखीवि घ्नकारी च पुच्छे च विजयंकरी॥ २८॥ रुद्रप्रणामप
रमा शांतिमाशु करोतु मे॥ तृतीया सप्तमी चैव दशमी च चतुर्दशी॥२९॥ चतुर्थी चाष्टमी चैव ए
कादशी च पूर्णिमा॥ एता विघ्नकरा भक्ताः शुक्लकृष्णासमुद्भवाः॥३०॥ भवंतु मे श्रियै नित्यं कुर्वंतु
विजयं सदा॥ अमावास्या महापुण्या पितृदेवसमन्विता॥ ३१॥ प्रियाद्येषा तु परमा शिवस्य परमा
त्मनः॥ शिवतेजः समायुक्ता करोतु मम शांतिकं॥ ३२॥ प्रतिपद्वह्निसंयुक्ता द्वितीया विधिदेव
ता॥ तृतीया च महाभागा धनदेन समन्विता॥ ३३॥ चतुर्थी च महापुण्या गजवक्त्राधिदेवता पं
चमी नागदेवत्या षष्ठी स्कंधाधिदेवता॥ ३४॥ सप्तमी तु रविसंयुक्ता अष्टमी रुद्रसंयुता॥ नवमी
तिथिरत्युग्रा दुर्गादेव्यादिदेवता॥ ३५॥ दशमी धर्मसंयुक्ता रुद्रेणैकादशी युता॥ द्वादशी वि
ष्णुसंयुक्ता मदनेन त्रयोदशी॥ ३६॥ चतुर्दशी महेशेन पूर्णिमा तु हिमांशुना॥ एतास्तु तिथयः

स्सर्वाः ईशानार्चनतत्पराः॥३७॥ शांतिं कुर्वंतु मे नित्यं सदा कालं हि तेषिणः॥ विष्कंभ प्रीतिरा
युष्मान सौभाग्यं शोभनं तथा॥ ३८॥ अतिगंड सुकर्मा च धृतिः शूलस्तथैव च॥ ३९॥ गंडो वृद्धिध्रु
वश्चैव व्याघातो हर्षणस्तथा॥ वज्रं सिद्धि र्व्यतीपातो वरीयान्परिघः शिवः॥ सिद्धिसाध्यः शुभं शुक्लो
ब्रां ह्मोमाहेंद्रवैधृतिः॥ इंद्रस्य भानोरुत्पन्ना ह्येते योगा महाबलाः॥४१॥ शिवभक्तियुताः सर्वे शि
वभक्तिविधायिनः॥ शांतिं कुर्वंतु मे नित्यं शिवध्यानपरायणः॥४२॥ कृत्तिका परमा देवी रोहिणी रु
चिराननाः॥ श्रीमान्मृगशिरा भद्रा आर्द्रा च परमोज्वला॥४३॥ पुनर्वसुस्तथा पुष्य आश्लेषा च महो
ज्वला॥ नक्षत्रमातरो ह्येताः प्रभामालावभास्कराः॥४४॥ महादेवार्चनरता महादेवानुभावितः॥
पूर्वभागे स्थिताश्चैता शांतिं कुर्वंतु मे सदा॥४५॥ मघा सर्वगुणोपेता पूर्वा चैव तु फल्गुनी॥ उत्त
रा फाल्गुनी श्चैव हस्तश्चित्रा रथोत्तमा॥४६॥ स्वाती विशाखा वरदा दक्षिणस्थानसंस्थिता॥
अर्चयंत्यः सदा कालं देवं त्रिनयनं प्रभुं॥४७॥ ममापि शांतिं चैवैताः कुर्वंतु शिवचोदिताः॥
अनुराधा तथा ज्येष्ठा मूला बुद्धिसमन्वितं॥४८॥ पूर्वाषाढा महावीर्या आषाढा चोत्तरां शुभा॥
अभिजिन्नाम नक्षत्रं श्रवणं परमोत्तमं॥४९॥ एताः पश्चिमतो दीप्ता राज्यं त्यः श्वारुमूर्तयः॥
ईशानं पूजयंत्यस्ता सार्वकालं सुभेः शिवे॥५०॥ प्रशांतिं मम कुर्वंति विभूतिं च समाहिताः॥ धनिष्ठा
शतभिषा श्चैव पूर्वाभाद्रपदा तथा॥५१॥ उत्तराभाद्र रेवत्या अश्विनी च महार्थिका॥ भरणी च महा
वीर्या नित्यमुत्तरतः स्थिताः॥५२॥ शिवार्चनरता नित्यं शिवध्यानैकमानसाः॥ शांतिं कुर्वंतु मे

नित्यंसर्वकालंसुखोदयः॥५३॥ अथमेषोमगाधीशोधनुर्दीप्तिमतांवरः॥पूर्वेणभासयंतेनेशिव
पूजापरायणाः॥५४॥ शांतिंकुर्वंतुमेनित्यंबलंसौभाग्यमेवच॥ वृषःकन्याचवरदामकरश्चमहा
र्थिकः॥५५॥ हरपादरतानित्यंशिवभावेनभाविताः॥ एतेदक्षिणदिक्संस्थापूजयंतिसदाशिवं॥५६॥
भक्त्याचपरयानित्यंशांतिंकुर्वंतुमेसदा॥मिथुनंचतुलाकुंभोपश्चिमस्यांदिशिस्थिताः॥५७॥
शिवपादार्चनरताःशांतिंकुर्वंतुमेसदा॥कर्कटोवृश्चिकोमीनोह्येतावुत्तरतःस्थिताः॥५८॥ पूजं
त्येनेमहाकालंरुद्रंभुवननायकं॥शांतिंकुर्वंतुमेनित्यंशिवज्ञानविधायिनः॥५९॥ ऋषयःसप्त
विख्याताध्रुवांताःपरमोज्वलाः॥भस्मरुद्राक्षभूषाढ्याःत्रिपुंड्रपरिमंडिताः॥६०॥ शिवलिंगा
र्चनपराःत्रिकालमभितोजसः॥ कश्यपोगालवोगार्ग्योविश्वामित्रोमहामुनिः॥६१॥ भृगुर्दक्षोव
सिष्ठश्चमार्कंडपुलहः क्रतुः॥ नारदोमनुरत्रिश्चभरद्वाजोंगिरामुनिः॥६२॥ वाल्मीकोकौशि
कः कर्णःशाकल्योथपुनर्वसुः॥शालंकायनइत्याद्यामुनयोथतपस्विनः॥६३॥ शिवार्चनरतानि
त्यंशांतिंकुर्वंतुमेसदा॥ ऋषिपत्न्योमहाभागाःऋषिकन्याकुमारकाः॥ ६४॥ शिवार्चनरतानित्यं
शांतिंकुर्वंतुमेसदा॥कुर्वंतुशांतिंविविधाःसुरोत्तमाःशिवार्चकाभस्मत्रिपुंड्रभूषिताः॥लिंगा
३ मुक्ता चकाःशाश्वतधर्मयुक्ताःभवंत्वेवशिवप्रसादात॥६५॥ ॥इतिश्रीशिवरहस्येमहादेवाख्येए
कादशांशेशांतिध्यायोएकोनचत्वारिंशोध्यायः॥३९॥ ॥श्रीमहादेवायनमः॥ ॥ श्रीशिव
श्रीईश्वरउवाच॥ ॥सिद्धाश्चगुह्यकपसोगंधर्वाप्सरसांगणाः॥विद्याधरामहात्मानोग

रुद्रश्च महार्थिकाः ॥१॥ महेश्वरपरा ह्येते महेश्वरपदार्चकाः॥ सिद्धिमाशु प्रयच्छंतु शिवधर्मपरा
यणाः ॥२॥ नमुचिर्दैत्यराजेंद्रः शंभुपूजापरायणः॥ महानादोपि विख्यातो दैत्यः परमवीर्यवा
न्॥३॥ हाटकेश्वरदेवस्य नित्यं पूजापरायणः॥ बलं वीर्यं च मे क्षिप्रं प्रयच्छंतु महार्थिकाः॥४॥
महाजंभो हयग्रीवो प्रल्हादो दैत्यपुंगवः॥ तारकाग्निमुखो दैत्याः कालनेमी महाबलः॥५॥
एते दैत्या महात्मानः शिवसद्भावभाविनाः॥ पुष्टिं बलं तथा वीर्यं प्रयच्छंतु च मे सुखं॥ वैरोच
नो हिरण्याक्षः सुपर्वा च सुलोमकः॥ मुचुकुंदः मुकुंदश्च दैत्यो रोचनकस्तथा॥७॥ भावेन प
रमेणाशु यजंतां सर्वदा शिवं॥ सततं शिवभावेन पुष्टिं कुर्वंतु मे सदा॥८॥ आरक्तेन शरीरेण रक्ता
तायतलोचनः॥ महाभोगकृताटोपश्शंखाब्जकृतलांछनः॥९॥ अनंतो नागराजेंद्रः शिवपादा
र्चने रतः॥ महापापविषं हत्वा शांतिमाशु करोतु मे॥१०॥ सुश्वेतेन शरीरेण सुश्वेतोत्पलशेख
रः॥ चारुभोगकृताटोपचारुहारविभूषणः॥११॥ वासुकी नागराजेंद्रः शिवपादार्चने रतः॥
सर्वरोगविषं हत्वा क्षेमारोग्यं ददातु मे॥१२॥ अतिपीनेन देहेन प्रस्फुरद्भोगसंपदा॥ तेजसा चा
निदीप्तेन कृतस्वस्तिकलक्षणः॥१३॥ नागेंद्रस्तक्षकः श्रीमान्नागकोट्या समन्वितः॥ करो
तु मे महाशांतिं सर्वसर्पविषापहं॥१४॥ अतिकृष्णेन देहेन स्फुरद्विकटमस्तकः॥ कंठे शरवात्र
योपेतो घोरदंष्ट्रायुतोघनः॥१५॥ कर्कोटको महातेजा विषदर्पसमन्वितः॥ विषशस्त्रादि
संतापं हत्वा शांतिं करोतु मे॥१६॥ पद्मवर्णेन देहेन पद्मपत्रायतेक्षणः॥ पद्मबिंदुकृताभासो

ग्रीवायांमेकरेरवया॥१७॥ख्यातःपद्मोमहानागोहरपादार्चनेरतः॥करोतुमेमहाशांतिंमहा
पापविषक्षयं॥१८॥पुंडरीकनिभेनापिदेहेनाभिततेजसा॥शंखमूलाब्जरुचिरैर्भूषितोमूर्धि
बिंदुभिः॥१९॥महापद्मोमहानागोहरपादार्चनेरतः॥निहत्यविषघोरंशांतिमाशुकरोतुमे
॥२०॥अतिगौरेणदेहेनचंद्रार्कारुतत्रोरवरः॥दीप्तभोगरुतटोपःशंभुलक्षणलक्षितः॥२१॥
धृयामेनदेहरागेणश्रीमान्कमललोचनः॥विषदर्पबलोपेतोग्रीवायामेकरेरवया॥२२॥शंख
पालश्रियादीप्ताशिवपादाब्जपूजकः॥महाविषंमहाघोरंशांतिमाशुकरोतुमे॥२३॥गुलिकोना
गराजेंद्रोनित्यंहरपरायणः॥अपहृत्यविषंघोरंकरोतुविषशांतिकं॥२४॥अंतरिक्षचरानागाः
येनागाःभुविसंस्थिताः॥पातालेसंस्थितानागाःसर्वेप्यत्रसमन्विताः॥२५॥रुद्रपादार्चनोद्युक्ताः
शांतिंकुर्वंतुमेसदा॥नागिन्योनागकन्याश्चतथानागकुमारिकाः॥२६॥शिवभक्ताःसुमनसः
शांतिंकुर्वंतुमेसदा॥यइदंनागसंस्थानंकीर्तयेद्वाशृणोतुवा॥२७॥ततनागाविहिंसंति
विषंनाक्रमतेतथा॥गंगापुण्यामहादेवीयमुनानर्मदानदी॥२८॥गौतमीचापिकावेरीव
रुणादेविकातथा॥सर्वभूतपतिंदेवंपरमेशंमहेश्वरं॥२९॥पूजयंतिसदातेदासदातद्भाव
मास्थिताः॥शांतिंकुर्वंतुमेनित्यंसदापापपरिक्षयं॥३०॥चंद्रभागामहापुण्यानदीगोदावरीशुभा
॥शरयूर्गंडकीश्रेष्ठाकौशिकीचसरस्वती॥३१॥पंपावेगवतीपुण्याश्रेष्ठाविष्णुनदीतथा॥
एतानद्योमहाभागाशिवपादार्चनेरताः॥ ३२॥शांतिंकुर्वंतुमेप्रीताःशिवध्यानैकमानसाः॥

नै रंजनानामनदी शोणश्चापिमहानदः ॥३३॥ मंदाकिनीच परमा लयासंनिहिताः शुभाः ॥ एता

श्चान्यो महानद्यो भूतिदिव्यं नरिक्षगाः ॥३४॥ रुद्रार्चनपरानघः कुर्वंतु मम शांतिकं ॥ गुप्तानिया

नितीर्थानिआ समुद्रात्सरांसिच ॥ ३५॥ कुर्वंतु शांतिकं नानि कीकटाधिष्ठितानिच ॥ महावैश्रव

णोदेवः यक्षराजोमहाधिकः ॥ ३६॥ यक्षकोटिपरीवारः यक्षसंख्येयसंयुतः ॥ महाविभवसंपन्नो

हरपादार्चनेरतः ॥३७॥ शांतिं करोतु मे प्रीतः पद्मपत्रायतेक्षणः ॥ मणिभद्रो महायक्षः मणिरत्ना-

विभूषितः ॥ ३८॥ मनोहरेण हारेण कंठलग्नेन राजते ॥ शिवध्यानपरो नित्यं शिवपादाब्जपूजकः ॥

शांतिं करोतु मे नित्यं सर्वरोगनिवारणं ॥ यक्षिणीयक्षकन्याभिः परिवारितविग्रहा ॥ ४०॥ रु

द्रार्चनरतानित्यं करोतु मम शांतिकं ॥ सुवीरोनाम यक्षेंद्रो मणिकुंडलभूषणः ॥४१॥ ललाटहे

मपट्टेन शोभनेन विराजितः ॥ बहुयक्षसमाकीर्णो यक्षैर्निर्मितविग्रहः ॥४२॥ शिवपूजापरो

नित्यं करोतु मम शांतिकं ॥ पंचगोनाम यक्षेंद्र कर्णिकाकटकोज्वलः ॥४३॥ मुकुटेनविचित्रेण केयू

राभ्यां विराजितः ॥ यक्षकन्यासमायुक्तो यक्षकोटिसमन्वितः ॥ ४४॥ हरार्चनरतः श्रीमान् करो

तु मम शांतिकं ॥ श्रीमान्विभंडको यक्षो नानारत्नविभूषितः ॥ ४५॥ चारुकुंडलयुग्मेन कर्णेनि

त्यं विराजितः ॥ यक्षेंद्रो यक्षनमितो यक्षसेनापतिर्बुधः ॥४६॥ हरपादार्चनरतः करोतु मम शां

तिकं ॥ धनराष्ट्रो महातेजो यक्षो यक्षाधिपः प्रभुः ॥४७॥ दिव्यपट्टांशुकच्छन्नो मणिकांचनभूष

णः ॥ शिवभक्तः शिवध्यान शिवपूजापरायणः ॥ ४८॥ शिवप्रसादसंपन्नः करोतु मम शांतिकं ॥

पूर्णभद्रो महायक्षो सर्वालंकारभूषितः॥४९॥ रक्तदीप्तेन देहेन पट्टेनातिविराजितः॥ यक्षकोटि
सहस्रेण परिवारितविग्रहः॥५०॥ रुद्रप्रणामपरमो रुद्रभक्तिरतः सदा॥ रुद्रार्चनसमुद्युक्तः क
रोतु मम शांतिकं॥५१॥ ॥सूत उवाच॥ ॥ शांतिं कुर्वंतु सर्वे हरपदकमलोदारभा ये कभंगाय
क्षास्त्र्यक्षपदांबुजार्चनरतानागानगापांतु मां॥ सद्योजानप्रियास्ता वरगिरिजनिता पुण्यनद्योपि स
द्यः पापं मे प्रविनाशयंतु सततं सर्वार्चनासूद्यताः॥५२॥ ॥ इति श्रीशिवरहस्ये महादेवाख्ये
एकादशांशे शांत्यध्यायो नाम चत्वारिंशोध्यायः॥४०॥ ॥ श्रीमहादेवाय नमः॥ ॥स्कंद उ-
वाच॥ ॥विरूपाक्षश्च यक्षेंद्रः श्वेतवासा महाद्युतिः॥ चारुकांचनमालाभिः किंकिणीरवकांचि
तः॥१॥ विभूषितः सदा कालं वरदानैकतत्परः॥ रुद्रपूजाकरो नित्यं करोतु मम शांतिकं॥२॥
अंतरिक्षे च ये यक्षाः ये यक्षाः सर्वसंस्थिताः॥ गिरिकंदरदुर्गेषु ये यक्षा भुवि वासिनः॥३॥ पाता
लवासिनो यक्षाः नानारूपायुधोद्यताः॥ शिवभक्ताः सुमनसः शिवपूजासमुत्सुकाः॥४॥ शां
तिं कुर्वंतु मे हृष्टाः शांताः शांतेन चेतसा॥ यक्षिण्यो विविधाकाराः तथा यक्षकुमारिकाः॥५॥ यक्ष
कन्या महाभागाः शिवध्यानैकतत्पराः॥ शांतिं स्वस्त्ययनं क्षेमं बलं कल्याणमेव च॥६॥ सिद्धि
मायुः प्रयच्छंतु नित्यमेव समाहिताः॥ पर्वताः सर्वतः सर्वे पर्वत्यश्च महार्धकाः॥७॥ शिवभक्ताः सु
मनसः शांतिं कुर्वंतु मे सदा॥ समुद्राः सरितः सर्वे सागराश्च महार्धिकाः॥८॥ रत्नगर्भाश्च विवि
धा ये चान्ये सागरा भुवि॥ रुद्रपूजापरा नित्यं कुर्वंतु मम शांतिकं॥९॥ राक्षसाः सर्वतः सर्वेषा

क्षसाघोररूपिणः ॥राक्षसायेमहावीर्याराक्षसाश्चमहाबलाः॥१०॥ स्थलस्थाराक्षसायेचअंतरिक्षे
चराक्षसाः॥पाताले राक्षसायेतुनित्यंरुद्रार्चनेरताः॥११॥ भैरवं यस्यरूपंतु भेनभस्मावगुंठितं॥
अनेकरूपधारिण्योडाकिन्यश्चमहाबलाः॥१२॥ अंतरिक्षगतायाश्चडाकिन्यः स्वर्गसंस्थिताः॥
पातालभूतलेयाश्चगिरिदुर्गेषुयास्थिताः॥ रुद्रप्रणामपरमारुद्रपूजापरास्थिताः॥तुरीयं
लोचनंयस्यत्रिशूलंकरपल्लवे॥१४॥ तेजसानस्यदेवस्यशांतिंकु०॥ सर्वतोभूतरूपाढ्याः म
हाभूतामहोज्वलाः॥१५॥ सर्वभूतस्थिताः सोम्याः सर्वभूतामनोहराः॥ अंतरिक्षेचयेभूताये
भूतादिविसंस्थिताः॥१६॥ पातालेभूतलेभूताः येचभूतात्रिधामकाः॥खट्वांगयस्यचिमलंक
पालंकरपल्लवे॥१७॥ तेजसानस्यदेवस्यशांतिंकु०॥प्रेतप्रेतगणाः सर्वे ते भीताः सर्वतोमुखे॥
अंतरिक्षेचयेप्रेताः ये प्रेतादिविसंस्थिताः॥१८॥ पातालेभूतलेचैवयेप्रेताः कामरूपिणः॥ स्मशा
ननिलयोयस्य वृषभोयस्यवाहनं॥ तेजसानस्यदेवस्यशांतिंकु०॥१९॥ येपिशाचामहावीर्यायेपि
शाचामहाधिकाः॥ येपिशाचामहावीर्यापिशाचाकामरूपिणः॥ नानारूपधराः सर्वे सर्वे तत्व
गुणोत्तराः॥२०॥ अंतरिक्षेपिशाचायेस्वर्गेयेचपिशाचकाः॥ भूतलेयेपिशाचायेपातालतलवा
सिनः॥२१॥ चंद्रार्धमस्तकेयस्यभस्मयस्यविभूषणं॥ तेजसानस्यदेवस्यशांतिंकु०॥२२॥ अप
स्मारग्रहाः सर्वेसर्वेचापिज्वरग्रहाः॥ गर्भबालग्रहायेतुनानारोगग्रहाश्चये॥२३॥ अंतरिक्षे
ग्रहायेचस्वर्गेयेचग्रहोत्तराः॥ पातालेभूतलेयेचयेग्रहाःसर्वतोदिशः॥२४॥ कंठेयस्यमहा

नीलंभूषणंयस्यपन्नगः ॥ तेजसातस्यदेवस्यशांतिंकु॰ ॥ २५ ॥ इतिदेवादयः सर्वेशिवज्ञानविधायिनः ॥ कुर्वंतुशांतिंजगतः शिवभक्तेषु सर्वदा ॥ २६ ॥ शिवज्ञानपराभूत्वास्तुत्वेवंशिवभक्तान् ॥ शिवध्यानपरोभूत्वा यतस्तोत्रमुदीरयेत् ॥ २७ ॥ इत्युक्त्वा देवदेवस्य सन्निधौनंदिकेश्वरः ॥ कृतांजलिपुटोभूत्वादेवंतुष्टाव हृष्टधीः ॥ २८ ॥ जयात्मयोगसंस्थाय जयशंभुधृचेतसे ॥ जयदानैकरूपायजयेशायनमोस्तुते ॥ २९ ॥ जयोनमायदेवायजयकल्याणरूपिणे ॥ जयप्रनष्टमोहायजयाजय्यायतेनमः ॥ ३० ॥ जयशर्वायदेवाय सर्वेशायमहात्मने ॥ जयलक्ष्मीविधानायजयकांतिविधायिने ॥ ३१ ॥ जयवाक्यविशुद्धायअनीनायनमोनमः ॥ जयविष्वेंद्रवंद्याय शिवज्ञानायतेनमः ॥ ३२ ॥ जयविज्ञानशुद्धायसर्वव्यापिन्नमोनमः ॥ जयकांतार्धदेहायजयचंद्रार्धधारिणे ॥ ३३ ॥ जयदेवादिदेवायजयरुद्रायतेनमः ॥ जयत्रिभुवनेशाय जयविख्यातमूर्तये ॥ ३४ ॥ जयाधारायशर्वायजगत्कर्त्रे नमोस्तुते ॥ जयनिर्मलदेहायजयसर्वार्थदायिने ॥ ३५ ॥ जयभद्रेचहर्त्रेचजयत्रिपुरभेदिने ॥ जयमन्मथनाशायईशानायनमोनमः ॥ ३६ ॥ ॥ श्रीस्कंदउवाच ॥ ॥ जैगीषव्यमहाभागशिवप्रोक्ताश्वशांतये ॥ सर्वेषांशांतिकाध्यायःश्रुत्वाभक्तियुताश्चये ॥ ३७ ॥ इत्येवंशांतिकाध्यायंयः पठेच्छृणुयादपि ॥ विधूयसर्वपापानिशिवलोकेमहीयते ॥ ३८ ॥ कन्यार्थीलभतेकन्यांजयार्थीजयमाप्नुयात् ॥ मोक्षार्थीलभतेमोक्षं धनार्थीधनमाप्नुयात् ॥ ३९ ॥ अर्थकामोलभेदर्थंपुत्रकामोबहूत्सुतान् ॥

श्रीशिव

विद्यार्थी लभते विद्यां योगार्थी योगमाप्नुयात्॥४३॥ राज्यार्थी लभते राज्यं ग्रामार्थी ग्राममाप्नुया
त्॥ गर्भिणी लभते पुत्रं कन्या विंदति सत्पतिं॥४४॥ यान्यान्कामान्कामयते मानवः श्रवणादिह॥
तत्सर्वं शीघ्रमाप्नोति देवानां च प्रियो भवेत्॥४५॥ श्रुत्वाध्यायमिमं पुण्यं संग्रामं प्रविशेन्नृपः॥ स
निर्जित्य भयं शत्रून्कल्याणैः परिपूर्यते॥४६॥ अक्षय्यं मोदते कालं अतिरस्कृतशासनः॥ सर्व
व्याधिविनिर्मुक्तः पुत्रपौत्रैः प्रतिष्ठितः॥४७॥ शांत्यध्यायमिमं पुण्यं यमुद्दिश्य समुत्पठेत॥
तस्य रोगा न बाधंते वातपित्तादिसंभवाः॥४८॥ नाकालमरणं तस्य सर्पैश्चापि न दंश्यते॥ विषं
नाक्रमते देहे न जडत्वं न मूकता॥४९॥ नोपसर्गभयं तस्य न चोत्पातभयं तथा॥ नाभिचारकृ
तैर्दोषैः लिप्यते न कदाचन॥५०॥ सर्वकामसमृद्धात्मा यः पठेत्तु दिने दिने॥ नित्यमर्तिनभक्ता
च दुर्योधानादिवर्जितः॥५१॥ यत्पुण्यं सर्वतीर्थानां गंगादीनां विशेषतः॥ तत्पुण्यं कोटिगुणि
तं प्राप्नोति श्रवणादिह॥५२॥ दशानां राजसूयानां अग्निष्टोमशतानि च॥ श्रवणात्फलमा
प्नोति कोटिकोटिगुणोत्तरं॥५३॥ कोटिजन्मसु यत्पुण्यं जनार्दनसपूजया॥ तत्पुण्यं कोटिगुणि
तं प्राप्नोति श्रवणादिह॥५४॥ अवध्यः सर्वभूतानां अन्येषां च विशेषतः॥ जीवेद्वर्षशतं साग्रं स
र्वव्याधिविवर्जितः॥५५॥ गोघ्नश्चैव कृतघ्नश्च भ्रूणहा गुरुतल्पगः॥ शरणागतघाती च मित्रवि
श्वासघातकः॥५६॥ दुष्टपापसमाचारो मातृहा पितृहा तथा॥ श्रवणादस्य भावेन मुच्यते सर्वपा
कैः॥५७॥ शांत्यध्यायमिमं पुण्यं न देयं यस्य कस्यचित्॥ शिवभक्ताय दातव्यं शिवेन कथितं पुरा॥

नित्यमूर्जितभक्तिश्च भक्तिव्याघातवर्जितः॥ सर्वकामसमृध्यर्थी यः पठेनुदिने दिने॥ तस्माद्
त्तापुण्यमिदं श्रोतव्यं शिवमिछता॥५६॥ ॥ईश्वर उवाच॥ ॥यः शांत्यध्यायवराशिवे ह्
दिगतान्कुर्वन्स शांतिं लभे॥ द्रोगाणामपुनातनुध्यानपभयान्भ्यो पिमुक्तोभवेत॥ चोरारि
प्रभवाद्योग्रहैर्भवापस्मारबालग्रहैः॥ सद्योमुच्यनरः वृशांतिकजपाद्भक्तोथभुक्तोभवेत्॥
५९॥ युक्तास्त्वभवंति मत्कृ हृदयामयेव भक्ताशिवे शांतास्तेभुवनावने द्विजवरास्तोलोकने
किंपुनः॥ व्यक्ताव्यक्तगतेषु तेषु सुलभो मोक्षोऽस्तांगाखुवे वक्तव्यं किमुमासहायचरणांभोजप्र
भावादरे॥६०॥ ॥इति श्रीशिवरहस्ये महादेवाख्येएकादशांशे शांत्याध्यायफलकथनंनाम
एकचत्वारिंशोध्यायः॥४१॥ ॥श्रीमहादेवायनमः॥ ॥श्रीस्कंद उवाच॥ ॥ये स्मरंति
सदाकालं ईशानं पूजयंतिवा॥ रुद्रलोकात्परिभ्रष्टाः विज्ञेयास्ते गणेश्वराः॥ १॥ अग्निहोत्राश्च
वेदाश्च यज्ञाश्च बहुदक्षिणाः॥ शिवलिंगार्चनस्यैते कोट्यंशेनापि ते समाः॥ २॥ सदा यजंति
यज्ञेन सदा दानं प्रयच्छति॥ सदा स वायुभक्षस्स्यात्सदा योर्चयते शिवं॥ ३॥ यः शिवं पूजयेन्नित्यं
प्रणमेद्वापि भक्तितः॥ तस्य योगं च मोक्षं च शिवः प्रीतः प्रयच्छति॥ ४॥ यः कुर्यादर्चनं मासं एका
हारो जितेंद्रियः॥ स च यत्फलमाप्नोति तन्नत्सर्वैर्महामखैः॥ ५॥ पौर्णमास्याममावास्यां चतुर्द
श्यष्टमीषु च॥ स्नापयित्वांभसा नित्यं सर्वयज्ञफलं लभेत॥ ६॥ कृष्णपक्षत्रयोदश्यां उपोष्य
परमेश्वरं॥ प्रातःसंध्यान्हयोः पूजां चतुर्दश्यां समारभेत॥ ७॥ पंचगव्यं सकृत्पीत्वा हविर्भुंजीत

वाप्यतः॥ दशानामश्वमेधानां फलं प्राप्नोति मानवः॥ ८॥ कृष्णाष्टम्यामुपोष्याथ शंकरं योर्चयेत्तु सः॥ प्राप्नोति परमं स्थानं यत्र देवो महेश्वरः॥ ९॥ ब्रह्मचारी शुचिर्भूत्वा त्रिसंध्यं योर्चयेच्छिवं॥ त्रिसप्तकुलमुद्धृत्य शिवलोके महीयते॥ १०॥ दानोपवासनियमैः पूजाजागरभोजनैः॥ महास्नानादिविधिना शिवं पर्वसु पूजयेत्॥ ११॥ यावच्च सर्वकालेषु यावदर्चयते शिवं॥ तावत्कालार्चनं पुण्यं यावत्पर्वार्चकालभेत्॥ १२॥ स्नात्वा पर्वसु यत्नेन यथाविभवविस्तरैः॥ पूजनीयः शिवो नित्यं महापुण्यजिगीषया॥ १३॥ नैरंतर्येण षण्मासान्विधिना पूज्य शंकरं॥ पुण्यं तद्देव लभते संक्रांतौ विषुवार्चनात्॥ १४॥ एवमेव फलं ज्ञेयं ग्रहणायनयोरपि॥ संक्रांतौ चादिने छिद्रे षडशीतिमुखेषु च॥ १५॥ मासैश्चतुर्भिर्यत्पुण्यं विधिना पूज्य शंकरं॥ तत्कार्तिक्यां भवेत्पुण्यं पौर्णमास्यां शिवार्चनात्॥ १६॥ पुण्यं तद्दैत त्फाल्गुन्यां आषाढ्यामेव मेव च॥ चातुर्मास्यार्चनादेतन्महत्पुण्यफलं लभेत्॥ १७॥ माघमासे समुद्दिश्य त्रिसंध्यं योर्चयेच्छिवं॥ लभेत्षाण्मासिकं पुण्यं मासेनैव न संशयः॥ १८॥ यथा माघे तथाषाढे माघे चैव तु कार्तिके॥ त्रिषु पुण्यं समं ज्ञेयं मासेष्वेतेषु यत्कृतं॥ चातुर्मास्यकृतं पुण्यं पुष्यमासार्चनं भवेत्॥ चैत्रफाल्गुणयोः पुण्यं द्विमासजनितं भवेत्॥ २०॥ चतुर्दश्याममावास्यां पौर्णमास्यां च पारणं॥ पुण्यमष्टगुणं ज्ञेयं अष्टम्यामर्चयेत्तु शिवं॥ २१॥ यः प्रदद्याद्गवां लक्षं दोग्ध्रीणां वेदपारगे॥ एकाहं योर्चयेल्लिंगं तस्य पुण्यं ततोधिकं॥ २२॥ मासे

मासेनुयोश्नीयात यावज्जीवंसरुन्नरः॥ पश्चार्चयेनारुल्लिंगंसममेवनसंशयः॥२३॥
येनेनक्रमयोगेनपुण्यराशिर्दिनेदिने॥ ज्ञेयासंवत्सरस्यापियावद्वाकालमर्चयेत्॥२४॥
यःपुनःसंगमुत्सृज्यइदमब्दंप्रपूजयेत्॥ नैरंतर्याछतगुणंतस्यपुण्यंविवर्धते॥२५॥
पंचाशद्गुणितंपुण्यंअब्दार्धंयोर्चयेच्छिवं॥ ऋतावनेनदर्धस्यान्मासेमासेनदर्धकं॥
२६॥ मासार्धमपियोलिंगंनैरंतर्येणपूजयेत्॥ पुरुषोत्तमःसविज्ञेयोनैरंतर्याद्दिदुष्करं॥
२७॥ प्रातरुत्थाययोलिंगंसरुद्भक्त्याप्रपूजयेत्॥ कपिलानांशतंदत्वायत्पुण्यंलदवाप्नु
यात्॥२८॥ मध्यंदिनकरेप्राप्तेयोलिंगंपूजयेन्नरः॥ संपूर्णांपृथिवींदत्वायत्पुण्यंतद
वाप्नुयात्॥२९॥ वारुणीमाश्रितेसूर्येयःशिवंसंप्रपूजयेत्॥ गवांशतसहस्रस्यदत्तस्य
फलमाप्नुयात्॥३०॥ योलिंगमर्धरात्रेतुशुचिर्भूत्वाप्रपूजयेत्॥ अग्निष्टोमसहस्रस्य
धर्मस्वलभतेफलं॥३१॥ एवंवेलासुसर्वासुअवेलास्वपिशंकरं॥ संपूजयेन्नरोभक्त्या
सर्वान्कामानवाप्नुयात्॥३२॥ शिवलिंगंमहापुण्यंसर्वदेवनमस्कृतं॥ यःस्पृशेदपि
पाणिभ्यांनसपापैःप्रलिप्यते॥३३॥ नतेभूयःप्रयास्यंतियेयाम्यमार्गंसुकंटकं॥ क्रमान्मो
क्षंगमिष्यंतियेनरालिंगमाश्रिताः॥३४॥ कांचनेमेरुमात्रेचसर्वानदत्वावसुंधरां॥ सा
गरान्तेनपूर्णांचलिंगार्चयितुःसमं॥३५॥ मेरुमंदरमात्रोपिराशिःपापस्यकर्मणः॥ शि
वरंवैद्यमासाद्यनश्यतेदुष्टरोगवत्॥३६॥ शिवार्चनरतोनित्यंमहापातकसंयुतः॥

दोषैः कृतैर्न लिप्येत पद्मपत्रमिवांभसा ॥ ३७ ॥ छित्वा भित्वा च भूतानि हत्वा सर्वमिदं
जगत् ॥ यदेकं च शिवरूपाक्षं न स पापैः प्रलीयते ॥ ३८ ॥ सर्वावस्थां गतो वापि युक्तो वा सर्व
पातकैः ॥ शिवं दृष्ट्वा नरः सोपि प्रयाति परमां गतिं ॥ ३९ ॥ शिवं सर्वत्र संपूज्य सविशेषं स
विस्तरं ॥ अश्वमेधायुतं पुण्यं लभते नात्र संशयः ॥ ४० ॥ सरित्समुद्रतीरेषु पर्वतेषु वनेषु
च ॥ गिरिकंदरदुर्गेषु गान्हरेषु वनेषु च ॥ ४१ ॥ पुष्करण्यां तटाकेषु तीर्थायतनसंश्रये ॥ यत्र वा
रमते बुद्धिः तत्रैव शिवमर्चयेत ॥ ४२ ॥ सर्वयज्ञेषु यत्पुण्यं न लभेन्नात्र संशयः ॥ यः समर्चयते भ
क्त्या तस्य पुण्यं ततोधिकं ॥ ४३ ॥ अर्चनं विनापि मंत्रेण पुण्यराशिः प्रकीर्तितः ॥ स्यादयं मंत्रसंयु
तः पुण्यं शतगुणाधिकं ॥ ४४ ॥ तस्मान्मंत्रेण शर्वाय स्नानं मधं फलाधिकं ॥ भस्म श्वरायवस्त्रं च
हैमाद्यापि निवेदयेत् ॥ ४५ ॥ जप्यो नमः शिवायेति मंत्रः सर्वार्थसाधकः ॥ सर्वमंत्राधिकश्चायं
ओंकाराद्यः षडक्षरः ॥ ४६ ॥ शिवेनांतर्बहिर्यस्मा[illegible]द्व्याप्तं सर्वं चराचरं ॥ जगदेतन्मिति यन्त्र
ते तस्मादोमिति संस्मृतिः ॥ ४७ ॥ अयमर्थे नतिस्तभिः मातृभिः परिगीयते ॥ ब्रह्मा हरिश्च रुद्र
श्च मात्रास्तिस्रः प्रकीर्तिताः ॥ ४८ ॥ दक्षिणांगे भवेद्ब्रह्मा हरिर्वामांगसंभवः ॥ हृदये निर्गतो
रुद्रः ब्रह्मविष्णुप्रबोधकः ॥ ४९ ॥ जगत्सृष्टिकरो ब्रह्मा विष्णुर्लोकविमोहनः ॥ अनुग्रहपरो
नित्यं नीलरुद्रः शिवात्मकः ॥ ५० ॥ त्रिभिरेतैर्जगद्व्याप्तं कारणैरात्ममूर्तिभिः ॥ तिस्रो मात्रा शि
वस्येताः सर्वलोकप्रपूजिताः ॥ ५१ ॥ एतास्त्वत्र यो वेदाः त्रयो लोकास्त्रयो गुणाः ॥ त्रयोग्नयस्त्रि

वर्गाश्रयश्चान्याजगतिस्थितं॥५२॥अर्धमात्रा परोरुद्रःशिवःपरमकारणं॥ तस्मादेतत्समुत्पन्नं
जगतः कारणत्रयं॥५३॥ सर्वयज्ञात्परः शुद्धो नमस्कारोमहामखः॥नमस्कारात्मयत्नेन तस्मात्संपू
जयेच्छिवं॥५४॥ अज्ञानमशिवत्वंस्यात्सर्वदुःखालयं यतः॥ स्वभावात्तदपात्रंहि तस्मादुद्रःपरःशि
वः॥५५॥ नमः शिवाय शांताय कारणत्रयहेतवे॥ निवेदयामि चात्मानंमुक्त्यैवपरमेश्वरं॥५६॥उ
क्त्वानमःशिवायेतिमुच्यतेसर्वबंधनात्॥ यस्मात्तस्मात्सदामंत्रं ओंकाराद्यमनुस्मरेत॥५७॥सर्व
दासर्वकार्येषुस्युतनिष्ठीवनादिषु॥ धन्योनमःशिवायेतिगिरमुल्काशिवंपदं॥५८॥यः सर्ववि
घ्नबुध्यात्मा प्राणांतेतु सकृत्स्मरेत॥ भक्तोनमःशिवायेतिसगाच्छेत्परमांगतिं॥५९॥शाठ्यानाः
पिनमस्कारःप्रयुक्तःशूलपाणये॥संसारस्थूणबंधानां उच्छेदकनरोभवेत्॥६०॥ अपवित्रः पवित्रो
वासर्वावस्थांगतोपिवा॥ यःस्मरेत्संयतोरुद्रंसवाह्याभ्यंतरः शुचिः॥६१॥स्मरणादेवरुद्रस्यपा
पसंघातपंजरं॥शतधाभेदमाप्नोतिगिरिर्वज्रहतोयथा॥६२॥ सर्वेषांशिवभक्तानां अशेषार्थ
प्रसिध्दये॥मंत्रमाहशिवःसाक्षादशेषार्थनिबंधनं॥६३॥ सद्बीजंसर्वविद्यानांआद्यंब्रह्मपरात्प
रं॥ सर्वसाधनकंमंत्रंशिवस्त्वेषडक्षरं॥६४॥भाषामंत्रैवशूद्रस्यसर्वज्ञानातिशंभुना॥पञ्चा
त्परापराणीह व्यक्तार्थंगदितानितु॥६५॥ तस्मादनेनमंत्रेण प्रकुर्यीतशिवार्चनं॥तत्र देशोनदु
र्भिक्षं नचमारीप्रवर्त्तते॥६६॥नाकालेम्रियतेकश्चित्पूज्यतेयत्रशंकरं॥ दीक्षितः सत्वमंत्रज्ञो
योर्चयेत्तुसदाशिवं॥६७॥ सचयत्फलमाप्नोतितदेकाग्रमनाः शृणु॥ तस्मादेवंशिवंभक्त्यापूज

॥शिवउवाच॥१

येच्छंति मानमः॥ ६९॥ यः पूजयेच्छ्रीकलामलमौलिलिंगं भस्माक्तधवप्रथितपर्वसुवार्चमेके॥ स सर्वैश्च यात्रिकवरैः सततुमुक्त ईशो संसारघोरविषसर्पमुखाभिलग्नः॥ ६९॥ ॥ इति श्रीशिवरहस्ये महादेवाख्ये एकादशांशे पर्वपूजाफलकथनं नाम द्विचत्वारिंशोध्यायः॥ ४२॥ ॥ श्रीमहादेवाय नमः॥ ॥ ईश्वर उवाच॥ ॥ सर्ववेदेषु यत्प्रोक्तं सर्वयज्ञेषु यत्फलं॥ तत्फलं कोटिगुणितं लभते नात्र संशयः॥ १॥ यः शिवं पूजयेन्नित्यं अंत्यजोपि जितेंद्रियः॥ भावेन तु समायुक्तः स गच्छत्परमां गतिं॥ २॥ सोपनीतसहस्रेभ्यो ब्रह्मचारी विशिष्यते॥ ब्रह्मचारी सहस्रेभ्यो वेदाध्यायी विशिष्यते ॥ ३॥ वेदाध्यायी सहस्रेभ्यो अग्निहोत्री विशि०॥ अग्निहोत्री सहस्रेभ्यो यज्ञयाजी विशि०॥ ४॥ यज्ञयाजी सहस्रेभ्यो वेदार्थपारगः॥ सर्ववेदार्थवित्केभ्यो शिवभक्तो विशि०॥ ५॥ तस्माद्देवं शिवं भक्त्या पूजयेच्छ्रौ मानसः॥ शिवभक्तो जितक्रोधो शिवभक्तिपरायणः॥ मैत्रीकारुणीकोजस्रं प्राप्नोति सततं शिवं॥ ॥ ६॥ क्षणार्धेनापि यत्पुण्यं कुर्यान्मैत्रिषु भावितः॥ न तद्दूर्षशतेनापि तपोयज्ञशतैरपि॥ ७॥ सर्वप्राणिषु कारुण्यं दीनानाथेषु भावयेत॥ सुख प्राणिषु मैत्री स्यान्मुदिता पुण्यशालिषु॥ ८॥ अपुण्यवत्सु चोपेक्षा सर्वेषां च वदेच्छिवं॥ इत्येवं पंचधा चित्तं भावयित्वा यजेच्छिवे॥ ९॥ संपूज्य पशुभर्तारं प्रहृष्टेनांतरात्मना॥ ध्यानं कुर्याद्यथादिष्टं सर्वपापनिकृंतनं॥ १०॥ कृतांजलिपुटो भूत्वा स्तोत्रमेतज्जपेन्नरः॥ स्तुत्याय स्तुतिरूपाय स्तूयमानाय सर्वदा॥ ११॥ स्तुतिहेतुनिधानाय नमस्त्रिगुणधनायते॥ देवाय दिव्यरूपाय सर्वदेवैकहेतवे॥ १२॥ सूक्ष्माणामपि सूक्ष्माय नमः सूक्ष्मतमाय ते॥

सर्व

दिव्यायदिव्यरूपायदिव्यरूपैकहेतवे॥१३॥दिव्यानामपिदिव्यायनमोदिव्यतमायते॥पराय
परमेशायपरनामार्थैकहेतवे॥१४॥परापरविमुक्तायनमःपरतरायते॥पूज्यायपूज्यपूज्यायसर्व
पूज्यैकहेतवे॥१५॥पूज्यानामपिपूज्यायनमःपूज्यतमायते॥नित्यायनित्यनित्यायसर्वनित्यैक
हेतवे॥१६॥नित्यानामपिनित्यायनमोनित्यतमायते॥दीप्तायदीप्तदीप्तायसर्वदीप्तैकहेतवे॥
दीप्तानामपिदीप्तायनमोदीप्ततमायते॥सारायसाररूपायसर्वसारैकहेतवे॥सारणामपिसारा
यनमःसारतरायते॥शांतायशांतरूपायसर्वशांतैकहेतवे॥१९॥शांतानामपिशांतायनमःशां
ततमायते॥शुद्धायशुद्धरूपायसर्वशुद्धैकहेतवे॥शुद्धानामपिशुद्धायनमःशुद्धतमायते॥
कालायकालरूपायसर्वकालैकहेतवे॥२१॥कालानामपिकालायनमःकालतमायते॥सर्व
मंत्रशरीरायसर्वमंत्रैकहेतवे॥२२॥मंत्राणामपिमंत्रायनमोमंत्रतमायते॥व्योमप्रमाणभासा
यअघोरायनमोनमः॥२३॥व्योमप्रमाणवामायवामेशायनमोनमः॥व्योम॰वामायईशानाय
न॰॥२४॥व्यो॰योगायपुरुषायन॰॥व्यो॰सत्यायसद्योजातायतेनमः॥२५॥व्योमप्रमाणविद्याय
विद्येशायन॰॥व्योमप्रमाणकालायकालेशायन॰॥२६॥व्योम॰धर्मायधर्मेशायन॰॥व्यो॰भोगा
यभोगेशायनमो॰॥२७॥व्योम॰मोक्षायमोक्षेशायनमोनमः॥व्योमप्रमाणविश्वायविश्वेश्वरनमो
स्तुते॥२८॥एकदेहद्विदेहायबहुदेहायतेनमः॥देहासंख्येयरूपायविश्वेशायनमो॰॥२९॥ए
ककालद्विकालायबहुकालायतेनमः॥कालासंख्येयरूपायत्रिनेत्रायन॰॥३०॥एकवक्त्रद्विवक्त्रा

यबहुवक्त्रायतेनमः॥वक्त्रासंख्येययुक्ताय वरेशायनमोनमः॥३१॥एकनेत्रद्विनेत्राय बहुनेत्रा
यतेन०॥ दंष्ट्रासंख्येययुक्तायत्र्यंबकायन०॥३२॥एककंठद्विकंठाय बहुकंठायतेनमः॥ एकना
सद्विनासाय बहुनासायतेनमः॥३३॥ नासासंख्येययुक्तायनित्यंशार्वायतेनमः॥एकजिह्वद्विजि
ह्वायबहुजिह्वायतेनमः॥३४॥जिह्वासंख्येययुक्तायनीलकंठायतेनमः॥एकहस्तद्विहस्तायब
हुहस्तायतेनमः॥३५॥ हस्तासंख्येययुक्तायशंकरायनमोनमः॥एकशास्त्रद्विशास्त्रायबहुशास्त्रा
यतेनमः॥ ३६॥ शास्त्रासंख्येययुक्तायईशानायनमोनमः॥एकपादद्विपादाय बहुपादायतेनमः॥
३७॥ पादासंख्येययुक्तायमहादेवायतेनमः॥अव्यक्तायनमस्तुभ्यंशाश्वतायनमोनमः॥३८॥म
हेश्वरनमस्तुभ्यंमहायोगिन्नमोस्तुते॥महोत्तमनमस्तेस्तुमहारूपनमोस्तुते॥३९॥सदाशिवन
मस्तेस्तुसदाशुभनमोस्तुते॥सदोज्ज्वलनमस्तेस्तुमहादेवनमोस्तुते॥नमस्तेभगवन्छांतनम
स्तेभगवन्ध्रुव॥नमस्तेभगवन्दीप्तनमस्तेभगवन्हर॥४१॥ अजितायनमस्तुभ्यंभस्मांगायन
मोस्तुते॥अनंतायनमस्तुभ्यंसर्वांगायनमोस्तुते॥४२॥इतिस्तवेनदिव्येनयस्तौतिपरमेश्वरं॥
सविधूयाशुपापानिशिवलोकेमहीयते॥४३॥ भोगार्थीलभतेभोगान्राज्यार्थीराज्यमाप्नुयात्॥
कन्यार्थीलभतेकन्यांयोगार्थीयोगमाप्नुयात्॥४४॥ मुच्यतेव्याधितोव्याधिदुःखीदुःखात्प्रमुच्य
ते॥बंधनान्मुच्यतेबंधीयशोर्थीचयशोलभेत्॥४५॥ यांयांश्चिंतयतेकामांस्तांस्तांप्राप्नोतिमानवः
॥शिवस्यपदमाप्नोतिनित्यंपठतियोनरः॥४६॥ तस्यार्चनादपितथाश्रवणादपिमानवः॥इत्थं

स्तुवीनमैगवंतसुमासहायंदुःखंविहायसनतंउरुगायमीशं॥ तस्मायमीश्वरपदंप्रददातिदेवि
पापैघनापमपहायगनिर्मलभेत॥४७॥ अध्यायंयस्तुपठतेश्रृणोतिशिवभक्तिमान॥ सोपिदेवो
वंपदंलब्ध्वाप्रयातिपरमांगतिं॥४८॥ ॥ इतिश्रीशिवरहस्येमहादेवाख्येएकादशांशेशिवस्तु
तिर्नामत्रिचत्वारिंशोध्यायः॥४३॥ ॥ श्रीमहादेवउवाच॥ ॥श्रीईश्वरउवाच॥ ॥ पथिव्यांया
नितीर्थानिपुण्यान्यायतनानिच॥ लीयंतेतानिलिंगेतुतस्माल्लिंगंप्रपूजयेत॥१॥ तस्मात्तत्सर्व
तीर्थेषु सर्वयज्ञेषुदीक्षितः॥ पूजयेच्चमहापुण्यंलिंगंसर्वार्थसिद्धिदं॥ २॥ शातेनस्थापितंदेवंस
हस्रेणतुचालयेत॥ दुस्थितंसुस्थितंवापिशिवलिंगंनचालयेत॥३॥ घृताभिषेकंयः कुर्यादहो
रात्रंशिवस्यतु॥ पुष्यमासेसमुद्भुक्तेर्नियतंश्लक्ष्णधारया॥४॥ गीतनृत्योपहारेणशंखवादित्र
निस्वनैः॥ कुर्याज्जागरणंतत्रप्रदीपादिसमाकुलं॥५॥ समस्तगुणनिर्मुक्तसमस्तगुणसंयुतः॥
समस्तकामसंपूर्णः समस्तकुलसंयुतः॥६॥ चलद्भिः सुमहायानैरसंख्यैरनूपमैः॥ युक्तःशिव
पुरेनित्यंमोदतेशिववत्सुखी॥७॥ ग्रहणेविषुवेचैवपुण्येष्वदिवसेषुच॥ घृताभिषेकंयःकुर्या
न्महापुण्यमवाप्नुयात॥ ८॥ घृताभिषेकंयः पश्येदासमाप्तेरुपोष्यतु॥ विधूयसर्वपापानिशि
वलोकेमहीयते॥९॥ एकः पूजयतेभक्त्याभक्त्याचान्यः प्रपश्यति॥ तुल्यमेवफलंताभ्यांभक्ति
रेवात्रकारणं॥१०॥ यः कुर्यात्पर्वकालेषुमहापूजाप्रवर्तनं॥ शिवस्यरथयात्रायांनगरांतपरिभ्र
मात॥११॥ महाचित्रध्वजैः छत्रैःकिंकिणीरवकान्वितैः॥ वितानध्वजमालाभिर्घंटाचामरदर्प

गैः॥१२॥ तांडवैर्भेर्यादिनिर्घोषैर्गीतवादित्रसंकुलैः॥ लेख्यदारुमयैर्यंत्रैः मात्रयक्षगणादिभिः॥
१३॥ उदगायनपात्रैश्च बह्वाम्बार्यैरनेकशः॥ स्त्रीडोलाचक्रयंत्रैश्च रथमंदिरशोभितैः॥ द
ध्यन्नपानकाद्यैश्च महासत्रसमाहितैः॥ महाजनसमाकीर्णं यथाविभवविस्तरं॥ सर्वदानानि
पुण्यानि सर्वयज्ञफलानि च॥ अत्युग्रं तपसापूर्णं सर्वतीर्थफलानि च॥ १६॥ लभ्यानरवर
श्रीमान् शिवयात्राप्रवर्त्तनात्॥ शिवलोके महाभागैः शिववन्मोदते चिरं॥ १७॥ तस्यांते देव
राजत्वं स्थिरकालमवाप्नुयात्॥ जंबूद्वीपाधिपः सर्वान् तस्यांते च महीपतिः॥ १८॥ त्रिलिंगवे
दिपर्यंतं यो दद्याद्घृतकंबलं॥ घृतधाराफलं तस्य माघे पूर्णे तु पर्वणि॥ १९॥ जागरं गीतनृत्ता
द्यैस्सकृत्कृत्वानुपर्वणि॥ मन्वंतरशतं साग्रं शिवलोके महीयते॥ २०॥ चित्राभिरामनाट्याढ्यं
शिवस्यायतनाग्रतः॥ सम्यक्प्रेक्षणकं दत्वा रुद्रलोकमवाप्नुयात्॥ २१॥ सुरूपः सुभगः श्री
मान् परिभ्रश्योत्र जायते॥ सप्तद्वीपसमुद्रायाः क्षितेरधिपतिर्भवेत्॥ २२॥ रूपं पिष्टमयं कृत्वा
त्रिनेत्रं रत्नभूषितं॥ शुक्लोपवीतसंयुक्तमेकपादं विभूषितं॥ २३॥ दंतेषु मौक्तिकं तस्य प्र
वालं चनयोष्ठयोः॥ दद्याद्वज्रं च नेत्राभ्यां वैडूर्यं चापि मस्तके॥ २४॥ हेमरूप्यं च हस्ताभ्यां तांम्र
पादे च कल्पयेत्॥ अंडजैर्विविधैर्वस्त्रैः विचित्रैः परिवेष्टयेत्॥ २५॥ सुगंधैः श्चित्रवर्णैश्च
पुष्पैश्चापि विभूषयेत्॥ विविधैर्भक्ष्यभोज्यैश्च बलिं तत्रोपकल्पयेत्॥ २६॥ भोजयेच्छिवभ
क्तांश्च विप्रान्द्यक्ष्माच तर्पयेत्॥ प्रियकामान् गवो नित्यं रूपं तु इत्युक्त्वोत्थापयेद्द्विजान्॥ तेरेव

सार्धं विप्रैर्द्वैस्तद्रूपंतुशिवालये॥२७॥ नीत्वासमर्पयेद्देवं शिवलिंगसमीपतः॥सर्वयज्ञफलं
प्राप्य सर्वदानफलानि च॥ सुरूपोरूपदानेन शिवलोके महीयते॥ भोजनं घृतसंकीर्णं मधुनाप
रिशोभितं॥ दद्यात्कृष्णतिलानां तु प्रस्थमेकं तु मासगं॥ द्विगुणं तंडुलानां तु पयकुप्रस्थं प्रक
ल्पयेत्॥२९॥ अंडजैः कृमिजैर्वस्त्रैः विचित्रैः परिवेष्टयेत्॥ सुगंधैश्चित्रवर्णैश्च पुष्पैश्चापि वि
भूषयेत्॥३०॥ लिंगं संवेष्ट्य वस्त्राभ्यां बलिभिर्नैवेद्यं निवेदयेत्॥ अर्चयित्वा विमानेन पौर्णमास्यां वि
शेषतः॥३१॥ युगकोटिसहस्राणि शिवलोके महीयते॥ पुण्यक्षयादिहागत्य समृद्धे जायते कु
ले॥३२॥ मेधावी सुभगः श्रीमान् वेदवेदांगपारगः॥ ताम्रपात्रे पयः पूर्णं कृत्वा चोनस्थकांचनं॥
प्रच्छाद्योपरि यत्नेन गंधपुष्पार्चितं महत्॥ शिवभक्तं द्विजं सम्यक् भोजयित्वा सदक्षिणं॥ प्रा-
च्यां समुद्गते सोमे प्रतीचीं च रवौ गते॥ पौर्णमास्यां महेशाख्यां नीत्वा पात्रं शिवाग्रतः॥ ३५॥ प्री
यतां मे महादेव सोममूर्तिर्जगत्पतिः॥ इत्युक्त्वा वचनं ध्यायेद्देवदेवमुमापतिं॥३६॥ तस्मै वि
प्राय तत्पात्रं अर्चयेद्भक्तितः शनैः॥ एतत्सोमव्रतं नाम कृत्वा रुद्रांतिकं व्रजेत्॥३७॥ रुद्रलो
कात्परिभ्रष्टो भवेज्जातिस्मरो नरः॥ पूर्वाभ्यासेन तेनैव पुनः शिवपदं व्रजेत्॥३८॥ पौर्णिमाया
ममावास्यां शिवं संपूज्य यत्नतः॥ उपवीतं शिवे दद्याच्छिवभक्तांश्च पूजयेत्॥ ३९॥ पुनरेव तु का
र्तिकां पूज्यं शंभुस्समापयेत्॥ यतीनां दक्षिणां दद्यात् सूत्रवस्त्रादिपूर्वकां॥ ४०॥ यः कुर्यात्सकृ
दप्येवं चातुर्मास्यपवित्रकं॥ कल्पकोटिशतं दिव्यं रुद्रलोके महीयते॥४१॥ पुण्यक्षयात्परिभ्रष्टश्च

नुर्वेदीचजायते॥इच्छयावाभवेद्राजागुणरूपसमन्वितः॥४२॥भूमिदानस्ययत्पुण्यंकन्यादानस्य
यत्फलं॥मुखवाद्येनयत्पुण्यंउभयंलभतेनरः॥४३॥तद्देवपुण्यगीतस्यनतस्यचविशेषतः॥
तद्देवजायतेशब्दःहस्ततालध्वनेस्तथा॥४४॥योगांपयस्विनींदद्यात्तरुणींरत्नसंयुतां॥शिवा
यतेनदत्तंस्याज्जगत्सर्वंचराचरं॥४५॥रत्नंचपरिपूर्णांगंउदारंचन्द्रशिप्रभं॥गोपतिंधूर्यहंवापि
शिवायविनिवेदयेत्॥४६॥यावंतिदेहरोमाणितत्प्रसूतिकुलेषुच॥तावद्युगसहस्राणिरुद्र
लोकेमहीयते॥४७॥सूतउवाच॥योधर्मवाहेपरमेश्वरभीशितारंसंपूजयेद्यदिहभूमिगतः
सुभुक्त्या॥तस्यायुरुत्तमसुमेधकलत्रपुत्रमित्रातिराज्यकरणंलभतेशिवेत्र॥४८॥इतिश्री
शिवरहस्येमहादेवाख्येएकादशांशेशिवधर्मकथनंनामचतुश्चत्वारिंशोध्यायः॥४४॥ ॥
श्रीमहादेवायनमः॥ ॥श्रीईश्वरउवाच॥ ॥शिवाग्निकार्यमुद्दिश्यसुरूपांचपयस्विनीं॥
कुलीनांकपिलांदत्वादत्तंभवतिगोशतं॥१॥गिरिकांतारदुर्गेषुसदाभातेवरश्मीत॥यत्नेन
कपिलांयत्नाच्छिवायनिविवेदयेत्॥२॥शिवस्थानानिकार्यार्थंउत्पन्नाकपिलायथा॥त
स्मात्तत्रैवसायोज्यकपिलाशुभमिच्छुना॥३॥कपिलायाःपिबेच्छूद्रःशिवसंसारवर्जितः॥सप्त
यातिमहाघोरंनरकंनात्रसंशयः॥४॥हुतशेषंपिबेद्विप्रःस्वर्गीस्यादन्यथापशुः॥संस्कारेणवि
मुक्तश्चेत्संस्कारोदुर्लभःशिवः॥५॥गामालभ्यनमस्कृत्ययःकुर्यात्तांप्रदक्षिणां॥प्रदक्षिणी
कृतांतेनसप्तद्वीपावसुंधरा॥६॥गवांहुंकारशब्देनदर्शनस्पर्शनेनच॥पापंप्रणश्यतेयत्नात्त

स्मान्स्पर्शेच गोस्पर्शात् ॥ ७॥ कुतस्तेषां हि पापानि येषां गृहमलंकृतं ॥ सततं बालवत्साभिः गो
भिः श्रीभिरिवस्वयं ॥ ८॥ यानि तीर्थानि मेदिन्यामासमुद्रान्सरांसि च ॥ गवां शृंगोदकस्नानात्कलां
नार्हंति षोडशीं ॥ ९॥ नलंघयेद्गवामस्मिन्मतं गंधं न वर्जयेत् ॥ यावज्जिघ्रति तद्गंधं तावत्पुण्यैः
संपूर्यते ॥ १०॥ गवां कंडूयनं धूपं गोप्रदानसमं भवेत् ॥ तुल्यं च गोप्रदानेन क्षेयरोगादिपालनं ॥ ११॥
तृणोदकादि संयुक्तां यः प्रदद्याद्गवां महीं ॥ स गोमेधफलं पुण्यं लभते नात्र संशयः ॥ १२॥ बहुना
त्र किमुक्तेन गावः पाल्याः प्रयत्नतः ॥ गावो देया सदा रक्षा स्पृश्या दृश्याश्च सर्वदा ॥ १३॥ योनाड
यति गां पादात्सर्वलोकस्य मातरं ॥ आक्रोशयति यो मोहादाकृष्टं ताडितं जगत् ॥ ताडयेद्यदि
गां मोहाद्योगां क्रोशेन नराधमः ॥ नरकाग्नौ स पच्येत गोनिश्वासप्रपीडितः ॥ १५॥ सपालाशेन दं
डेन ताडयस्तां निवारयेत् ॥ गच्छ गच्छेति तां ब्रूयान्मायाता मिति वारयेत् ॥ १६॥ वृषोत्सर्गं तु यः
कुर्यात्पक्षयोरुभयोरपि द्वादश्यां पौर्णमास्यां वा चतुर्दश्यष्टमीषु च ॥ १७॥ तस्य गावो वृषा विष्णुः
शिवो मा सर्वदेवताः ॥ शांतिं कुर्वंतु सुप्रीताः स्वर्गमायुः श्रियं बलं ॥ १८॥ दास्यंति च सदा नित्यं
कल्याणं भद्रमेव च ॥ यो नरो वर्तते गोषु ताडनाक्रोधवर्जितः ॥ १९॥ महतीं श्रियमाप्नोति रुद्र
लोकं स गच्छति ॥ गोब्राह्मणार्थमुद्युक्तं प्राणैर्यद्धि विमुज्यते ॥ २०॥ प्राप्नोति परमं स्थानं यत्र देवो
महेश्वरः ॥ ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधाकृतं ॥ २१॥ एकत्र मंत्रास्तिष्ठंति हविरन्यत्र
तिष्ठति ॥ न च मंत्रैर्विना यज्ञो हविषा च प्रवर्तते ॥ २२॥ तस्माद्विप्राश्च गावश्च पुण्यात्पुण्यत

रावुभौ॥गोभिर्यज्ञाःप्रवर्त्तंतेगोषुदेवाःप्रतिष्ठिताः॥२३॥गोभिर्वेदाःसमुत्कीर्णस्वर्षिसंघा
पदक्रमाः॥शृंगमूलेगवांनित्यंब्रह्माविष्णुश्चसंस्थितौ॥२४॥शृंगाग्रेसर्वतीर्थानिस्थावरा
णिचराणिच॥शिरोमध्येमहादेवःसुरवसर्वपतिःस्थितः॥२५॥सरस्वतीचहुंकारेयमक्षौच
गंडयोः॥संध्याद्वयंलथेवोष्ठेग्रीवायामिंद्रःसमाश्रयेत्॥२६॥ललाटाग्रेस्थितादेवीनासावंशे
चषण्मुखः॥कंबलाश्वतरौनागौनासापुटसमाश्रितौ॥२७॥कर्णयोरश्विनौदेवौचक्षुषी
शशिभास्करौ॥दंतेषुवायवःसर्वेजिह्वायांवरुणःस्थितः॥२८॥कक्षाणिचककुद्देशेसाध्या
श्चोरसिसंस्थिताः॥चतुष्पादास्तथानित्यंधर्मोजंघाववस्थितः॥२९॥खुरमध्येषुगंधर्वाःखु
राग्रेषुचपन्नगाः॥सुपर्णाःपार्श्वभागेषुगणाश्चाप्सरसांस्थिताः॥३०॥साक्षाद्गंगाचगोमूत्रेगो
मयेयमुनास्थिता॥ऋषयश्चसदासर्वेरोमकूपेषुसंस्थिताः॥३१॥उदरेपृथिवीदेवीसशै
लवनकानना॥चत्वारःसागराःपूर्णागवांयेचपयोधराः॥३२॥जठरेगार्हपत्याग्निर्हृदयेदक्षि
णाग्निकः॥मुखेचाहवनीयाग्निंनयाचांगोपतिव्रताः॥३३॥अस्थिमुज्जेस्थिसंघेषुग्रस्वमे
धानित्यक्रतुः॥यच्चनेकथितंपूर्वंयच्चगोषुप्रतिष्ठितं॥३४॥गोषुदत्तंहुतंभुक्तंगोषुसर्वंचराचरं॥
तस्माद्गावोनहिंस्यास्युःपालनीयाश्चसर्वदा॥३५॥गावस्तुत्याश्चवंधाश्चगावोमांपांतुनित्य
शः॥ब्राह्मणाब्रह्मवादेनस्तूयतेप्रणवेनयः॥३६॥सशिवःशाश्वतोदेवोगोषुमारींव्यपोहतु॥
लंबोदरेणदेवेनगजवक्त्रेणयोर्चितः॥३७॥श्रीमतीरुचिरांगेणघंटाकर्णेनरेश्वरः॥नित्यंप्र

णम्यतेभक्त्याहृष्टेनाध्येनचेतसा॥३८॥ सशिवःशाम्वतोदेवोगोक्षुमारीय्यपोहतु॥नित्यंरु
द्रबलोपेतोरुद्रशक्तिसमन्वितः॥३९॥ घंटाकर्णगणोद्देशः शिवज्ञानविधायकः॥शिवते
जोनुभावेनगोक्षुमारींव्यपोहतु॥४०॥ शिवायदेवदेवायमहादेवाययोगिने॥रुद्रायस्थाण
वेनित्यंहरायोग्रायतेनमः॥४१॥ परमेशायसिद्धायसर्वसिद्धिप्रदायिने॥त्र्यंबकायमहेशा
यअतिशांतायतेनमः॥४२॥ अभिमंत्र्यसदातोयैरग्नैर्मंत्रैर्यथाक्रमं॥प्रोक्षयेत्तुगवांदेहं
ततःशांतिर्भविष्यति॥४३॥यइमंपठतेगोक्षुरोगार्त्तःसविशेषतः॥गोसावित्रीमहापुण्यागवां
शांतिर्भविष्यति॥४४॥यःसमुत्थायसततंगोसावित्रीमिमांपठेत्॥गवांचोत्सर्गकालेषुप्रसक्षा
नेवासवागमे॥४५॥ आयुष्मान्बलवान्श्रीमानगोमानर्थपतिर्भवेत्॥देहांतेशिवसारूप्यंल
भतेनात्रसंशयः॥ ईश्वरउवाच॥ ॥योलंकृत्यशिवेगांधेसवत्सांचनिवेदयेत्॥सोश्वमेध
स्ययज्ञस्यफलमाप्नोतिपुष्कलं॥४७॥ प्रभूततनोयेषुवहृतपोक्षुसुपुंगवानित्यसरोमवत्साः
॥चरंतुगावःसुखिताबनेषुक्षीरंप्रयच्छंतिमुखंवहंदंतु॥ ॥४८॥ ॥ इतिश्रीशिवरहस्येमहा
देवाख्यरंग्कादशांशेगोसावित्रीकथनंपंचचत्वारिंशोध्यायः॥४५॥ ॥ श्रीमहादेवायनमः॥
॥ ॥ईश्वरउवाच॥ ॥सुविनीतांस्त्रियंदासीभत्यंवाचानिवेदयेत्॥ नरमेधस्ययज्ञस्य
फलंप्राप्नोतिपुष्कलं॥१॥निवेदयतियोनागंभक्त्याभद्रमलंकृतं॥शिवायपर्वदिवसेतस्य
पुण्यफलंश्रृणु॥२॥ममतेरावतप्रख्यैःगजैर्युक्तैःसुशोभनैः॥प्रक्रीडतेमहायानैःशतसं

न्नै रनेकशः॥३॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च॥ रुद्रलोकं गतश्चांते भवेदिंद्रः श्रु

ताधिपः॥४॥ चतुर्युगसहस्रांते सर्गां प्राप्य नराधिपः॥ भवेद्दिंद्रसमः श्रीमान् रूपवीर्यसमन्वि

तैः॥५॥ यः शिवाय जलोपेतां सर्वसस्यप्ररोहिणीं॥ महीं महीपतिर्दद्यात् तस्य पुण्यफलं श्रु

णु॥६॥ यावद्दंगा भवेद्भूमिर्मर्यमाना समंततः॥ तावत्कल्पसहस्राणि रुद्रलोके महीयते॥७॥

एवं सर्वत्र विज्ञेयं फलं दंडप्रमाणतः॥ ग्रामखेटपुरक्षेत्रविषयादिनिवेदने॥८॥ सर्वसस्यज

लोपेतं सर्वबाधाविवर्जितं॥ ग्रामं शिवाय यो दद्यात् तस्य पुण्यफलं श्रुणु॥९॥ सर्वयज्ञेषु यत्पु

ण्यं सर्वतीर्थेषु यत्फलं॥ सर्वदानेषु यत्पुण्यं ग्रामदानेन तद्भवेत्॥१०॥ सूर्यकोटिप्रतीकाशैः दि

व्यस्त्रीकोटिसंयुतैः॥ संयुतैः कोटिशोयानैः सर्वकामान्वितैः॥११॥ सोनेन ग्रामदानेन त्रिसप्तकुल

संयुतः॥ यथेष्टमैश्वरे लोके क्रीडते कालमक्षयं॥१२॥ पुण्यं नगरदानस्य ग्रामदानाच्छताधि

कं॥ देशादानेन चानन्त्यं न शक्यं तत्र कीर्तितं॥१३॥ रत्नयानेनु गोश्वार्थ सर्वभूमौ प्रजायते॥ तस्मा

द्भूमिप्रदानेन नरो भवति सर्वदा॥१४॥ योन्यदत्तां स्वदत्तां वा हरेद्भूमिं नराधिपः॥ सपच्यते क्ष

यं कालं नरकेषु क्रमेण सः॥१५॥ सर्वं वा भूमिहरणे हतमेव न संशयः॥ भूमिहर्त्ता वसेत्तस्मान्नर

के कालमक्षयं॥१६॥ देवस्वनिहर्ता हि नरक निर्भया॥ ब्रह्मस्वानि च यो मोहात् पच्यते नरके

षु ते॥१७॥ देवब्रह्मस्वपुण्यानि वाहनानि महीयते॥ युध काले विशीर्यंते सेकताः सेतवो यथा॥

भूमिप्रदो वसेत्स्वर्गे यावत्कालस्य संख्यया॥ तस्माच्छतगुणं काले तद्धर्ता नरके वसेत्॥१९॥विं

शात्यष्टौ भयः कोट्यो नरकाणां सुदारुणां॥ क्रमेण तासु पच्यंते देवब्रह्मस्वहारिणः॥२०॥ कल्पांते
च समुत्तीर्णाः कृमिकीटादियोनिषु॥ भ्रमंति चिरकालं तु क्षुत्पिपासादिपीडिताः॥२१॥ केनचिच्छि
वभक्तेन शिवार्चायतनादिषु॥ उपयुक्ता भवंतीह यावत्तावद्य पादपाः॥२२॥ ततो निर्धूतपापाश्च
ते नराः शिवतेजसाः॥ दिवं प्रयांति संत्यज्य शरीरं यातनात्मकं॥२३॥ देवब्रह्मपरद्रोहं तस्मात्संत्य
ज्य शंकरं॥ ये पूजयंति भूदेवास्ते यांति परमं पदं॥२४॥ य इदं पठते ध्यायं शृणुयाद्वा समाहितः॥
स विधूय शुपापानि शिवलोके महीयते॥२५॥ अतः परमिदं गुह्यं वक्ष्यामि मुनिसत्तमः॥ पु
ण्यातिशायसंयुक्तं सर्वदेवैरनुष्ठितं॥२६॥ ब्रह्मणा विष्णुना देव्या स्कंदेंदुभ्यां यमेन च॥ वरुणा
दित्यसोमाग्निर्मरुद्भुर्नदनारदैः॥२७॥ धर्मश्रीशुकनक्षत्रयिलोहितशानैश्चरैः॥ विश्वामि
त्रवसिष्ठात्रिबृहस्पतिबुधादिभिः॥२८॥ श्वेतागस्त्यदधीचाद्यैः सर्वैश्च मुनिसत्तमैः॥ भृं
गिमातृमहाकालचंडेश्वरगणाधिपैः॥२९॥ शेषवासुकिकर्कोटगुलिकानंततक्षकैः॥ प-
द्मशंखमहाशंखैरन्यैश्चापि महोरगैः॥३०॥ ~~शेषवासुकिकर्कोटपुलि~~। अनुष्ठितं शिवप्री
तिजनकं सर्वदा मुने॥ शिवे गतिर्यया प्राप्ता सर्वगत्यनिरोधिनी॥३१॥ मया चेशप्रसादेन तथा
शृणु विधिं परं॥ शीतचंदनतोयेन स्नाप्य लिंगं विलिप्य च॥३२॥ श्वेतैर्विकसितैः पद्मैः संपू
ज्य प्रणिपत्य च॥ तत्र पद्मासने सौम्ये निश्छिद्रे पुष्पिते सिते॥३३॥ मध्ये केशवजालस्य स्था
प्यालिंगं कनीयसं॥ अंगुष्ठप्रतिमं लिंगं सर्वगंधमयं शुभं॥३४॥ स्थाप्य दक्षिणमूर्तौ तु वि

ल्वपत्रैः समर्चयेत्॥ अगरुं दक्षिणे पार्श्वे पश्चिमे तु मनःशिलां॥ ३५॥ उत्तरे चंदनं दद्यात्स गुरुं चापि गुग्गुलं॥ वांमांसि चाथ सूक्ष्माणि विकोशानि नवानि च॥ ३६॥ पायसं घृतसंमिश्रं घृतदीपांश्च दापयेत्॥ सर्वं निवेद्य मंत्रेण ततो गच्छेत्प्रदक्षिणं॥ ३७॥ प्रणम्य भक्त्या देवेशं स्तुत्वा चांते समापयेत्॥ सर्वोपहारसंयुक्तं ततो लिंगं निवेदयेत्॥ ३८॥ शिवाय शिवमंत्रेण दक्षिणामूर्तिमाश्रितः॥ अनेन विधिना देव सर्वे देवत्वमागताः॥ ३९॥ देवी देवीत्वमापन्ना स्कंदः स्कंदत्वमागतः॥ ब्रह्मा ब्रह्मत्वमापन्नो हरिर्विष्णुत्वमागतः॥ ४०॥ इंद्रश्च देवराजत्वं गणाश्च गणतां गताः॥ एवं योर्च्यते लिंगं पंचगंधमयं शुभं॥ ४१॥ सर्वपापविनिर्मुक्तः शिवलोके महीयते॥ एतद्धि तु सम गुह्यं शिवलिंगं महाव्रतं॥ ४२॥ भक्तस्य ते मयाख्यातं न देयं यस्य कस्यचित्॥ शिवभक्तिसदा देयं शिवेन कथितं पुरा॥ ४३॥ चिरेण ग्रथितं माल्यं शिवस्योपनयेत्तु यः॥ गोसहस्रफलं तस्य भवतीति न संशयः॥ ४४॥ हरस्याध्यायमेतत्तु पठते शृणुते च यः॥ अचिराल्लभते दृष्टिं शिवलोकं च गच्छति॥ ४५॥ यः पूजयेत्शशिकलाकलितं सुमांगलिंगार्चनेन स ततं किल शांग चर्याः॥ पापामुखं गमति भंगमलं गकुंभविद्रावणे कसुधियः प्रभवं रुद्राः॥ ४६॥ ॥ इति श्रीशिवरहस्ये महादेवाख्ये एकादशांशे षट्चत्वारिंशोध्यायः॥ ४६॥

श्रीमहादेवाय नमः॥ ॥ श्रीईश्वर उवाच॥ ॥ अन्यैर्वीर्यैस्तथा मर्त्यैरल्पसत्त्वैर्नरैभिः शिवे संवत्सरसहस्रेश्च सदा मां पूजयेत्तु मे॥ १॥ न पश्यंति सुराः सर्वे नरा येवानरोपमाः॥ कथं मां

क्तिरहितोनिर्भाग्याःपूजयंत्यपि॥२॥ तथापिश्रद्धयादेवःपूज्योहिसर्वभावतः॥ प्रसंगाद्दे
वसंपूज्यभक्तिहीनैरपिद्विजैः॥३॥ भावानुरूपफलदोभगवानितिकीर्तितः॥ उच्छिष्टःपूज
यन्यातिपैशाचंचद्विजाधमः॥४॥ संक्रुद्धोरक्षसांस्थानमालस्याद्गोह्यकंशिवे॥ अभक्ष्यभ
क्ष्यःसंपूज्यः यक्ष्यप्राप्नोतिमानवः॥५॥ गानशीलश्चगांधर्वंनृत्तशीलस्तथाप्सरः॥ ब्राह्महि
प्रणवेनैववैष्णवंचाभिनंदकः॥६॥ श्रद्धयासकृदेवापिसमभ्यर्च्यमहेश्वरं॥ गायत्र्याचसम
भ्यर्च्यसोमस्थानमवाप्नुयात्॥७॥ पंचाक्षरेणाभिपूज्यरुद्रलोकेवसेन्नरः॥ कल्पमेकंदिव्य
देहः शिवरूपेणसंगतः॥८॥ पंचभिर्ब्रह्मभिःपूज्यशिवंशिवगणोभवेत्॥ संशोध्यचशुभैर्लि
गंममपीठंशुभोदकैः॥९॥ अद्भिःपीठंतथापूतेलिंगेचावाह्यशंकरं॥ दृष्ट्वादेवंतदालिंगेस
पुष्पंमस्तकेक्षिपेत्॥१०॥ कल्पितेचासनेतत्रनिर्माल्यमपनोद्यच॥ पाद्यमाचमनंचार्घ्यं
दत्वारुद्रायशंभवे॥११॥ स्नापयेद्गंधतोयेनपाटलीमिश्रितेनच॥ क्षीरेणचगवांनित्यंघृ
तेनचसुगंधिना॥१२॥ दध्नाचमधुनाचैवकीटहीनेनशांकरि॥ ऐक्षव्यासितयाचापिस्ना
पयेद्देवमीश्वरं॥१३॥ नारिकेलोदकैःशुद्धैःस्नापयेद्देवमीश्वरं॥ नारिकेलोदकैःस्नाप्य

१ २ गंधोदैः पःचाम्रकसुफानसैः॥१४॥ जंबीरसारैःकुशपुष्पैर्हिरण्यजैः॥अखंडनीरधाराभिःस्नापये
त्परमेश्वरं॥१५॥ रुद्रेणचमकेनैवचित्यापौरुषसूक्तकैः॥ कद्रुद्रैःपावमानैश्चवामदेवा
दिसामभिः॥१६॥ रथंतरैःस्तथारौद्रैःशिवेपर्वशिरवादिभिः॥ स्नापयेद्देवदेवेशंतर्पयेद

षनामभिः॥१७॥ वाससामर्ज्य पीठे तु स्थाप्य लिंगं महेश्वरं॥ भस्मना चंदनाद्यैश्च लेपये
त्साक्षतादिभिः॥१८॥ रोचनाद्यैस्तु संपूज्य चंद्रैश्चैव महेश्वरं॥ विल्वपत्रैरखंडैश्च दू
र्वापामार्गदर्भकैः॥१९॥ नीलोत्पलैस्तथा पद्मैः नंद्यावर्त्तैः शिरीषकैः॥ मल्लिकाचंपकैर्जा
जीबकुलार्कशमीसुमैः॥ करवीरैश्च कुटजैः पाटलीद्रोणसंभवैः॥ कनकैर्दहनोपुष्पैः पु
ष्पैरारग्वधोद्भवैः॥२१॥ पूजयेन्नामभिर्देवि विनिधनेत्यादिभिः शिवे॥ दत्वा पंचविधं धू
पं नगरागरुकेसरं॥२२॥ देवद्रुसंभवं बैल्वं गुग्गुलं सघृतं शिवे॥ दीपान्प्रज्वाल्य घृतजो
पायसं च निवेदयेत्॥२३॥ दधिभक्तं च मध्वाज्यं परिस्रुतमुमापते॥ शुद्धान्नं चैव मुद्गान्नं
माषान्नं विनिवेदयेत्॥२४॥ माषापूपं गुडापूपं गोधूमापूपमेव च॥ सघृताद्यं चोष्मपाक
जन्याः शाष्कुलिकास्तथा॥२५॥ खर्जिकालड्डुकाश्चैव मोदकाः फेणिकाः शिवे॥ मंडकाभक्ष्य
भोज्यं च निवेद्यं स्यात्सदाशिवे॥२६॥ शाकसूपादिदध्यन्नं गुडान्नं विनिवेदयेत्॥ क्रमे
णैवं फलैः श्रेष्ठं पानकैर्मंजिकां तथा॥२७॥ तांबूलमष्टगंधाढ्यं सकल्कं विनिवेदयेत्॥
नीराजयेत्ततो दीपैः शानसाहस्रवर्तिकं॥२८॥ वृषकुंभगजाकारं नागमानुषरूपकं॥ नाक्ष
त्रं दीपकं दद्यात्सद्योजातादिपंचकं॥२९॥ दीपपात्रेषु देयं स्यात्ततः कर्पूरखंडजं॥ रक्षाबं
धं ततः कुर्याद्भस्मना त्रिः क्रमेण तु॥३०॥ ऋग्सामयाजुषाथर्वमंत्रैस्तुत्वा महेश्वरं॥ पौराणै
र्वा नवैर्वाथ स्तुवीत परमेश्वरं॥३१॥ ईशानं पुरुषं चैव मघोरं वाममेव च॥ सद्योजातं जपे

त्पश्चात्पंचभिः पूजयेच्छिवं॥ ३२॥ छत्रंच चामरे दिव्ये व्यजनादर्शकं ध्वजं॥ वीणावेणुमृदंगा
दीन्घंटश्च दुंदुभिकाहलै॥ ३३॥ चामीतंत्रीमयं श्रेष्ठं आलिंग्याच्चमुखोद्भवं॥ वाद्यंच श्रेष्ठमि
त्याहुः शिवार्चासु महेश्वरि॥ ३४॥ अलाभे सर्ववाद्यानां घंटाघोषः प्रशस्यते॥ रत्नस्वर्णोद्भ
वं पात्रं राजतं ताम्रजं तथा॥ ३५॥ कांस्यपैत्तलसंभूतं दारवं चाश्मसंभवं॥ मौक्तिकं पत्रसंभू
तं मृण्मयं वा अलाभतः॥ ३६॥ कल्पयेच्छिवपूजायां फलं स्यादुत्तरोत्तरं॥ पंचामृतं चान्य
गव्यं कापिलं स्यात्ततोधिकं॥ ३७॥ नारिकेलात्तथैवान्याछ्रुतं नत्र प्रशस्यते॥ रंभासुवर्णपीता
श्चप्रशस्तास्त्वभिषेचने॥ ३८॥ इक्षुभ्यः पौंड्रकं चेक्षु प्रशस्तं स्नपने शिवे॥ गुर्णवल्मीकसंभू
तान्मधुपार्वत्युत्तमं॥ ३९॥ कृष्णानि षिद्धं देवेशि पैत्तके विनियोजयेत्॥ लाटकाकूपमु
त्कृष्टं ततः कुल्योद्भवं शिवे॥ ४०॥ ततोनदीभवं पुण्यं सागराभिमुखासु च॥ शंखोदकं तथो
त्कृष्टं सर्वपात्रजलैरपि॥ ४१॥ सर्वतैलैरपि शिवे चोत्कृष्टं तिलजं सदा॥ महारंतिष्ठ तेजा-
जीदिवारात्रौ च मल्लिका॥ ४२॥ पद्मं नीलोत्पलं चैव मुकुलं वादिनत्रयं॥ न पर्युषितदोषोस्ति
बिल्वपत्रे शिवप्रिये॥ ४३॥ न पर्युषदोषोस्ति हेमरत्नाय कल्पके॥ अलाभे बिल्वपत्राणां नि
र्माल्यैः क्षालितैर्यजेत्॥ ४४॥ पुष्पाणामप्यलाभे तु तत्पत्राणि निवेदयेत्॥ कुड्मलैर्नार्चयेद्दी
र्घां पद्मस्य कुसुमस्य च॥ ४५॥ विना पद्मोत्पलं देवि सायं मंदारकैर्यजेत्॥ मल्लीभिर्जातकाभि
श्च पालश्चंपकनंदकैः॥ ४६॥ मध्याह्ने कर्णिकारैश्च करवीरैश्च पाटलैः॥ पुन्नागैः पारिजातैश्च पु

ल्प

घेरन्यै श्च पयोवलं ॥ ४७॥ कनकं केतकीपुष्पं निशि कां दं व जैर्यजेत् ॥ सर्वदा बिल्वपत्रं मे प्रि
यं शैलेंद्रकन्यके ॥४८॥ विल्वपत्रे च कमले कमला सुप्रतिष्ठिता ॥ नीलोत्पले विंकाः साक्षा हल्ल
केषणमुखः स्थितः ॥ ४९॥ पुंडरीके महादेवः गणेशः शतपत्रके ॥ कर्णिकारे स्थितो वेधा मल्लि
कासु हरिः स्थितः ॥५०॥ कर्णिकारे स्थितो नंदी दुर्गा पाटलकेषु च ॥ श्वेतार्के चैव चंडीशा पुष्पे
षु गणपाः स्थिताः ॥ ५१॥ यमो नीलेषु पुष्पेषु रक्ते पर्णा प्रतिष्ठिता ॥ शुभ्रपुष्पार्चने मुक्तिः भुक्तिर
क्तसमार्चने ॥५२॥ पीतं वश्यकरं देवी नीलं मारणके भवेत् ॥ अनेन विधिना देवः प्रसीदति
महेश्वरः ॥५३॥ कृष्णागरूद्भवं धूपं सर्वपापनिकृंतनं ॥ साम्राणिके गुग्गुलजं धूपं वश्यकरं
भवेत् ॥ ५४॥ सर्वरोगहरं चैव सघनं धूपमुत्तमं ॥ मारणोच्चाटने नैव धूपदीपे पिसत्तमे ॥५५॥
कौसुंभतैलं वश्यं स्याच्छिवदीपप्रदानतः ॥ सार्षपं रोगनाशाय मधूकं राजवश्यकं ॥५६॥ ॥५७॥
नारिकेलोद्भवं तैलं स्त्रीवशीकरणं शिवे ॥ तिलतैलं ज्ञानदायि शिवाग्रे दीपदायके ॥५८॥
हैरंड बुद्धिमांद्यं स्याच्छिवाग्रे दीपदानतः ॥ गव्यमाज्यं मुक्तिदायी महिषं पुष्टिकृद्भवेत् ॥
॥५८॥ ॥६०॥ एवं धूपादि दीपेषु पुष्पेषु फलमंबिके ॥ यथालाभं प्रकुर्वीत भावयुक्तो न दुष्यति ॥
५९ ॥६१॥ दशपुष्पांगपत्राद्यैर्वस्त्रैश्च महेश्वरि ॥ उपयुक्ताः शिवाचार्यैर्गावो या लोकमातरः ॥
॥६०॥ गतिं प्रयांति परमां किं पुनर्मानवाः शिवे ॥ द्विजाः क्षत्राविशः शूद्राः स्त्रियो वापि च संक
राः ॥ ६१॥ शंकरार्चासु निरताः प्रयांति परमं पदं ॥ पूजयेद्यः शिवं रुद्रं शर्वं शिवमजं सकृत् ॥ ६२॥

सयाति शिवसायुज्यं त्रिसप्तकुलसंयुतः॥ पूजितं वा महादेवं पूज्यमानमथापि वा॥ ६३॥ दृष्ट्वा
प्रयाति वै मर्त्यो रुद्रलोकं न संशयः॥ अर्चितं मानरीसंन्वैर्लिंगे देवमुमासखं॥ नैशपापाद्विमु
च्येत मध्यान्हे हयमेधभाक्॥ सायं जन्मायुतोद्भूतं दृष्ट्वा न त्यापनाशकृत्॥ ६५॥ निशीथे तु म
हादेवमभिवीक्ष्य विमुक्तिभाक्॥ दृष्ट्वा प्रभुत्वापि मोदे द्दासयाति गणतां मम॥ ६६॥ सकृत्प्रसं
गतो लिंगमनं गांग हरस्य हि॥ दृष्ट्वा न त्वाभिगच्छेत प्रादक्षिण्यनशं करि॥ ६७॥ बहिरेव स्थि
तो नत्वा गच्छेन्मार्गे मतंद्रितः॥ एकप्रदक्षिणा लिंगे चंडेशादर्शनं तथा॥ ६८॥ अदीपदर्श
नं चैव शिवस्याराधनक्रिया॥ ब्राह्मणानां परीवादः हंति पुण्यं पुराकृतं॥ ६९॥ ॥ ॥
ईश्वर उवाच॥ ॥ इत्येतत्ते समासेन फलाफलविनिर्णयं॥ पुण्यं च दर्शनं शंभोः दीपधूप
निवेदनं॥ ७०॥ कथितं प्रथितं देवि मथितं शांभवं वरं॥ नानायोनिषु संचरन् विधिवशा
द्विप्रत्यभित्यादिराहूर्णित्वेखिलवेदजालकलनाद्वाराग्निहोत्रैरलं॥ अग्निष्टोममखा
दिभिः क्रतुवरैरिष्ट्वापि विश्रांतिमेवानमस्त्वगतो विरज्य विषये त्यक्तैषणो मस्करी ब्रह्मा
त्मैक्यरतिर्विमुक्तपदभाक् ईशार्चको मुच्यते॥ ७२॥ ॥ इति श्रीशिवरहस्ये महादेवाख्ये
एकादशांशे सप्तचत्वारिंशोध्यायः॥ ४७॥ ॥ श्रीमहादेवाय नमः॥ ॥ श्रीशिव उवाच॥ ॥
अथ संक्षेपतो वक्ष्ये शिवभक्तानुकंपया॥ अद्यशाखोपशाखार्थं शिवधर्मसमन्वितं॥ १॥ क श्रीशिव
कृत्य चिद्दृष्ट्वैव दापश्येच्छिवलिंगमपूजितं॥ ग्रामे वा नगरे वापि विपिने पर्वते पथि॥ नदीतीरे

शिवक्षेत्रेष्वन्यलिंगालयस्थितं॥२॥ तदासंपूज्यनत्वावायोगच्छेत्सगणोपमः॥ स्नाननैवेद्य
वस्त्राद्यमारदीनप्रियाणिच॥३॥ दत्तंयच्छिवमुद्दिश्यसर्वदानात्परंहितत्॥ दृष्ट्वाशिवाल
यंदूरात्प्रणमन्यापहन्नरः॥४॥ सर्वपापैःप्रमुच्येतनात्रकार्याविचारणा॥ चतुष्पथेनदीतीरे
त्तेशिवभक्तशिवेतथा॥५॥ हस्तियानासनाश्वाभ्यःशिवयोगिंयतिंतथा॥ अवतीर्यनमस्कु
र्यादृष्ट्वालिंगंदृढव्रतः॥६॥ त्वरयाभक्तिमान्नाश्च नभावयुक्तोयदिप्रिये॥ तत्रस्थोपिनमःस्कृ
त्वाशिवलोकेमहीयते॥७॥ सोष्णीषीकंचुकीवापिप्रविशेद्यःशिवालयं॥ तत्पापेनप्रमुच्ये
तत्वरायुक्तोविभालिधक्॥ श्वगाजमासंलशुनंकरंजंगृंजनंतथा॥ आरनालंचसौवीरम
भक्ष्यंतद्विवर्जयेत्॥९॥ शिवार्चकःसर्ववर्णोमधुमांसंविवर्जयेत्॥ सर्वदानोग्रतपसाम
श्वमेधायुतस्यच॥१०॥ फलमाप्नोत्ययत्नेनमत्स्यमांसविवर्जनात्॥ सर्वदोषाश्रयंमद्यमति
दूरेविवर्जयेत्॥११॥ क्वमद्यंक्वशिवेभक्तिः क्वमांसंक्वशिवार्चनं॥ मांसमद्यप्रसक्तानांदूरेति
ष्ठतिशंकरः॥१२॥ सर्वतीर्थेषुयत्पुण्यंसर्वयज्ञेषुयत्फलं॥ तत्फलंलभतेसर्वंयोमद्यंपरि
वर्जयेत्॥ १३॥ अभक्ष्यमपिभक्ष्यंस्यादोषधार्थेनभिःशिवे॥ अंतरेणसुरामांसंइतिसर्व
श्रुतीरितं॥१४॥ गर्भादिसर्वसंस्कारश्मशानाद्येश्वभोजनं॥ सर्वश्राद्धानिनित्यात्माशि
वभक्तोविवर्जयेत्॥ १५॥ रजस्वलादिसंस्पृष्टिमंत्यजंश्वानशूकरं॥ नगोब्राह्मणभस्मादिलिं
गछायापदास्पृशेत्॥१६॥ नलंघयेतनिर्माल्यंशिवस्य परमात्मनः॥ धारयेच्छिवनिर्माल्यंभ
१व

त्यालोभान्नधारयेत्॥१७॥ भक्षणान्नरकंगच्छेन्नविलंघ्यचमूढधीः॥नतस्यस्नाननैवेद्यंप्रति
ग्रहणानिशंकरः॥१८॥ तत्रनैवेद्यनिर्माल्यंभुक्त्वानैवप्रपूजयेत्॥ यत्रनैवेद्यनिर्माल्यमलभुक्
पूजयेच्छिवं॥१९॥ तत्स्पर्शभीत्यादेवोपिगच्छत्यत्यंनदूरतः॥असंस्पृश्योभवेत्सोपियोनिर्माल्य
मलंस्पृशेत्॥२०॥तस्मान्नसंस्पृशेल्लिंगेनरोनिर्माल्यदूषितः॥निर्माल्यंनिर्मलैर्नैवभोक्तव्यंस्या
च्छिवस्यहि॥२१॥ स्वयंलिंगेचयद्दत्तंगंधपुष्पफलादिकं॥पायसापूपभक्ष्यादिभक्षयेच्छिवभ
क्तिमान्॥२२॥ स्वायंभुवेबाणलिंगेरत्नलिंगेषुपार्थिवे॥विनाभिषेकपूज्यादिनैवेद्यंभोज्यमे
वहि॥२३॥ धातुजेषुचलिंगेषुनैवदोषोनिवेदने॥मलोदरैर्नैवभोज्यमघौघैःदूषितात्म
भिः॥२४॥ स्त्रीशूद्रयतिभिःपूज्येमानुषस्थापितेच्छिवे॥नैवेद्यंनैवगृह्णीयान्मानवैःकंठ
गतैरपि॥२५॥ चंडेशाधिकृतिर्यत्रतत्रनिर्माल्यदूषणं॥चंडेश्वरस्याभिमतंनिर्माल्यंभक्षि
तंनभिः॥२६॥ तामसंवंशलोकेननिर्देहस्थानिचंडकैः॥सर्वत्राधिकृतःसोपिमहात्माशिवभ
क्तिमान्॥२७॥ तस्यैवजीर्णनैवेद्यंभुक्त्वानृनिहताशुभः॥नचंडेश्वरतुल्योस्तिभक्तोन्योभु
वनत्रये॥२८॥ शिवनैवेद्यभुक्तस्यसहिपात्रंशिवेनदा॥ नान्येषांग्रहणेदेविअधिकारोस्ति
सर्वदा॥२९॥ नभोज्यंशिवनिर्माल्यमशुद्धानांशिवेसदा॥नविशेषतयाग्राह्यंभक्ष्यभोज्यां
बुशांकरं॥३०॥ यतोमलोदरैर्देविनभोज्यंस्यान्निवेदितं॥अवैदिकोअत्रौवाहिभुक्त्वानरक
मच्छति॥३१॥ मूर्तयोष्टौशिवस्यैताःतासुनिंदांविवर्जयेत्॥ भूमिरापोनलोवायुःखंवि

विल्वं दीक्षितो द्विजः ॥३२॥ गुरौ च शिवभक्तेषु तपसा धूतपाप्मसु ॥ अष्टम्यादिषु सर्वेषु भूता
दिषु च पर्वणि ॥ ३३॥ सोमवारेषु सर्वेषु नक्तभुक्त्वा पर्व वर्जितं ॥ एकादश्यां च कृष्णायां शिवम
र्च्याथ नक्तभुक् ॥ ३४॥ कुर्याद्विशेषतः पूजां शक्त्या मुपवासकृत ॥ द्वादश्यां कुत्सितं श्रेष्ठं च दुर्वा
रेषु कदाचन ॥३५॥ श्मश्रु कर्मागनाभ्यंगं प्रयाणं च विवर्जयेत ॥ स्त्री द्यूत मत्स्य मांसाद्यं सर्वप
र्वसु वर्जयेत ॥ ३६॥ त्रिकालं वा द्विकालं वा स्नानं नैत्यकमाचरेत ॥ रुद्रसूक्तैर्मार्जनानि कुर्वन्कु
र्वैर्विधानतः ॥ ३७॥ शौचं च मज्जलैः कुर्याद्गंधलेपक्षयावधि ॥ अस्नानो यस्तु नैवेद्यं विपापमद्या
त्स केवलं ॥ ३८॥ पंचाक्षरं च गायत्रीं रुद्रं च शतवारकं ॥ अजपन् क्रिमिभुक्सस्यात् अजुह्व
न् शोणितं पिबेत् ॥ ३९॥ अनर्चन् लिंगमस्नातः परेतो रेतपो भवेत् ॥ अभोज्यः पन्चा प्यति
थिं विशापूर्णमुखो भवेत ॥ ४०॥ नस्यान्स्नात्वैव भुंजीत अशक्तो भस्ममज्जनः ॥ प्रातः स्ना
त्वांभसा पूर्वं भस्मस्नानं समाचरेत ॥ ४१॥ संध्यामुपास्य विधिवद्धेतानेजुहुयाज्जपेत् ॥
पंचाक्षरं च गायत्रीं श्रीरुद्रं प्रणवं तथा ॥४२॥ लिंगेर्चयेन्महादेवं त्रिसंध्यं बिल्वपल्लवैः ॥
देवर्षीन् पितृमुख्यांश्च संतर्प्याधीतवेदकः ॥४३॥ कंदमूलफलान्नैश्च वर्जयेदतिथिप्रियः ॥
त्रिसंध्यमाचरेद्यस्तु शिवार्चाचारमुत्तमं ॥४४॥ संध्ययोर्भोजनं देवि मनैर्वे घादिशेषतः ॥
न नक्तं शोषयेद्देहं स्त्रीमंवाप्यतिथेरपि ॥४५॥ एवमाचरते धन्यः शिवभक्तः शिवार्चकः ॥ पाप
कंचुकमुत्सृज्य जीर्णां त्वचमिवोरगः ॥४६॥ स्ववंशपितृभिः सार्धं शिवलोके महीयते ॥ कुर्या

द्भृतं चतुर्मासं महापूजाप्रवर्तनं ॥४७॥ आषाढश्रावणे देवि कार्तिके मार्गशीर्षके ॥ एकभुक्तेन नक्तेन मुक्तिकामोऽशिवार्चकेः ॥४८॥ भोजयेच्छिवभक्तांश्च शक्त्या दानं च दापयेत् ॥ आषाढे फलपूजा स्याद्यस्य कस्य शतावर्कं ॥४९॥ श्रावणे पारिजातैश्च पूजयेल्लक्षसंख्यया ॥ कार्तिके दीपमालाभिर्दीनयेच्छिवमंदिरं ॥५०॥ हेमंती भिमार्गशीर्षे तुषः संपूजयेच्छिवं ॥ वसेच्छिवपुरे रम्ये चातुर्मास्यार्चको नरः ॥५१॥ त्रिसप्तकुलसंयुक्तः सर्वभोगसमृद्धिभाक् ॥ एवं पर्वोत्सवे श्राद्धे मासेषु नियताशनः ॥५२॥ भोजयेच्छिवनैवेद्यैः शिवसंपूज्य वाग्यतः ॥ पितरः सर्वदेवाश्च शिवमाश्रित्य संस्थिताः ॥ वसेच्छिवपुरे रम्ये सर्वभोगसमृद्धिभाक् ॥५३॥ एवं पर्वोत्सवे श्राद्धे मासेषु नियताशनः ॥ प्रीते शिवे नु ते सर्वे सुप्रीताः स्युर्न संशयः ॥५४॥ वृक्षस्य मूलसेकेन शाखाः पुष्यंति वै यथा ॥ शिवे शिवार्चने प्रीते न तुष्यत्यस्य वपुर्जगत् ॥५५॥ नानिष्टमाचरेत्किंचित्सर्वदेहेषु सर्वदा ॥ मनोवाक्कायजैर्दोषैर्नैयनात्मापि पापिषु ॥५६॥ यदि कुर्यात्प्रमादेन सोऽष्टमूर्तेरनिष्टकृत् ॥ किं पुनः पुण्यदेहेषु शिवात्मसु महेश्वरि ॥५७॥ ज्ञानवैराग्यसंपन्नं भस्मनिष्ठं जितेंद्रियः ॥ वश्यात्मानं यतात्मानं शांतं दांतं तपस्विनं ॥५८॥ भोजयेल्लभ्यं देवि वेदवेदांतपारगं ॥ पंक्तिपावनमूर्धन्यं श्राद्धेषु शिवयोगिनं ॥५९॥ यदीश्वरादितत्त्वानां परिज्ञाता रमीश्वरि ॥ नेति श्रेष्ठं हृदि संप्राप्तं न चेष्टमभिन्नं दति ॥६०॥ भावसाधर्म्यवैधर्म्यैर्मेतज्ज्ञानस्य लक्षणं ॥ वर्णेष्वप्यधिको विप्रो विप्राद्वेदविदुत्तमः ॥६१॥ वेदविद्भ्योऽर्थवित्श्रेष्ठस्तस्माद्याज्ञी विशिष्यते ॥

ततोपि सत्रयाजी स्याद्दर्शिभ्योप्यधिको गृही ॥६२॥ वनी गृहिभ्यो प्यधिकः संन्यासी च ततोधिकः
॥ ततो वेदांतविच्छ्रेष्ठः रुद्रजापी ततोधिकः ॥६३॥ सर्वेषामेव वर्णानां त्रैवर्णे पुरुषो नरः ॥ पुरुषे
भ्यो द्विजश्रेष्ठस्ततो वेदग्रंथपारगः ॥६४॥ ग्रंथज्ञाद्वेदविद्वांसस्तेभ्यः स्तत्वार्थचिंतकः ॥ तत्ववि
द्भ्यो योगविज्ञो विशिष्ट इति मे मतिः ॥६५॥ वेदांतविद्भ्यो कोटिभ्यो विशिष्टाः शिवयोगिनः ॥ यो
गज्ञा योगनिष्ठाश्च पितरो येऽपरासंभवाः ॥६६॥ भुक्ते भीर्णं लिते तस्मात् विशिष्टाः शिवपि विष्टकाः ॥
सर्वयज्ञतपोदानैः कृतैः सांगैश्च यत्फलं ॥६७॥ शांभवो वेदविद्विप्रो भस्मनिष्ठोत्र भुज्यते ॥
नैतेन किं ग्रहस्थेन मासेनक्रतुशतैरपि ॥६८॥ त्रैविद्या वेदिनः श्रेष्ठा दाशाताध्यायिनोपि च ॥
ततोपि याजुषाश्रेष्ठास्ततो वाजसनेयिनः ॥६९॥ साम्नापदस्वराभिज्ञा छंदोगाश्च ततो बिके ॥
ततोथर्वविदः श्रेष्ठाः स्ततो मंत्रविदस्मृताः ॥७०॥ कद्रुद्राजाप्यनिरताः शतरुद्रं च जाप
काः ॥ भस्मनिष्ठा रुद्रजाप्यनिरताः पापवर्जिताः ॥ त्रिमधुस्त्रिसुपर्णश्च वामदेवाश्च सामगाः
॥ ज्येष्ठार्चनरतो राजा तथा वै जेष्ठसामगः ॥७२॥ षडंगवित्ततो देवि ततो प्युपनिषत्परः ॥ ब
हज्जाबालनिरतः पुराणेषु च निष्ठितः ॥७३॥ इतिहासविदश्रेष्ठः ततो धर्मविदुत्तमः ॥ त
थाथर्वशिरो वेत्ताशिरवाध्यायी ततोपि हि ॥७४॥ कैवल्योपनिषध्यानध्यायी मेध विशिष्य
ते ॥ कालाग्निरुद्रजापी स्यात ततो देवि विशिष्यते ॥७५॥ ततः शिवरहस्यज्ञः शांभवश्रेष्ठ
उच्यते ॥ वश्येंद्रियः प्रसंन्नात्मा योन द्वेष्टि न कांक्षते ॥७६॥ शब्दादिविषयान्भोग्यान्योजा

नातिगुणागुणं॥ ज्ञानं वैराग्यसंपन्नः प्रसन्नः संयतेंद्रियः॥७७॥ युक्तो ध्यानेन योगेन सज्ज्ञानी श्रेष्ठ उच्यते॥ शिवधर्माद्ध्रुवं ज्ञानं ज्ञानाद्वैराग्यसंभवः॥७८॥ ज्ञानवैराग्ययुक्तस्य शिवयोगः प्रवर्त्तते॥ शिवयोगाच्च सर्वज्ञः परिपूर्णः स्थिरो भवेत्॥७९॥ स्वात्मन्येवास्थितः सर्वः निवसन् सर्वगो भवेत्॥ स्वात्मारामस्त्वसंगश्च सत्यश्चैव न संशयः॥ ८०॥ तादृशं भोजयित्वा तु जगत्त्रैलोक्यफलं लभेत्॥ यो वा दोषविनिर्मुक्तां गां च दद्यात्पयस्विनीं॥ ८१॥ घंटाभरणवस्त्राढ्यां सवत्सां च हढांगकां॥ दद्याद्दशो दानमुख्यं शांभवेषु यतात्मसु॥ ८२॥ मध्यमोत्तमवस्त्राणि यो ददाति नवानि च॥ शिवभक्तेषु वस्त्राणि यावत्तंतु संख्यया॥८३॥ तावद्वर्षशतं देवि स्वर्गलोके महीयते॥ ब्रह्मचर्यसमोपेतः शांतः शीलपरायणः॥८४॥ अहोरात्रं न भुंजीत उपवासस्य लक्षणं॥ अहस्सु चोपोष्यैवाद्यं सायं यामे च भोजयेत्॥ ८५॥ नक्तमिति च प्रोक्तं छायानक्तं दिनांतिमे॥ अयाचितं केनचिद्दादत्तं यद्भुज्यते हि तत्॥ ८६॥ यदापदस्य देहादि आपोमूलं घृतं पयः॥ सकृत्प्राशयन्न दूष्येत वचनाद्ब्राह्मणस्य हि॥ ८७॥ चत्वारिंशत्समायुक्तं पिंडानां योश्नुते दिवि॥ अद्यान्मांसहविः क्षारवर्जितसप्तमे व्रतं॥ ८८॥ चांद्रायणं तद्विज्ञेयं ह्रासवृद्ध्यानुपक्षयोः॥ शिवं चांद्रायणं देवि पक्षयोः शुक्लकृष्णयोः॥ ८९॥ कुर्वन् कृच्छ्रं शिवं पूज्यं लभते फलमुत्तमं॥ ॥ ईश्वर उवाच॥ ॥ एवं कुर्वन्हि व्रताचारं वसेन्देवं गृहाश्रमे॥ वर्णी वनी गृहस्थो वा यतिश्चैव विशेषतः॥ ९०॥ शिवलोके महीयते यावद्ब्रह्म सदाशिवे॥ यो वा समाचारपराय

णः शिवे वसेत्तस्य हीयापि विनाश्रमी वा नरः ॥ यतिश्चवर्णी विधवा स्त्रियो वा शूद्राश्च वर्णाश्च
तथैव संकराः ॥ ९२ ॥ ग्रामान्विना शीलगुणोपपन्नाः प्रसन्नवाक्कायमनोभिरेवं ॥ शिवार्चना
स्वधनचित्तवृत्तयः विमुक्तये हि प्रयतंति सर्वे ॥ ९३ ॥ चतुर्दशी सोमदिनेष्टमीषु पर्वस्वपी याशि
पि विशेषपूजकाः ॥ शिवाविशिष्टाश्च तएव लोके गणेंद्रमुख्या लदहेव लोके ॥ ये भस्मनिष्ठाशिपि
विशेषसंश्रयाः योगैकनिष्ठाः अपि मे सदेष्टाः ॥ अष्टाङ्गनेरर्चनतः मनुष्याः कष्टाद्विहीनानहि
दुष्टभावाः ॥ ९४ ॥ ॥ इति श्रीशिवरहस्ये एकादशांशे महादेवाख्याने शिवगौरीसंवादे शि
वधर्माचारो नामाष्टचत्वारिंशोध्यायः ॥ ४८ ॥ ॥ श्री ईश्वर उवाच ॥ देवैश्च मुनिभिश्चैव
सेवितानि विमुक्तये ॥ क्षेत्रतीर्थानि पुण्यानि चित्तस्य शुद्धयर्थमादरात् ॥ १ ॥ मकाशं यतनेमयातानि
शृणु पद्मसमानने ॥ रुद्रावतारस्थानानि शिवक्षेत्राणि निर्दिशेत् ॥ २ ॥ मन्त्यानां लत्र रुद्रत्वं शि
वक्षेत्रेषु देहिनां ॥ आधायाग्निं शिवक्षेत्रे संपूज्य परमेश्वरं ॥ ३ ॥ स्वदेहं पिंडवद्धुत्वा जुहु
यं चास्वरेण तु ॥ ४ ॥ शिवक्षेत्रे महादेवि शिवसायुज्यमाप्नुयात् ॥ क्षिप्त्वा पदद्वयं वापि शिव
क्षेत्रे वसेत्तु यः ॥ ५ ॥ स याति शिवतां देवि नात्र कार्या विचारणा ॥ क्षेत्राणां दर्शनं पुण्यं प्रवेशः तच्छ
ताधिकं ॥ ६ ॥ तस्माच्छतगुणं लिंगं दर्शनं च प्रदक्षिणं ॥ तस्माच्छतगुणा पूजा जलस्नानं ततः
परं ॥ ७ ॥ क्षीरस्नानं ततो देवि शताधिकमनुत्तमं ॥ दध्नाः सहस्रमाख्यातं मधुना तच्छताधिकं ॥
॥ ८ ॥ घृतस्नानेन चानंत्यमुपवासेन सत्तमे ॥ तस्मात्कोटिगुणं देवि देहांते शिवसंनिधौ ॥ ९ ॥ शि

वक्षेत्रे समीपस्थं नदी वापी तटाकगं॥ कूपं वापि प्रशस्येत शिवतीर्थमिति स्मृतं॥१०॥ स्ना
त्वा तेषु नरो भक्त्या नरकं नैव विंदति॥ शाम्भवान्भोजयेत्तत्र यथा योग्यं यथा बलं॥११॥ श्रद्धया श्रा
द्धदानेन पितॄंस्तारयेत्तु हि सः॥ भस्मत्रिपुंड्र रुद्राक्षधरो वनिवसेच्छिवे॥१२॥ रुद्रपंचाक्षरप
रो रुद्रलिंगार्चनस्तनुः॥ नियतो नियमोपेतः शांतो दांतः स्थिरासनः॥१३॥ उमाकांतपदाध्यायी
नितांतं मुक्त एव सः॥ वस्त्रापदं रुद्रकोटिरविमुक्तं महालयं॥१४॥ गोकर्ण भद्रकर्णौ च स्वार्णा
क्षः त्र्यक्षदीप्तिमत्॥ स्थाणवीश्वरं च विख्यातं त्रिषु लोकेषु विश्रुतं॥१५॥ स्थानाष्टकमिदं दे
वि अष्टमूर्तिप्रियं परं॥ वस्त्रापदादि स्थाणवं तं शिवसायुज्यदायकं॥१६॥ छगंडलो द्विरंडश्च का
मोटं मंडलेश्वरं॥ कालंजरं शंकुकर्णं स्थूलेशाश्च स्थलेश्वरः॥१७॥ पवित्राष्टकमित्येतत्तच्छे
वक्षेत्रमहाघभृत्॥ मृताः प्रयांति तत्रैव शिवस्य परमं पदं॥१८॥ पिंडारकं कुरुक्षेत्रं तथा कन
खलं शिवे॥ विमलेशाट्टहासं च महाकालमहेश्वरं॥१९॥ भीमेश्वराख्यं तत्पुण्यमेतत्गुह्याष्ट
कं शिवे॥ मृताः प्रयांति गणतां पापाः पुण्या अपि स्थिरं॥२०॥ श्रीपर्वतो हरिश्चंद्रः केदारोम
त्रकेश्वरः॥ ॐकारो भैरवेशाश्च मध्यमेशाः सितेश्वरः॥२१॥ एतद्गुह्याष्टकं क्षेत्रं शिवसायुज्य
दायकं॥ संतर्प्य च पितॄन् श्राद्धैः प्रीणयेद्विशां भवान्॥२२॥ अमरेशं प्रभासं च नैमिषं पुष्करं
तथा॥ आषाढं दंडिमुंडी च हरभूमिर्भवालकः॥२३॥ एतच्छैवाष्टकं क्षेत्रं शिवसायुज्यदायकं॥
नकुलीशप्रवाजश्च करं जंत्र्यंबकेश्वरं॥२४॥ नागेश्वरं वैद्यनाथं सोमेशं घुसृणीश्वरं॥ क्षे

त्राष्टकमिदं देविममप्रियकरं सदा॥ २५॥ अत्र यांति स्मृताः सर्वे रुद्रस्य परमं पदं॥ पंचाष्टक मिदं ज्ञेयं शिवक्षेत्रं सुलक्षणं॥ २६॥ यत्रैव भावसंसक्ता भावायात्यपुनर्भवं॥ स्नानं दानं न थाश्रा द्धं ये कुर्युश्चात्र भावतः॥ २७॥ शिवावसथकृ पाद्यं तदक्षय्यफलं व्रजेत॥ इत्युक्त्वा सर्वतो दृष्टिं प्रसार्य परमेश्वरः॥ २८॥ भारते सर्व वर्षेषु शिवक्षेत्राणि सर्वतः॥ शिवायतनमुख्यानि दिवि भूमौ गिरिष्वपि॥ २९॥ कैलासस्तोम महादेवस्त्रैह्ये दर्शायच्छिवः॥ गंगाद्वारं चकेदारं गंगासाग रसंगमं॥ ३०॥ अविमुक्तमयोध्यां च प्रयागं सरितेतथा॥ चित्रकूटं त्रिकूटं च पुण्यकूटं च पर्व तं॥ ३१॥ गुंडीप्रभं च परमं दिव्यं वैश्रवणेश्वरं॥ प्रभासं च प्रकाशं च प्रकाशेश्वर केश्वरं॥ ३२॥ मध्यमेश्वरमित्युक्तं वेदेशं क्षामकेश्वरं॥ आकाशलिंगं परमं तीर्थं चाप्यचलेश्वरं॥ ३३॥ पूर्वद्वारं हरिश्चंद्रः त्रिपुरांतकरं हरं॥ अमरेश्वरं च वरदं देवैः पूर्वं प्रतिष्ठितं॥ ३४॥ गोप्र क्षेश्वरमीशानं तथा चंद्रेश्वरं शुभं॥ कर्मेश्वरं च विघ्नं संरक्ष्यर्थं ब्रह्मणा ततं॥ ३५॥ श्रीमद् धिवटं चैव काटकं वारणाव्हयं॥ अजेन निर्मितं दिव्यं पुण्यं त्विलिलिविलेश्वरं॥ ३६॥ तत्रैव पा दुकामेघ पुण्ये त्विलिलिविले श्वरे॥ ततः श्रृंगा प्रकाशं ढंगोरटं प्राणिकेश्वरं॥ ३७॥ देव्या वर्तेश्वरं पुण्यं तदेव्यासु प्रतिष्ठितं॥ मल्लिकार्जुन संज्ञं च मामावासनगोत्तमं॥ ३८॥ राजेश्व रं पर्यायं तं भद्रेश्वरमथाव्ययं॥ गतीश्वरं च वैशारवं कपोतेश्वरमव्ययं॥ ३९॥ कोटिरुद्रेश्वरं क्षे त्रं रुद्रकोटिप्रतिष्ठितं॥ विष्णुनात्र तपस्तप्तं पूर्वं युगमनुत्तमे॥ ४०॥ विष्णवीश्वरं त्रिकूटाख्यं

कोटिभद्रारव्यमुत्तमं॥ सर्वेश्वरं भारभूतेमलंगहमथापिवा॥ ४१॥ मध्यांगेशाकरं वेशोस्कंदे
नैवप्रतिष्ठितं॥ गोमंडलेश्वरं चैव गंधर्वैः पूजितंपरं॥ ४२॥ विद्याधरेश्वरं चैवपार्वतीशंत्वया
चितं॥ सुरेश्वरंचत्रिदशैः पूजितं क्षेत्रमुत्तमं॥ ४३॥ आवर्ह्नीश्वरंचै तन्नागैः संपूजितंमु
दा॥ यक्षेश्वरं यक्षगणेर्किंपूर्षैःपुरुषेश्वरं॥४४॥ वृषेश्वरं च धर्मेण पूजितं सर्वकामदं॥ वृह
द्रथेश्वरं देवराज्ञानेनार्चितंतदा॥ ४५॥ गदाधरेश्वरं देवं गंधद्वारेश्वरंपरं॥ वेणीदारीश्वरं
चैवपापहारीश्वरंतथा॥ ४६॥ रुद्रेश्वरं प्रतिष्ठानं वामदेवेश्वरंतथा॥ गणश्रीतेश्वरंपुण्यंतु
गेशंनामदेश्वरं॥४७॥ यमप्रमथनेशंचभगाक्षिहरशंकरं॥ कर्पूरेशंमयूरेशंपुण्यंपंच
नदाभिधं॥ ४८॥ कुशावर्तेनतणावर्तेगंगावर्तेगयेश्वरं॥ मंदरेशंसुंदरेशंवामभागेश्वरंशिवं॥
॥ ४९॥ कृत्तिवासेश्वरंपुण्यंगजोयत्रनिपातितः॥ नृसिंहहरणंपुण्यंशरभेशंमहाद्भुतं॥
॥५०॥ यामनंगप्रमथनेमन्मथांतकरंपरं॥ हिरण्यँगर्भनांदीशंमायापुर्यांप्रतिष्ठितं॥५१॥
विरजेशंविशोकेशंभगप्रमथनेश्वरं॥ अचलेश्वरसंज्ञंचअचलैःपरिपूरितं॥५२॥ चंडेश्व
रंचभेरुडंगंडकीतीरसंस्थितं॥ व्याघ्रेश्वरंबाहुदायास्तीरेक्षेत्रंमनानतं॥५३॥ भीमाशंकरसं
ज्ञंचदेवदारुवनेश्वरं॥ हस्तीशंपात्रकीशंचभंगहारीश्वरंतथा॥५४॥ तुंगेश्वरंचतुंगायाः
लिंगंतुंगंप्रतिष्ठितं॥ चर्मण्वत्याःपरेपारेक्षेत्रंपुंजिष्ठकेश्वरं॥५५॥ सरस्वतीशानन्द्या
स्तीरे क्षेत्रंशिवाख्यं॥ यामुनेशंचयमुनामनुतिष्ठतिनान्निये॥५६॥ गंगेश्वरंचगंगायाः प्रभ

वेसुप्रतिष्ठितं॥ यमुनागंगयोः संधौ संधीशं पुण्यदायकं॥५७॥ माधवीशामनंतेशं नीरानी
रे प्रतिष्ठितं॥भीमेशं भीमरथ्याश्च नटेकुंज हरेश्वरं॥५८॥ वृंदावने चरं देशं मधुरायां मथे
श्वरं॥ विपाशायां विपाशेशं नैमिशे नैमिशेश्वरं॥५९॥ शोणातीरे शोणकेशं नार्मदं नर्मदेश्व
रं॥ यत्र बाणे समाराधे लेभे भुजसहस्रकं॥६०॥ ओंकारेशं च तत्तीरे पर्णादेशं प्रतिष्ठितं॥ शार
यां च शारदेयेशं गोमत्यां गोमतीश्वरं॥६१॥ वेण्यां वेणीश्वरं पुण्यं निषधेशं नगस्थितं॥अश
क्नीतीरगां देवि विन्हेश्वर संस्थितं॥६२॥ द्रारावत्यां द्रारकेशं कृष्णेनार्चितमीश्वरं॥ अ
वंतीशामवंत्यां तु शालद्रुत्यां शालेश्वरं॥६३॥ परादानेश्वरं पुण्यं कालकंजेश्वरं परं॥ हरि
भद्रेश्वरं पुण्यं संगातीरे प्रतिष्ठितं॥ ६४॥असीतीरे महादेवं वरुण्या वरुणेश्वरं॥ बदर्यां ब
दरीशं च पुष्करे पुष्करेश्वरं॥६५॥वायुसंपूजितं क्षेत्रं वायवीशं सुपुण्यदं॥ अलंगामपलं
पुण्यं यत्रानंगो निपातितः॥६६॥ कर्दमीतीरजक्षेत्रं कर्दमेशं सुपुण्यदं॥ यतीश्वरं प्रभासं
च कालकालेश्वरं परं॥६७॥ मतंगेशं मतंगायाः तीरे लिंगं प्रतिष्ठितं॥ गोप्रेक्षतीर्थे गोप्रे
क्षं त्र्यक्षं मोक्षप्रदायकं॥ ६८॥ सागरेशं तथा शार्वं भद्रकर्णेश्वरं शिवः॥ मलये शांकुंजमेशं ह
नहुतीश्वरं तथा॥ ६९॥ मांडिकर्णीश्वरं चैव कामदं वैद्यनाथकं॥ कृष्णेश्वरं च कृष्णायाः ती
रे क्षेत्रं मनोहरं॥७०॥ पंपेश्वरं च पंपायाः तीरे देवि शिवालयं॥ निदानेशं दानवत्यास्तीरे
क्षेत्रं सनातनं॥७१॥ भृगुतुंगे तु तुंगेशं पापहारीश्वरं तथा॥ वज्रावर्तेश्वरं चैव फणिकाया

नटेशुभं॥७२॥ बलप्रमथनेशंच कालमूलेश्वरंतथा॥ व्योमकेशं हरीशं च तं गणेषु प्रतिष्ठितं
॥७३॥ क्षिप्रेश्वरं च क्षिप्रायास्तटे क्षिप्रप्रसादकृत्॥ कालव्यालेश्वरं चैव नक्षके न प्रतिष्ठि
तं॥७४॥ त्रिजटेश्वरसंज्ञं च त्रिजटा निम्नगायनः॥ मरुधन्वीश्वरं क्षेत्रं मरौ वसुधरेश्वरं॥७५॥
दुनीश्वरं॥७५॥ दुनीश्वरं धुनावर्ने कौंकणे च प्रतिष्ठितं॥ भर्गवीश्वरं च रामेण पूजितं क्षत्रि
यांतकृत्॥७६॥ कोलीपुरे कोलकेशं त्वया देवि प्रतिष्ठितं॥ अंधकेनार्चितं लिंगं अंधकेश्वर
संज्ञितं॥७७॥ मकुटेशं च कर्कोल हरिहरेश्वरं शिवं॥ यमेश्वरं च सांबेशं अरण्ये पशुपतेश्वरं॥
पारणातीरगं क्षेत्रं तारणेशाभिधं शिवं॥ कमलेशं च दिगीशं च भासेशं प्रकटेश्वरं॥ हाला
हलेश्वरं पुण्यं यत्र जातो गरादनः॥ त्रिनाथकेश्वरश्चैव पर्णादेशो धसेश्वरः॥ ८०॥ शाता
वर्तेश्वरो देवि नाभंगेशो धनेश्वरः॥ अर्धनारीश्वरश्चैव त्वया यत्राहमास्थितः॥ ८१॥ वि
दुरथेश्वरश्चैव वशिष्ठेश्वरः॥ कंन्याकुब्जेश्वरश्चैव कान्यकुब्जे प्रतिष्ठितं॥ ८२॥ अरु
धतीश्वरश्चैव सिनीवालीश्वरस्तथा॥ अखंडेशो अदाल्भेशो रावणेशासुरेश्वरः॥ ८३॥
त्रिकद्रुकेश्वरो देवि धिष्ठितापरनंगणे॥ सौराष्ट्रे सोमनाथेशो राष्ट्रवर्धनपूजितः॥ ८४॥
गोसवेशेश्वरो देवि गौतमेशोरतीश्वरः॥ यत्राहारीश्वरो देवि आनर्ते च प्रतिष्ठितः॥ ८५॥
उमेश्वरः सोमचंडः खंडपर्शुः हरेश्वरः॥ मुसलेशोर्गिकेशाश्च कोशले सुप्रतिष्ठिताः॥ ८६॥ आ
वंन्येशो दनन्येशो वधीशो वेधनीश्वरः॥ धिष्ठिताः सर्वदेवैश्च पूजितो नरकोसले॥ ८७॥

भर्गेशोथविदर्भेशः कनकेशः प्रभादनः ॥ विदर्भे घिष्ठिता ह्येते क्षेत्रवर्यां त्रिशूलिनः ॥ ८९ ॥ कणादे
शः कहोलेशः प्रतीर्येशो महेश्वरः ॥ मारुवेषु स्थिता ह्येते माल्वेष्वेते प्रतिष्ठिताः ॥ ९० ॥ कवारहारे
शः शाश्वदानवेशोरमेश्वरः ॥ वसान्येशः कार्तिकेशो विजंघेशो गरेश्वरः ॥ ९० ॥ रोगहारीश्वरश्चैव
पुंड्रेष्वेते प्रतिष्ठिताः ॥ काश्यपाविश्वेश्वरश्चैव अविमुक्तेश्वरस्तथा ॥ ९१ ॥ त्रिलोचनेशो वीरेशो
कपर्दीशो मणीश्वरः ॥ मणिकर्णीश्वरश्चैव ज्ञानेशो संगमेश्वरः ॥ ९२ ॥ मध्यमेशाश्च सोमेशः केदा
रिमंगलेश्वरः ॥ नागेश्वरोणिमांडव्यः सुराभिंडीश्वरः शिवः ॥ ९३ ॥ कंदर्पेशाम्र तंगेशो रामेशो
लक्ष्मणेश्वरः ॥ व्यासेश्वरो विरूपाक्षः कर्दमेश्वर एव च ॥ ९४ ॥ जनार्दनेशो ब्रह्मेशो वीरहर्षे
श्वरस्तथा ॥ त्वयान्नपूर्णया देवि सेवितो गणपे स्तथा ॥ ९५ ॥ अविमुक्तो निवत्स्यामि पारयंजनता
रुजं ॥ सौवीरे बिल्वकेशाश्च वषेश्वेशः शिलेश्वरः ॥ ९६ ॥ तं गणेषु यपातीशः फणीशाश्चैति
संस्थिताः ॥ सैंधवेषु महादेशाः वारणेशः कुशेश्वरः ॥ ९७ ॥ सिंहले हि पिनाकीशः कारूण्ये
शास्थितः शिवः ॥ आरहेकर हरेशः स्थानसेश्वरः न्येथैरवानसेश्वरः ॥ ९८ ॥ वेदवेविंदुकेशाश्च
प्रमन्तेशः प्रसन्नके ॥ कुणिकुंभेप्रमाथीशः सारणे सरणेश्वरः ॥ १०० ॥ अंगेषु फणिभद्रेशो रे
महाशीश्वरस्तथा ॥ वंगेषु वागुरीशोपवेनशो धनतीश्वरः ॥ १०१ ॥ कलिंगेषु विरूपाक्षः गणगी
नेश्वरस्तथा ॥ काश्मीरे रश्मिकेशाश्च तुरंगेशप्रसादनः ॥ १ ॥ वर्धनेषु महावीरो गंधर्वेशः शते
श्वरः ॥ सौराणेषु मंगीशानः फणिकंठेश्वरः शिवः ॥ २ ॥ उदये चोदयेशोपपारियात्रे महेश्व

अस्माचलेनथाः स्तेशोभगमालीश्वरस्तथा॥३॥ शिलानद्यां तटे देवि वेधुनेशः प्रतिष्ठितः॥को
टीश्वरो महाकालः सुनंदेवस्थितोशिवे॥४॥ मंदरे देवि डंगेवाश्च केशो रजनीश्वरः॥ बल्वजे
मणिचित्रेशः पौंड्रे पुंड्रेश्वरः स्थितः॥५॥ सार्वके सुंदरेशानः मतंदे ननगार्दिनौ॥ उदुंबरे बरेशा
नः कहोले होलकेश्वरः॥६॥ कोसले कमलेशश्च नस्करे शोधुनीश्वरः॥ कारंडे तांडवेशश्च
विसर्गे शाश्च संस्थितः॥७॥ गरुडेशः पन्नगेशो कालके शसुप्रतिष्ठितः॥ पारिजातेश्वरश्चैव
वर्गंधमद्रेश्वरस्तथा॥८॥ उत्तरापथगा देवि प्रमोदे शोभगीश्वरः॥ फुल्ले शाकरुणेशो चर्चि
त्ररवं डेव्यवस्थितः॥९॥ दारवे दारुकेशश्च प्रमाथीशो रगेश्वरौ॥ कराडे पालकीशश्च तरं
गेशोव्यवस्थिताः॥१०॥ महाराष्ट्रे मध्यमेशः सिंधुरीशोगणेश्वरः॥ मरोश्वरोनमिलेशः गु
र्जरे गुर्जकेश्वरः॥११॥ वर्धनीशः स्वर्धुनीशो केषु पारशो केषु बांकरः॥ तुंबरेशः करंभेशो
दलिनेषु पनीश्वरः॥१२॥ मार्गदेशे रात्रिकेशो वेणुशरीश्वरस्तथा॥ मोसलेनु हलीशानः का
द्रवेशो धनाधिपः॥१३॥ बलेषु धान्यकेशानो सुपार्येशः प्रसन्नकः॥ गोराटे नेनर्दकेशो ना
चीने हीनहनेश्वरः॥१४॥ जांगले मंगलेशानः तुंडीरे कांडकेश्वरः॥ हुणेषु कलिकेशश्च
सुहुणेषु जटेश्वरः॥१५॥ मीनाशनेषु मोनीशः मैत्रे मित्रायणीश्वरः॥ वल्कलेषु प्रतानेशो
कांटेषु प्रकटेश्वरः॥१६॥ तुहंडेषु तुहंडेशो होडींशो पारदेश्वरः॥ मांसादनेषु दानेशो गं
डेषु पुरुकेश्वरः॥१७॥ लंगडेषु फणीन्द्रेशो विस्तार्येषु प्रकाशकृत्॥ मध्यादनेषु माध्वीशो गो

डेषु भुवनकेश्वरः ॥१८॥ चारुदेष्णेषु शौक्लीशः कुट्टकेषु रुलनेश्वरः ॥ पावनेषु फनस्येशो रा
घवेशो द्रुमेश्वरः ॥१९॥ श्वकल्केषु सपत्नीशः नगाचरिषु नागधृक् ॥ फणाफणीश्वरः कोले
अंकोलेषु जिनेश्वरः ॥२०॥ मनस्येषु पुरंध्रीशः पौंड्रेषु प्रस्थितेश्वरः ॥ मिथिलेषु फनस्येशा
गोप्रस्येशो निरिंद्रियः ॥२१॥ वाप्नेषु भौतिकेशाश्च कंटेषु मणिकंटकः ॥ ताम्येषु काणवेशाश्च
करंधेषु महेश्वरः ॥२२॥ तरंगेषु महाभद्रो दर्दरेषु कतीश्वरः ॥ वैराटेषु कठोरेशो विस्तंडे
षु कुथेश्वरः ॥२३॥ पारियात्रे यात्रिकेशो विनस्तीशः करूस्थले ॥ भारते पुरुभद्रेशः पुरहले
श्वरस्तथा ॥२४॥ गाणेषु चगणेशानः कुमारीशः कुमारके ॥ अनभ्रंगेऽमरेशानः पर्जन्येशः
पिलिपिले ॥२५॥ कालंजरे रुद्रकेशः जातूकर्णेश्वरः शिवे ॥ वर्धने पारिभद्रेशो विंध्ये साध्ये
श्वरस्तथा ॥ २६॥ विराधेशः कोंकणेशः तमालेषु महेश्वरः ॥ गार्गरीषु पवीशानो उद्दामे च
प्रसेनजित् ॥२७॥ कांडेषु पांडलीशानो वध्रेषु वभ्रकेश्वरः ॥ करंभेषु सुधन्वीशो गोपती
श्वमहेश्वरः ॥२८॥ उर्वरीशो वामनेशो सिंजने कुजनेश्वरः ॥ शांतकुंभेषु कुंभीशो मथने शोम
नेश्वरः ॥२९॥ पंचारनेश्वरश्चैव त्रेमणिकेशः प्रसोमकः ॥ सोमचूडेश्वरः सैंहे सिंहकेशाश्च शौक
रः ॥३०॥ काकेश्वरः तारकेशो मालवेषु महेश्वरः ॥ वीणापाणीश्वरो नीले सौम्ये सोमेश्वरो
महान् ॥३१॥ हेमकूटे च कूटेशः त्रिकुटे कर्कटेश्वरः ॥ सह्ये सह्येश्वरो देवि हिमवंत्यंकुरे
श्वरः ॥ ३२॥ केदारश्चैव भीमेशो गर्गरीशो यचंदने ॥ हरद्वीले हरीशाश्च कर्पटे कार्पटीश्वरः ॥

॥३३॥ सत्येश्वरो वैननेशः शृंगारूडपर्वतोत्तमे। प्रजापतीशो वेदीशः त्रिधामेशो रतीश्वरः॥
॥३४॥ हरीगर्भेश्वरश्चैव ब्रह्मगर्भेश्वरस्तथा॥ रत्नादौ रत्नगर्भेशो विंध्येशो वैद्यपर्वते॥३५॥ कं
दर्पेशश्च सर्पेशो गोवर्धनगिरौ स्थितौ॥ मतार्येशः ताम्रकेशः ताम्रशैले स्थितावुभौ॥३६॥ कु
कुंभे कुकुंभेशश्च दिग्वासेशः पवित्रके॥ वृषभेंद्रेश्वरश्चैव नायकेशः शिवेगुरौ॥ ३७॥ हरिके
शः शिरवंडीशो गोपर्वतगतावुभौ॥ प्रभामंडलकेशश्च विधामेशश्वरेश्वरः॥ ३८॥ करंजप
र्वतगताः तांम्रभूमौ पिलिप्पिलिः॥३९॥ डुंडीशः तुंडीशो गह्वरे पर्वते स्थिताः॥ मार्गपाणी
श्वरः श्चैव सोधन्ये पर्वते स्थितः॥४०॥ स्वर्णवेत्रधरश्चैव शान्तोशोमरश्मौलिगः॥ देवेश्वरो दे
वकूटे वृषभेशो वृषाचले॥४१॥ ककुभतीश्वरश्चैव ककुभे तिस्थितः शिवः॥ कपालेशः पाल
गिरौ चित्रघंटेनगेश्वरः॥४२॥ वभ्राणसेश्वरश्चैव दंडपाणीश्वरस्तथा॥ भाद्रगिरौ भद्रेशः सुंद
रे सुंदरेश्वरः॥४३॥ कलशेशः कुलालेशो केलासे दक्षिणे स्थितौ॥ मनस्वीशगणेशानौ हरि
द्रुणनगस्थितौ॥४४॥ वासंतीकेशो वेदेशो गतीशो अरुणेश्वरः॥ तेनेशो वातभद्रेशो कुसु
दे कुसुदेश्वरः॥४५॥ वानशो धनदेशानो वीतिहोत्रेश्वरस्तथा॥ दुंदुभे पर्वतवरे दुंदुभीशो म
हेश्वरः॥४५॥ संघहारीश्वरश्चैव ज्वालागर्भेश्वरस्तथा॥ वातूलेशः पन्नगेशः करंभीशः कु
टेश्वरः॥४६॥ बकेश्वरः सारसेशः शाकेशो गंधपर्वते॥ सुनाभे पर्वतवरे सुनाभेशः नथेश्वरः॥
कर्मारिपर्वतवरे कर्मारेशः स्थितः शिवे॥४७॥ क्रौंचे क्रौंचेश्वरो देवि हरिते हरिकेशकः॥ वन्हि

शैलेच वन्हीशोमलयेमलयेश्वरः॥४९॥ वेतसेवेतसेशानः वृषभेवृषभेश्वरः॥ कपालमोचनः कांतेरोहिनेरोहिनेश्वरः॥५०॥ कंधरेभूधरेशानः विद्युत्येवैद्युतेश्वरः॥ विभांडेभांडवीशानः करमर्देसनातनः॥५१॥ तुहिंडेकोंडकेशश्च श्वंदेशः श्वंदपर्वते॥ विनंदिनिसुनंदीशः कणवादेकणेश्वरः॥५२॥ एतेप्राधान्यतः शैलाविगाढायेमहार्णवे॥ तन्मौलिलिंगान्येतानि दृश्यान्यघहराणिमे॥५३॥ नदीनदसमुद्रेषु द्वीपेषुद्वीपिकेश्वरः॥ नवपीठान्यनंतानिपंचाशत्तेषुमुख्यतः॥५४॥ तन्नामानिवदाम्यद्य शृणुत्वंकमलानने॥ मणिद्वीपेचकैलासमाविमुक्तेचमंगला॥५५॥ सनातनेसिनीवालीभद्रेभद्रवटेश्वरी॥ कालंजरेजरादेवीजज्वालेजालकेश्वरी॥॥५६॥ ओंकारेकामदादेविपर्जन्यागोमतीतटे॥ चिपाशापाशमथिनीमायापूर्याचमेनका॥॥५७॥ कलावतीकालशैलेमरुद्वामरूधामनि॥ ज्वालामुखीप्रभासेत्वं कान्यकुब्जेचकंन्यका॥५८॥ कोकामुखेदेविकात्वंसहजंन्याघतादने॥ पार्वतीरमणेशैलेतुंगायांतुंगकाशिवे॥॥५९॥ पणादनेवेगवतीरुद्रकोटोमहेश्वरी॥ गोढकेगोमतीदेविबनेशेरमणीमणिः॥॥६०॥ लालजेधेखंडकेशी दर्दुरेत्वमरावती॥ प्रसादिनीप्रसंन्नास्येग्यारडेगरुडेश्वरी॥॥६१॥ अनंतेनंतशक्तिस्त्वंसिंहलेसिंहवाहिनी॥ चंद्रलेचंदलादेवीबदर्यांकांतिदायिनी॥६२॥ विरजेविलज्ञाकात्वंकलिंदेकालिकाशिवा॥ महेशीत्वमराबत्यांनंदिनीगोनके स्मृता॥६३॥ तेजोवतीकरभास्येकोलेलकुलीश्वरी॥ दुर्गादुर्गाकरक्षेत्रे शूर्पारेशूर्पका

स्मता॥ संमोदिनीगिरिशैलेत्वंकामठेत्वब्रसंनिभा॥ हेलावतीकुरुक्षेत्रेसिंधिदापुष्पकेशिवे॥
॥६५॥ वेघनाथेवेगवतीकमलेकमलावती॥ काकोदेनागभूषात्वंबसानेवासिनीस्मृता॥६६॥
गंधर्वीगंधशैलेत्वंवरास्यात्वंहराचले॥ तंक्कोलेकालशमनीरुद्राणीस्छानपीठके॥६७॥ आ
नर्तेत्वमिलादेवीक्षमायांत्वंक्षमावती॥ नैमिषेनिमिषादेवीकुणिभद्रेचकुंजिका॥६८॥ विंध्ये
त्वंकौशिकीदेवीबंधनेबंधमोचिनी॥ वटारण्येसटादेवीसोमेंद्रेसोममस्तका॥ ६९॥ विजया
विजयापूर्यांप्रतिष्ठानेचकन्यका॥ विगात्वंवैनतेशैलेवहतीधातुशैलके॥७०॥ तुंगाचत्वंतुं
गकुचाविमलस्कंधविराजके॥ हालाहलेहलस्पात्वंकपर्देदर्पनाशिनी॥७१॥ कुणिकुंभे
महादेवीभद्रदाकनकाचले॥ कुरंगलोचनारंगेशार्लंगेशांतिदायिनी॥७२॥ मेघमाला
मेघगिरौनैबरेबिंदुरूपिणी॥ दुर्ज्याणिचंडिकादेवीमोसलेमुसलेश्वरी॥७३॥ तुल
जातुलजापूर्यांमहादेवेचशांभवी॥ भैरवीभैरवपीठेत्रिकोणेत्वंत्रिकोणगा॥७४॥ ललि
ताललितापुर्यांश्रीशैलेभ्रमरांबिका॥ राजेश्वरीराजपीठेकोघुमीकुयमेश्वरी॥७५॥ वाम
नात्वंवेगिकायांमहेंद्रेचंद्रपूजिता॥ गतिदालारणेप्रोक्ताशारणेशारणांबिका॥७६॥ कोस
लेमालमथनाहिमशैलेवचंडिका॥ नगिकाकोटिकायांतुकरंजेकरमर्दिनी॥७७॥ गर्भे
श्वरेत्वंगर्भेशीकुंनेदेनंदभोगिनी॥ वायव्येत्वंभगाक्षीचविशालाक्षीकहोलके॥७८॥
दध्यादनेभीमकात्वंवनवासीचवन्यका॥ गोनर्देपर्णिकादेवीकांतिपुर्यांचकांतिका॥

॥७९॥ समासीनामेरुमौलौ कदंबवनविबरूपिणी॥ मंदरे सुंदरी त्वं च चित्रशैले त्रिशूलका॥ ८०॥ क्रौंचारण्ये स्कंदमाता नागपमाता नागेश्वरे॥ लौकिने लोकमाता त्वं कोल्लापुरे च कोल्लिनी॥ ८१॥ पद्मगर्भे च पद्मा त्वं विशाला मास्यके शिवा॥ कूर्मे श्रीवाहयशिरे भेरुंडे भटनाशिनी॥ ८२॥ उपांगे पांगी का देवी हालिशैले च हस्तिका॥ गोकर्णे शितिकंठा त्वं कांच्यां त्वं कामकोटिका॥ ८३॥ हालास्ये श्यामला देवी विशाला गंधमादने॥ मलये त्वं भाग्यवली विनाशे कालिका स्मृता॥ ८४॥ महेंद्रे चारुचंद्रा का कनके कमलेश्वरी॥ एतानि दिव्यपीठानि तव सिद्धिप्रदानि च॥ ८५॥ चेरचोले च पांड्येषु लिंगानि शृणु मे विके॥ सह्यजाता म्रपर्णी च पंपा वेगवती नटे॥ ८६॥ आम्रासंगे मल्लयवत्याः तटे परमपावने॥ सह्यमौलौ सह्यकेशः सिंहे बाधिनिकंटकः॥ ८७॥ तण्ड्यानीश्वरश्चैव पशिवे भरलकाचलः॥ रत्नाद्रिशिखरेशानः भालभूतेश्वरः तथा॥ ८८॥ कंपा तटे तथा कांचीएकाम्रेशो महेश्वरः॥ श्रीमद्दक्षिणकैलासे कालहस्तीश्वरस्तथा॥ ८९॥ चेरेषु च श्रीशिखिराजश्रीशैलेशश्च तत्र हि॥ शिखरेशः पन्नश्येशो घंटाकर्णेश्वरस्तथा॥ ९०॥ ततनीर्थे च महादेवि स्मरणान्मुक्तिदायकः॥ त्र्यंबकश्च महाशैलः यस्मात् गोदावरी नदी॥ ९१॥ शोणाचले कुमारेशः अरुणाद्रिनगेश्वरः॥ वृद्धाचलेशो गोभद्रो गोपर्वताशिरोगतः॥ ९२॥ शिवेमार्गसहायेशः श्रीमद्दभ्रसभेश्वरः॥ मूलस्थानेश्वरः तत्र दर्शनादेवमुक्तिदः॥ ९३॥

चरेषु प्रथिता ह्येते शिवक्षेत्राण्यपि क्रमात्॥ चोलेषु दिव्यलिंगानामनुक्रममिहोच्यते॥
॥९४॥ शिवे पंचापगेशाख्यः वटेशो पड्डुतीश्वरः॥ धृतेश्वरः पुष्पकेशः तंजेशो वेदिकेश्वरः॥
॥९५॥ श्रीप्रयाणेश्वरो देवी ऐरावतगजार्जितः॥ क्षीरिणीशः सुंदरेशो कुंभेशश्चार्जुनेश्वरः॥
॥९६॥ नेजिनीशः क्षासिनाथो बिल्वारण्येश्वरः तथा॥ दुर्गेश्वरः भीमकेशो वेद्येशो ब्रह्म
केश्वरः॥९७॥ घंटेश्वरश्च श्वेतेशो छायावनमहेश्वरः॥ श्रीवांछीशोऽग्निकोटीशो मंगले
शोऽग्निकेश्वरः॥ ९८॥ कमलालये वाल्मीकेशः आनंदेशश्च पावितः॥ हाटकेशश्च सिद्धे
शः तत्र देव्यचलेश्वरः॥९९॥ तथा वेदवनेशश्च सेतौ रामेश्वरः शिवः॥ चोलेषु प्रथिता ह्ये
ते तथान्यद्वपि शंकरि॥१००॥ सर्वलिंगालयश्चोरुः सह्यजातीरसंगतः॥ तौंडीरेच शुची
द्रेशः पापनाशस्तथांबिके॥१०१॥ अर्जुनेशश्च स्त्रावीशो हस्तिशैलेश्वरस्तथा॥ त
था वेगवतीतीरे पांड्ये हालास्यशंकरः॥२॥ तथा वेशाक्लिवाटीशः शिवे चांम्रातकेश्व
रः॥ शिवे दक्षिणगोकर्णे मत्स्यशोभरतेश्वरः॥३॥ शिवे वानपुरेशश्च तथा रत्नस
भेश्वरः॥ तथा चित्रसभेशश्च उग्रेशश्चामतेश्वरः॥४॥ एतत्प्राधान्यतः प्रोक्तं तीर्थपर्व
तटे शिवे॥ एतेषु सेन्यवर्गो प्रुस्थितो भस्मविभूषणः॥५॥ देहांते शिवसायुज्यं भवत्ये
व महेश्वरी॥ तरवः पशवः कीटमलायांत्यपुनर्भवं॥६॥ वसनपठेदिदं स्तोत्रं तेषु से
त्रेषु शैलजे॥ ॥श्री ईश्वर उवाच॥ ॥कंजाक्षं कंजासनजातधिक्षंवाहीकृतोरुमन

लास्यविषाद्यभस्मं॥ सधुक्षितानंकभगास्यहरं सुदक्षदीक्षापहं भजनिभिक्षितमौनिपक्षं॥७॥ यस्यप्रि
यंलसमदरूक्षनकुक्षिवाहकुक्षिस्थकक्षमिवधुक्षितनक्षकांगं॥ ऋक्षेशमौलिबलिनंदनचंदना
र्चिस्रकचंदनार्पितपदं स्मतजाभमीडे॥ विश्वंभरोभरणभूषणमारकारूसंज्ञोषणप्रमथनाथ
सनाथयास्मान्॥ सर्गस्थितिप्रलयकारणतारणाद्यशंभोपदाब्जयुगलं शरणंप्रयामि॥९॥
विश्वोदयस्थितिविनाशनहेतुभूतभूतादिकार्यकरणाधिपकारणेश॥ श्रीव्योमकेशहरिकेश
महेशशंभोकोशावकाशपरमेशनमोनमस्ते॥१०॥ अंबाकदंबकुसुमसंन्निभचारुबिंबाबिंबोपमा
धरवरांमुखहन्तितंबां शंभो॥ लोलिंबराजितकचांप्रणनाद्यसर्वे हेरंबमुख्यजननीनतमस्त
कंबां॥११॥ दक्षेपथेनेषुशैलप्रवरनंदनदीसंगमेसिंधुसंधो॥ जानान्यन्युत्तमानिप्रथितबकुलां
न्येवशानुं स्थितानि॥ आलोकानांसुराणांनरमुनिमुकुतापारपुण्यांकुराणि॥ पश्याद्यप्रथि
तेक्षणेनमनसालोकनेनाद्यधन्येजन्यानांफलमेतदेवगिरिजेमान्यानचान्योजनः॥१३॥
यत्रत्रिनेत्रपदपंकजमित्रभावोभस्माक्तगात्रसुचरित्रपनत्रयाहः॥ क्षेत्रेप्रयामभिरोचयते
शातंत्रश्रीपमपूजनपरोसुकलत्रमदक्षिपात्रः॥१४॥ ॥ इतिश्रीशिवरहस्येमहादेवाख्ये
एकादशांशेशिवगौरीसंवादेसर्वक्षेत्रप्रभावकथनंनामएकोनपंचाशत्तोध्यायः॥ ४९॥
॥ श्रीमहादेवायनमः॥ ॥ श्रीशिवउवाच॥ ॥ सर्वेषांमेववर्णानांशिवाश्रमनिषेविणां॥
शिवधर्मोमयेवोक्ताधर्मकामार्थमुक्तये॥१॥ ब्राह्मणःक्षत्रियोवैश्यःस्त्रीशूद्रौशिवाश्रमी॥
वा

॥ ब्रह्मचारी गृहस्थो वा वनस्थो वाथ भिक्षुकः ॥२॥ स्वाश्रमात्परतः कुर्यात् पुष्पाराममसुशोभनं॥ आरे नेयामग्निकार्यं च मेशान्यामीश्वरालयं॥३॥ सुदेश्या संभवे कुर्यायत्र स्यात्संभवो भुवः॥ गृहस्य दक्षिणे कुर्याद्दिग्ध्याभ्याशनालयं॥४॥ नैरृत्यां च विहारार्थं वारुण्यामुदकश्रियं॥ वायव्यां धान्यसदनं कोबेर्यां भांडकुडकं॥५॥ त्रिसंध्यमर्च्ययेद्देवमग्निकार्यं च भक्तितः॥ द्विकालमेककालं वा पूजयेल्लिंगमैश्वरं॥ असंपूज्य शिवं मोहान्न भुंजीयात्कदाचन॥ अन्यानि शिवकर्माणि यथा जोषं समाचरेत्॥७॥ शिवलिंगार्चनं श्रेष्ठं तेभ्यः सारमनुत्तमं॥ एष एव परो धर्मः एतदेव परं तपः॥ ॥८॥ एष एव महायज्ञ एतद्दानं परं मतं॥ प्राणात्ययेधनत्यागे मरणे गदपीडिते॥९॥ अनुकल्पमयोक्तः शिवाश्रमनिषेविणां॥ स्नानाशक्तः तदा देवि भस्मस्नानं समंत्रकं॥१०॥ कुर्यात्त्रिपुंड्रं रुद्राक्षधारणं वा यथाबलं॥ प्रदक्षिणाद्यशक्तो पि चिंतयेच्छिवमव्ययं॥११॥ पुत्रेण पूजयेल्लिंगं ततो भोजनमाचरेत्॥ कार्यातिपातसंरोधे राष्ट्रविक्षोभणादिषु॥ १२॥ मनसा पूजयेद्देवं वाचिकैर्वा जपादिभिः॥ शिवाश्रमाश्रितेनैवं श्रमभिश्वतदाविके॥१३॥ अयोगी पूजयेल्लिंगे योगी सर्वत्र भावयेत्॥ मनसा वा महादेवं ध्यायेत्सांबं त्रिलोचनं॥१४॥ शिवार्हं पुष्पहिंसायां न भवेत्स तु हिंसकः॥ यज्ञार्थं पशुहिंसा च न तद्दोषाय कल्पते॥१५॥ यद्यल्पमपि वान्यार्थं गृह्णते स तु हिंसकः॥ शिवार्चनपरो नित्यं सर्वहिंसाविवर्जितः॥१६॥ सर्वत्र मैथुनाहीनो शिवयोगी वसेत्सदा॥ देवतातिथिभैक्ष्यार्थं पचेन्नैवात्मकारणात्॥१७॥ आत्मार्थं यः पचेन्मोहान्नरकार्थं

सजीवति॥ देवार्थं पचनं येषां संतानार्थं च मैथुनं॥ धर्मार्थं धनधान्यादि नरकार्थं विपर्यये॥
चिनात तनीयभागेन कुर्वीत नैवं शिवार्चनं॥१९॥ कुर्वीत धर्मं येन च व्ययं जीवितमध्रुवं॥ न्यायेनोपा
र्जयेद्वित्तं मद्भक्त्या सर्वसौख्यकः॥२०॥ दुःखेनान्येषु यद्वित्तं संपादितमघायनत॥ यः शिवं ब्रह्म
चारी स्यान्नैष्ठिको वाजितेंद्रियः॥२१॥ विरजाहोमकृन्नित्यं तद्भस्मपरिधारकः॥ त्रिसंध्यं पूज
येल्लिंगं बिल्वपत्रैः समाहितैः॥२२॥ भैक्ष्यं निवेद्य देवाय सोऽश्नीयाद्भक्तिपूर्वकं॥ निरन्नः सर्वसं
गेभ्यो जपेद्रुद्रमनन्यधीः॥२३॥ स शिवं ब्रह्मचारी स्याद्गृहस्थो यः शिवार्चकः॥ आध्याया
ग्नीन्यजेद्यज्ञैर्यज्ञेशं परमेश्वरं॥२४॥ पंचयज्ञपरो नित्यं पंचास्यध्यानतत्परः॥ अग्निरित्या
दिभिर्मंत्रैर्भस्मोद्धूलितविग्रहः॥२५॥ त्रियायुषत्रिपुंड्रांकः रुद्राक्षपरिमंडितः॥ त्रिसंध्यम
र्चयेल्लिंगं रुद्रं पंचाक्षरादरः॥२६॥ स्वाध्यायशीलः सततं संविभागयतिथिप्रियः॥ एवं शिवगृ
हस्थो यः शिवलोकं व्रजेत्स हि॥२७॥ सांगान्वेदान्यथान्यायमधीत्य विधिपूर्वकं॥ इष्ट्वा यज्ञैर्य
थान्यायमग्निष्टोमादिभिः क्रमात॥२८॥ ततो विश्वजितं नैर्वा अग्निं षट्चां निमेन वा॥ पुत्रानुत्पा
द्य सयतान्सदारः साग्निको द्विजः॥२९॥ वानप्रस्थाश्रमं गत्वा त्रिकालं स्नानभस्मधृक॥ त्रिपुं
ड्रमंडिततनुः वन्यैश्च कुसुमैः फलैः॥३०॥ पूजयित्वा महादेवं त्रिकालं कंदमूलधृक॥ चांद्रा
यणादिभिर्देहं शोषयन्ब्रह्मचर्यवान॥३१॥ ब्रह्मविद्यामधीयानः सदात्यक्तैषणोयतिः॥ आ
त्मन्यग्नीन्समारोप्य ज्ञानज्ञेयात्मविद्युतिः॥३२॥ भवेत्सुगुरुमासीनं समित्पाण्यभितो व्रजेत्॥

तेनाज्ञानेनानुतिष्ठन्धर्ममेनं शुचिर्व्रतः ॥३३॥ गुरौ शिवे विनाभावं न कुर्यान्मोहतोपि वा ॥ कु
र्यात्स्नानं त्रिषवणं यतिः त्यक्तैषणः शिवं ॥ ३४॥ पूजयेद्दलितैर्बिल्वैः श्रीरुद्रं प्रणवं जपेत् ॥
त्रिपुंड्रभस्मरुद्राक्षकलितो दंडधृक्सदा ॥३५॥ काषायवसनो मौनी सदोपनिषदर्थवित् ॥
भैक्ष्यं निवेद्य देवाय भुंजीयाद्ग्रासकाष्टकं ॥३६॥ एवं वसन्नेव नियतो शिवलोकं यतिः व्रजेत् ॥
शिवक्षेत्रं वसेन्नित्यमविमुक्तेपि वा भमा॥३७॥ तत्र मत्तारकं प्राप्य प्रणवं मुच्यते यतिः ॥ अत्या
श्रमी भवेद्वापि सर्वसंगविवर्जितः ॥३८॥ आपादमस्तकं नित्यं भस्मनोद्धूल्य विग्रहं ॥ रुद्रा
क्षकंठाभरणः शिरस्येव जटाधरः ॥३९॥ त्रिपुंड्रफालः सततं श्रीरुद्रजपतत्परः ॥ सर्वत्रै
व महादेवमात्मानं परिचिंतयेत् ॥४०॥ आत्मारामोभितिष्ठेत् पुण्यपापविवर्जितः ॥ लिंगं
शिवाश्रमे स्थानं भस्मना च त्रिपुंड्रकं ॥४१॥ हस्ते मूर्ध्न्युपवीते च रुद्राक्षं धारयेन्नरः ॥ अन्य
वर्णाश्रमभिरेवमेव यथाबलं ॥४२॥ राज्ञोपि पालनं नित्यं धर्मेषु धंच सन्मुखं ॥ मखादिक
रणं चैव शिवक्षेत्रादिपालनं ॥४३॥ भस्मत्रिपुंड्ररुद्राक्षधारणं च शिवार्चनं ॥ त्रिकालं विभवे
नैव रुद्रापंचाक्षरीजपः ॥४४॥ दंड्यानां दंडनं चैव वर्णाश्रमपालनं ॥ ऊर्ध्वपुंड्रधराणां तु दे
शान्निस्सारणं शिवे ॥४५॥ एवं कुर्वन्शिवाचारं नपः शिवतनुः भवेत् ॥ वैश्योपि कृषिगोरक्षावा
णिज्येज्यादिभिर्युतः ॥४६॥ भस्मत्रिपुंड्ररुद्राक्षलिंगार्चनपरः सदा ॥ धर्मेण ध्याभिजीवेत अ
कुर्वन्लोकपीडनं ॥४७॥ एवं वैश्यः सदाचारो शिवलोके वसेच्छिवे ॥ शूद्रोपि सर्ववर्णानां शि

श्रूषः भस्मभूषणः ॥४८॥ विरक्तश्च शिवागारे वसेत्काषायवस्त्रधृक् ॥ शिवार्के कर्पपु
त्वा शिवद्रव्याण्यसंस्पृशन् ॥४९॥ भैक्ष्यवृत्त्याभिजीवेन लिंगमभ्यर्चयन् शिवे ॥ विरक्ता स्त्री
यदि शिवे सर्ववर्णेष्वपि क्रमात् ॥५०॥ कषायवसनोपेता जटिला भस्मभूषिता ॥ त्रिपुंड्र रुद्राक्ष
धरा शिवलिंगार्चने परा ॥५१॥ भैक्ष्येण वाभिवर्तेत तथा वद्धे हां नमीश्वरी ॥ शिवक्षेत्रे शिवागारे सं
मार्जनपरायणः ॥५२॥ उपलेपनकर्त्री वा मालाकार्ध्यवा शिवे ॥ दीपोबोधकरी वापि पापैर्मु
क्ता शिवे व्रजेत् ॥५३॥ संकर्णा अंत्यजाः सर्वे शिवालयविलोकनौ ॥ रथ्यानां कर्षणाद्दैर्वि विमु
क्ता भस्मभूषिताः ॥५४॥ रुद्रभक्तैः सदा धार्याः रुद्रसंख्या जराशुभाः ॥ भस्म धार्यं प्रयत्नेन त्रिपुं
ड्रेष्वतुलनात्मना ॥५५॥ विधूय सर्वपापानि शिवलोके महीयते ॥ जलस्नानादसंख्यातस्मात्ते
यस्नानजं फलं ॥५६॥ वारुणं मलनाशाय भस्मनां ज्ञाननाशकं ॥ महापातकयुक्तै वयुक्तो वा
सर्वपातकैः ॥५७॥ भस्मस्नानी विशुत्मा शिवलोकं सगच्छति ॥ सोपियागतिमाप्नोति न तां यज्ञ
शतैरपि ॥५८॥ गंधलेपविहीनोपि भावदुष्टो न शुध्यति ॥ भावशुध्यं भवेत्पूतः यो वा को वापि
मानवः ॥५९॥ स्नानं वारुणमाग्नेयं वायव्यं मानसेपि च ॥ पंचस्नानानि सर्वेषां विहितानि विशु
ध्ये ॥६०॥ वारुणं च जले स्नानमाग्नेयं भस्मना भवेत् ॥ वव्यासालपयादिव्यं वायव्यं रजसा
गवां ॥६१॥ मानसं ध्यानमंत्रादि विहितं शंभुना शिवे ॥ उदकुंभसहस्रेण मर्दानं गशानेन च ॥
भावदुष्टो न शुध्येत शतानहायनमप्तुते ॥ भावपूतं चरेच्छौचं वस्त्रपूतं [illegible] जलं पिबेत् ॥६३॥

दृष्टिपूतंन्यसेत्पादं सत्यपूतां वचो वदेत्॥ जटाकपालपाणिस्यात् दुस्यां गोवीतरागवान्॥
॥६४॥ यदेवुसर्वधर्माणांफलंनस्याच्छिवाश्रमे॥ शिवाजटोजटीमुंडीभिक्षाशीविगतःस्पृहः॥
॥६५॥ मौनीभूतानुकंपीस्याद्धृतिःशांतमनाचरेत्॥ माधूकरंचरन्भैक्ष्यंएकान्नंपरिवर्जये
त्॥ उपवासात्परं भैक्ष्यंभैक्ष्यान्नक्तमयाचितात्॥ यतिस्तुनियतंभैक्ष्यंशिवक्षेत्रेवसेत्सदा॥६७॥
यःसर्वसंगनिर्मुक्तःभक्तःशिवपरायणः॥ योगनिष्ठोप्ययोगोवाशिवक्षेत्रे वसेत्सदा॥६८॥
योगीयांगतिमाप्नोतिदेहांतेतांगतिंव्रजेत्॥ वसेदापतनेर्नित्यंसगणःशिवधर्मवित्॥६९॥
पुष्पारामेककर्मात्मा बिल्वारोपणकृन्नरः॥ यत्कं वाबिल्वजनकं स्थापयितशिवाश्रमे॥७०॥
यावंतितत्रकुसुमबीजमूलफलानिच॥ तावद्वर्षसहस्राणिशिवलोकेमहीयते॥७१॥ त्रि
स्थानपुजासंयुक्तोकौपीनाछादनंतथा॥ वसेदामरणंक्षेत्रेशिवलिंगसमीपतः॥७२॥
देहिनांतत्रपंचत्वंशिवसायुज्यदायकं॥ शिवध्यानरतास्त्वंताशिवलिंगार्चनप्रियाः॥७३
ऋजवोमृदवःस्वस्थाअनुकूलाःप्रियंवदाः॥ शिवाभिमानसंपन्नाःतेशैवाःशिवसंमताः॥
७४॥ भस्मनिष्ठाःसदातुष्टानित्यंत्यागलवादिनः॥ मैत्रायणाश्चभूतेषुशैवात्यक्तकेषणाः
शिवे॥७५॥ चापलानिनकुर्वंतिशिवोदरवर्धागताः॥ शिवभक्तिसदाशांतिरहिंसासमदर्शि
ता॥७६॥ संतोषःसत्यमस्तेयंब्रह्मचर्यंतथाष्टकं॥ यथासंभवपूजादिभिःसदाशिवकथा
रतिः॥७७॥ कर्मणामनसावाचालाभालाभेषुसाम्यता॥ शौचमार्जवसंपत्तिर्भक्तिर्वैराग्यवि-

भागिना ॥७८॥ दयादाक्षिण्यसंपत्तिः निंदामात्सर्यवर्जनं ॥ हुंकारं तर्जनं चैव वर्जयेद्यश्शि
वाश्रमी ॥७९॥ मद्भक्तेषु सदा प्रीतिरन्यपूजानुमोदनं ॥ स्वयमभ्यर्च्यनं लिंगे पत्रपुष्पफला
दिभिः ॥८०॥ ममानुस्मरणं नित्यं नामभिश्च सदांबिके ॥ कथाशुश्रूयमाणासु स्वरनेत्राश्रुपात
नं ॥८१॥ एवं भक्तिः सदा कार्या शिवभक्तेष्वपि क्रमात् ॥ स्वदेहान्निर्विशेषेण शिवभक्तांश्च पाल
येत् ॥८२॥ भयदारिद्र्यरोगेभ्यः तेषु कुर्यात्प्रियाणि हि ॥ तेषां कुटुंबसंरक्षेत्स्वकुटुंबं यथा तथा ॥
॥८३॥ शिवस्य परिपूर्णस्य किं नाम कुरुते नरैः ॥ शिवभक्तार्चने नैव प्रमादः शांभवो भवेत् ॥
८४॥ यो वा को वास्तु मनुजो भस्मरुद्राक्षदेहवान् ॥ धनशंकरचिन्हांकः पूज्यो ब्राह्मणजन्म
भिः ॥८५॥ भोजनाच्छादनैर्देवि नस्येयं यदकुच्छीनं नतकुर्यादविचारेण शिवप्रीत्यैच
शांभवैः ॥८६॥ शिवयोगिनमायांतं प्रत्युत्थानाभिवादनैः ॥ शांभवो ब्राह्मणो यस्मात् भोज
नैः संप्रसादयेत् ॥ इतरान् प्रश्नकल्पनैः स्थानैः दानैश्च तोषयेत् ॥ यः शिवा शांभवं शांतं भस्मपुंड्रा
दिमंडितं ॥ स्वागतासनपाद्यार्घ्यमधुपर्कनिवेदनैः ॥८८॥ पूजयित्वा यथान्यायं कुर्यादप्य
भिवादनं ॥ भोजनाच्छादनेनापि रम्यावसथवासनैः ॥ ८९॥ मठोपकारणादीनि दद्यात्प्रीत्य
र्थमीशितुः ॥ ग्रामाद्यशिवभक्ताय भ्रांताय क्षुधिताय च ॥९०॥ तुष्टिं करोति यो नित्यं धनधान्यै
श्च वाससा ॥ गृहोपकरणैर्देवि शांभवं वासयेत्तु यः ॥ ९१॥ गोमहिष्यादिसंभारैः वासयेद्यः
शिवेरतं ॥ वर्षकोटिसहस्राणि वासः कैलाससद्मनि ॥९२॥ शिवभक्ताय विप्राय पुराणज्ञान

सादरं॥ दत्वा शैवपुराणानि यावदक्षरसंख्यया॥९३॥ तावद्वर्षसहस्राणि शिवलोके महीयते॥ दीनं भीतं नृपैर्वा तं श्रांतं चोरैः प्रपीडितं॥९४॥ आश्वासयति भक्तं मे शक्तो भक्तो यमे प्रियः॥ दारिद्र्यार्णवनिर्मग्नं भक्तं सीदत्कुटुंबकं॥९५॥ समुद्धरेत्ततं पोज्ञात्वा स्वराज्ये वासयेच्च तं॥ स तपःस्वपि तून्मग्नान् रज्जु कूपाद्घटं यथा॥९६॥ नरकाद्वोधरत्येव शिवभक्तजनार्चनात्॥ देयं त्रिपुंड्रफालेभ्यो न दानं सात्विकं विदुः॥९७॥ नाम्प्रसूये ललाटे वा न त्रिपुंड्रांकितं द्विजो नमान्॥ यद्यस्येच्च नरकेपतने स्पूर्वे पितामहैः॥९८॥ त्रिपुंड्रधारिणे दत्तं दानं भवति चाक्षयं॥ दातृप्रग्रहीतृणां नैव दोषोस्ति दानजः॥९९॥ स्वशक्त्यैव च भक्तेभ्यो दद्यात्किंचिद कुत्सयन॥ कारुण्यात्सर्वभूतानां देयमन्नं स्वशक्तितः॥१००॥ अभावे तृणभूम्यंभः पत्रमूलफलानि च॥ दत्वाधनी निर्धनो वा प्रियं वा या हरेत्सदा॥१॥ नेह दुःकूत्सर्गसोपानं मम रूयत्वियं वचः॥ प्रत्युत्थानं त्याभिगमनमनुव्रज्य प्रियं वचः॥२॥ पूर्वाभिमार्षी भक्तेषु भवेन्मत्प्रीतये शिवे॥ गमने चास्य वत्स्यं पंथानः संतु ते शिवे॥३॥ शिवं भवतु नित्यं मशेषार्थप्रकाशकं॥ आशीर्वादमिमं कुर्यात्सर्ववर्णेषु सर्वदा॥४॥ नमस्काराभिवादेषु स्वस्ति मंगलवादिने॥ शिवं भवतु युष्माकं म ब्रूयात्सर्वकर्मसु॥५॥ त्रिपुंड्ररहिते दत्तं यद्दानं नरकावहं॥ तस्मात्त्रिपुंड्ररहिते न देयं म्राह्यमेव वा॥६॥ त्रिपुंड्रोक्षूलने द्वेषो यस्य जायेत सर्वदा॥ सुद्विजोप्यात्मजो ज्ञेयः सख्व किरुजा रजः॥ शिवयोगी शिवज्ञानी शिवधर्मरताः श्रयः॥६॥ इत्येतत्त्रिविधं ज्ञेयं पात्रं दानानि सर्वदा॥ शिवमुद्दिश्य यद्दा

नव्यमनपेक्ष्यगुणागुणं॥ यतःस्त्रिनेत्रंपात्रंस्यात्सर्वपात्रवरंशिवे॥ दत्तमीश्वरभक्तेषुदत्तं
नद्दुर्धनेन्निशं॥८॥ द्विजानांवेदविदुषांकोटिभोज्यंतुयत्फलं॥ यतयेवीतरागायभिक्षादाने
नयत्फलं॥९॥ संभोज्यैकंशांभवंवाशिवक्षेत्रेविशेषतः॥दशकोटिद्विजानांतुभोजनेयत्फलं
भवेत॥१०॥साज्यापूपघृतक्षीरसूपशाकवादिपायसैः॥ग्रासंवाशांभवेविप्रेदत्तंतेभ्योविशिष्य
ते॥११॥ बिल्वमूलेशांभवायक्षीरान्नंभोजयेन्नरः॥ शिवभक्तोयदाभुंक्तेसाक्षाद्भुंक्तेसदाशिवः॥
॥१२॥ शिवभक्तान्द्विजश्रेष्ठान्यःश्राद्धादिषुभोजयेत॥ आपांक्तेयानथान्यान्वेतारयंत्ये
वतेद्विजाः॥१३॥ पितृणामक्षयातृप्तिःभवेद्वर्षसहस्रकं॥तस्मात्श्राद्धेश्वप्ययेवभोज्याःशां
भवसत्तमाः॥१४॥ शिवमुद्दिश्ययभोक्तव्याशिवभक्ताहिपर्वणि॥असंयतःसंयतोवासर्वाव
स्थागतोपिवा॥१५॥ योवाकोवाशिवभक्तःशिववत्पूज्यएवसः॥तस्मात्तान्पश्चपूज्यश्च
रक्षणीयश्चसर्वदा॥१६॥संपर्कादथवालोभात्योवालिंगंप्रपूजयेत॥नाममात्रप्रपन्नो
पिलिंगांकंठोपिवाशिवे॥१७॥समुनिःसमहायोगीसतपस्वीजितेंद्रियः॥नास्याचारंपरी
क्षेतनकुलंनव्रतंतथा॥१८॥विद्वानविद्वानथवामलीनोरक्षकःकृशः॥नशिवाश्रमणो
मौंजीनदंडोनकमंडलुः॥१९॥ नशिखवानजटाशाखाउपवीतमथापिवा॥बाह्याभ्यंतरचि
न्हैस्तंजानीयात्पूज्यएवतथा॥२०॥ [illegible] भस्मत्रिपुंड्ररुद्राक्षपरिमंडितविग्रहं॥ पूजये
त्सर्वभावेनमनसावचसाशिवे॥२१॥ सर्वदेवादिभक्तेभ्योममभक्तोविशिष्यते॥मद्भक्तो

यस्त्वादत्तंमयिदत्तंहितंध्रुवं॥२२॥ रुद्राक्षास्तएवजगतिरुद्राक्षवरकंकणाः॥येरुद्राध्यायपारज्ञातत्तन्नामार्थवेदिनः॥२३॥ तएवरुद्राजगतिभुवःपावनपावनाः॥ येपंचाक्षरपारीणाःपंचास्यध्यानमानसाः॥२४॥पंचपातकनिर्मुक्तास्तेरुद्रानात्रसंशयः॥येप्रदोषमहापूजाप्रवर्त्तनपरायणाः॥२५॥ बिल्वपत्रादिभिर्द्देविपंचामृतनिषेचनैः॥ तएवरुद्राविज्ञेयाः नात्रकार्याविचारणा॥२६॥ येसोमवारेनक्तेनभक्त्यावर्त्ततेनित्यशः॥तएवरुद्राविज्ञे०॥ २७॥ येचतुर्द्दशीपूजासुनियमानक्तभोजिनः॥तएवरुद्रावि०॥ २८॥ येवाकालाष्टमीष्वेवंशिवपूजापरायणाः तएवरुद्राविज्ञेयाः नात्रकार्यविचारणा॥२९॥ येपर्वपूजानिरताशिवलिंगेशिवात्मके॥ त्रिकालमप्रमादेनपूजयंतिदृढव्रताः॥३०॥शिवभक्तेषुनियतंदानाच्छादनभोजनैः॥पूजयंतिनरायेवैतेवैरुद्रानसंशयः॥३१॥ अशेषपापनिर्मुक्ताःशिवलोकेमहीयते॥शिवक्षेत्रेषुनियतंयेवसंतिद्विजादयः॥३२॥ तेवैरुद्राइतिप्रोक्तासदाशर्वार्चनेरताः॥आस्वेदमतिथत्नेनयेप्रणामकराःशिवे॥तएवरुद्रावि०॥ प्रदक्षिणपरायेवैनमस्कारंपदेपदे॥तएवरुद्रावि०॥ लिंगाग्रेनर्तनपराःत्रिकालंसावधानतः॥तएवरुद्रावि०॥३५॥ शिवस्तवपरायेवैत्रिकालंसावधानतः॥तएवरुद्रावि०॥सदाशिवकथासक्ताःसर्वदानियमाद्द्विजाः॥तएवरुद्रावि०॥३७॥ येमंत्नामजपासक्तासर्वदासावधानतः॥तएवरुद्रा०॥ निवसंतिसदायेवैअविमुक्तेमहेश्वरि॥नियतानियमोपेतास्तेरुद्रानात्रसंशयः॥३९॥ यःसर्वसाक्षिणंसांबंमहादेवंस-

नातनं ॥ सर्वोत्कृष्ट नयावेद सरुद्रोनात्र संशयः ॥४०॥ पराशक्तिं महादेवीं सर्वमंत्रमयीं शिवां ॥
सर्वोत्कृष्टतयावेद ब्रह्माविष्णोर्विमुक्तिदां ॥४१॥ सएव गणपः श्रेष्ठः सएव द्विजसत्तमः ॥ योवा
ब्रह्मादितुल्यंमां वेद चाब्राह्मणोहि सः ॥ योमां विष्ण्वादिभिः तुल्यं वेद चाब्राह्मणोहि सः ॥ सो
मोहं सर्वजनिता ब्रह्मविष्णुहरात्मनां ॥४३॥ यमशक्रानिलानां च वन्हेश्च जननाशिवे ॥ यो
न्यतुल्यनयावेदः सोंत्यजोहि द्विजोपिसन् ॥४४॥ योमां विश्वाधिकं रुद्रं महादेवं सनातनं ॥
योन्यतुल्यं० ॥४५॥ मन्ये वेदसुधास्वादरहिताः पापयोनयः ॥ आसुराचारनिरताभूसुराअ
पिरासभाः ॥४६॥ नंदंतिनिंदयान्योन्यं नेगार्दभरवोपमाः ॥ वितर्ककुशलाःसर्वे दोषज्ञायेकु
लालजाः ॥४७॥ शिवपादांबुजद्वंद्वपूज्यबिल्वविवर्जिताः ॥ निघृणाघ्राणहीनास्तेनार्णकन ने
रोपमाः ॥४८॥ वानराकृतयः सर्वेपामराजारजाहिते ॥ शिवधर्मोज्झितायेयेजारजास्तेनरा
इमे ॥४९॥ मूढामूढार्चनाहीनाः हीनजातांतनएवहि ॥ शिवज्ञानविहीनानां नांवथाजन्मन
संशयः ॥५०॥ सर्वेषामपितीर्थानां ज्ञानतीर्थं परंस्मृतं ॥ ज्ञानतीर्थात्परं तीर्थेषु त्पुण्यं क्षां
तिवारिणा ॥५१॥ ज्ञानयोगः तपोजप्यं यज्ञदानादिसत्क्रियाः ॥ क्रोधिनःस्तु वथायस्मात्तस्मा
क्रोधं विवर्जयेत् ॥५२॥ मर्मास्थिप्राणहृदयं निर्दहेदप्रियं वचः ॥ अवाच्यमप्रियं यस्माच्छि
वभक्तिर्विरोधतः ॥५३॥ क्षमादानं दमः सत्यं अहिंसा पैशुन्यवर्जनं ॥ निर्मलक्षांतिसलिलैर्लो
कमाल्हादयशीतलैः ॥ इहसौख्यमवाप्नोति परत्र च शुभांगतिं ॥ सर्वशास्त्रेषु वेदेष्वसर्वेय

तैश्वर्यमतत्फलं॥५५॥ योनहिंस्यतिभूतानितस्यपुण्यंतपोधिकं॥त्रैलोक्यमपियोदद्यादशिव
लंरत्नपूरितं॥५६॥ चरेत्तपोसिरूक्षाणिनतत्तुल्यमहिंसया॥यथाकालोपपन्नेनकृतन्याया
गतेनवै॥५७॥ उत्पन्नार्थेनयस्तोषःसंतोषःसउदाहृतः॥ तेनसर्वमरवनेषंतेनसर्वमनुष्ठि
तं॥५८॥ येनतृष्णापटंत्यक्तंसंतोषात्स्वस्तिमान्वसेत्॥परपीडादिनिर्मुक्तादंभालस्यविव
र्जितः॥५९॥ येशिवंशरणंप्राप्तास्तेदुःखस्यभाजनं॥येचाकेवासदादेवंस्मरंतिपरमार्थतः॥
॥६०॥ तेसर्वेदुःखनिर्मुक्तादुर्गाण्यपितरंतिते॥ अन्येतुपशवःसर्वेशिवधर्मविवर्जिताः॥
॥६१॥ सत्यंसत्यंमहादेविनमुक्तेःपात्रमुत्तमं॥ बह्वायासकराधर्माःसर्वेसर्वोर्चनेनोद्भि
नाः॥६२॥ तेचैमलाश्रितःसर्वेभवंतिनरकोसिताः॥ इतिपंचप्रकारोयंशिवधर्मःप्रकीर्ति
तः॥६३॥आपान्तितेहियद्यस्माच्छीघ्रमेवप्रणश्यति॥ ॥ईश्वरउवाच॥ ॥अयमंशोवि
केसाक्षात्साराःसारउदाहृतः॥मयित्वाशिवरत्नौघोनदेविह्रदिगोप्यतां॥६४॥नाभक्ताया
भक्तांनायन्देयोयंशिवयोगिने॥भक्तेचैवप्रदातव्योव्यपारेनरकंलभेत्॥६५॥महादेवा
रव्ययाप्रोक्तोमुक्तयेसर्वदेहिनां॥श्रवणाद्स्यपापानिनश्यंतिविविधानिच॥६६॥यान्
यान्प्रार्थयतेकामान्मद्भक्तोलभतेचिरात्॥बहुनात्रकिमुक्तेनश्रवणान्मोक्षमाप्नुयात्॥
॥६७॥तस्माद्भक्तेःसदाश्राव्योशांभवादेवकेवलं॥सर्वःतरंतुदुर्गाणिसर्वेभद्राणिपश्य

तु॥६८॥ सर्वेः सुगतिमाप्नोति सर्वस्यातिभवेच्छिवं॥ ॥स्कंद उवाच॥ ॥ प्रणमत बलदुःखं

नास्ति वः पापभिताः स्तरुणशशिललामं सोममाशुप्रयातु॥ शरणमरुणपादं कारणं तारणं

वः प्रथितभवभयाद्रेः दारणं पातकानां॥६९॥ अंशोमहे शाकथितः शशिधामचूडलिंगाभिधे

कमहिमा स्वतुलः किलायं॥ ख्यातो महादेव इति प्रसिद्धः सिद्धां निराद्धां निन वाक्यजालः॥७०॥

नत्वास्तु त्वां महेशं निगमसुगमवाङ्मसारं प्रकृष्टं श्रुत्वा कृत्वा गुरुं न श्रुतिशिखरमहावाक्य

सारार्थविद्यं॥ भुक्त्वा भक्तिपरेण चेतसपरे ध्यात्वा शिवं पातकं त्यक्त्वा मानुषमध्रुवं जनरहो

यात्येव शंभोः पदं॥ नागानाथसहोदरापतिकृतापादारविंदार्चनाह्वारानुष्ठ हृदंतरं पुरह

रं विश्वेश्वरं शंकरं॥ भास्वद्भास्करकोटिसंन्निभमहसा रभदं विष्णवे देत्योघप्रहरं हरं

त्वघहरं चेतो भज स्वांतरं॥७२॥ ॥ इति श्रीशिवरहस्ये एकादशांशे महादेवाख्ये भक्ति

महिमा नाम पंचाशत्तोध्यायः॥५०॥ ॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥ श्री ॥

सम्वत १९७८ शाके १८४३॥ भाद्रशुक्ल ४ चंद्रवासरे सन १९२१ ई सिप्तम्बर म॰ ९ ता॰ ५

॥इतिश्रीशिवरहस्यस्यैकादशांशस्समाप्तः॥